# खण्डनोद्धारः ।

सन्मिश्रश्रीवाचस्पतिविरचितः ।

वाराणसीस्थराजकीयसंस्कृतपाठशालीयपुस्तकाल-
याध्यक्षेण पण्डितविन्ध्येश्वरीप्रसादद्विवेदिना
उक्तपाठशालीयन्यायशास्त्राध्यापकेन
न्यायाचार्योपाधिधारिणा
श्रीवामाचरणभट्टाचार्येण च

संस्कृतः ।


वाराणस्याम्

मेडिकल् हाल् नामकयन्त्रालये

१९०९ ईसवीयवत्सरे

मुद्रितः ।

श्रीगणेशाय नमः ।

# खण्डनोद्धारः ।

## श्रीवाचस्पतिमिश्रविरचितः ।

अणोरणीयान् महतो महीयान्
एकः पुमान् विश्वजनीनवृत्तिः ।
जगत्प्रसूतिस्थितिभङ्गबीज-
मस्माकमन्तःकरणं चकास्तु ॥

आनन्दाद्वयवादिनी श्रुतिरपि त्रस्तेव मूकायते
तस्मिन्नेव जडीभवन्ति जगतां चेतांसि मायामुषि ।
निर्वाणप्रतिभूर्भविष्णु भजतामाभीरदारप्रियम्
वन्दे स्वात्मकचित्प्रकाशममलं तन्निर्विकारं महः ॥
क्षीराब्धेरुज्जिहानां त्रिदशपरिषदि प्रोल्लसद्भूरिभङ्गीम्
अङ्गीकुर्वन् कटाक्षैस्त्रिभुवनजननीं व्रीडया नम्रमौलिः ।
देवः पायादपायात् कुसुमशरपरीरम्भसञ्जातभावः
सद्यःस्विद्यत्तरेण स्मितकमलमुखीमाददानः करेण ॥
तर्ककान्तारचारिण्यः स्खलन्ति प्रायशो गिरः ।
तत् समादधति प्राज्ञा एष धर्मः सनातनः ॥
खण्डनमुद्दण्डमभूदुपर्युपरि कल्पनासहस्रेण ।
तन्मूलशुद्धमतिना वाचस्पतिना निरस्यते सम्यक् ॥

अथ कथायां वादिनोर्नियममेतादृशं मन्यन्ते यत् प्रमाणादयः सर्वतन्त्रसिद्धान्ततया सिद्धाः पदार्थाः सन्ति इति कथकाभ्यामभ्युपेयम् । तदपरे न क्षमन्ते । तथाहि प्रमा-

णादीनां यत् सत्त्वमभ्युपेयं कथकेन तत् कस्य हेतोः किं तदनभ्युपगच्छद्भ्यां वादिभ्यां(१) तदभ्युपगमनियतस्य वाग्व्यवहारस्य प्रवर्तयितुमशक्यत्वात् उत तत्कर्तव्यवाग्व्यवहारहेतुत्वात् उत लोकसिद्धत्वात् । अथवा तदनभ्युपगमस्य तत्त्वनिर्णयविजयातिप्रसङ्गकत्वादिति(२) ॥

अत्र यद्यपि प्रमाणादिसत्त्वाभ्युपगमनियतत्वं तद्धेतुकत्वं तथात्वेन लोकसिद्धत्वं तदधीनफलकत्वं चेति चतुष्टयमप्यविरुद्धमिति विकल्पो न कल्प्यते । तथापि पुरस्काराभिप्रायेण विकल्पः इदं वा पुरस्कृत्य तथा मन्यसे इदं वेति । ननु तथापि न्यूनो विकल्पः सर्वपुरस्कारपक्षस्यापि विकल्पनीयत्वादिति चेन्न । एकैकखण्डनेनैव सर्वखण्डनसिद्धौ तस्यार्थतः खण्डितत्वेन पृथगनुपन्यासादिति । अत्र नाद्यद्वितीयौ वेदान्तिमाध्यमिकचार्वाकवाग्व्यवहारस्य तेन विनापि सत्त्वात् । न तृतीयः लोको हि प्रमाणं वा वाहीकादिर्वा । अत्र नाद्यः प्रमाणादिसत्त्वाभ्युपगमः प्रमाणादिव्यवहारसिद्ध इत्यस्यापि विचार्यत्वात् । नापरः तद्व्यवहारस्य परीक्षकैरनादरणात् । नान्त्यः समयबन्धेनैव फलानतिप्रसङ्गादिति खण्डनम् ॥

अत्र प्राञ्चः । अलीकापेक्षवैलक्षण्यमात्रमेवेह सत्त्वं विवक्षितं तच्च प्रमाणादिवस्तुस्वरूपमेव । अस्तु वा अबाध्यत्वादिकं सत्त्वं धर्मधर्मिणोर्मया भेदोपगमात तदवधारणमेव तदभ्युपगमः । अथ सर्वादृष्टेः(३) सन्देहात् स्वादृष्टेश्च व्यभिचारात् अबाध्यत्वं दुरवधारणमिति चेन्न । यस्य हि

(१) वादिप्रतिवादिभ्यामिति खण्डनखण्डखाद्ये पाठः ।

(२) एतत्पर्यन्तं खण्डनग्रन्थे दृश्यते अनन्तरं च पाठभेदः ।

(३) सर्वेषां बाधदृष्ट्यभावस्येत्यर्थः ।

वस्तुनो यावन्तः परीक्षाप्रकारा लोके प्रतीताः तावद्भिः परीक्ष्यमाणे तस्मिन् वस्तुनि चेदन्यथाभावो नावसीयते तदा तदबाधितमवगम्यते । तादृशमेव च विज्ञानं लौकिकैः प्रमेति तत्करणमेव प्रमाणमिति तद्विषय एव च प्रमेयमिति गीयते । तस्मादस्ति प्रमाणादीनां सत्त्वं च अभ्युपगमश्चेति । तद्धि नाभ्युपगम्यते यत्प्रतीयतएव न यथा खपुष्पादि । प्रतीतमपि वा बाध्यते यथा देहात्मत्वादि । उपाधिपुरःसरमेव वा प्रतीयते यथा कुङ्कुमारुणा तरुणीति । प्रमाणादि तु नैवं इति । न च तद्गृहीतेः प्रामाण्यसंशयादर्थपर्यन्तमनवधारणमिति । प्रवृत्तिसामर्थ्यादिना ज्ञातप्रामाण्यस्याप्यवधारणसम्भवादिति न च प्रतीतमपि प्रमाणादिकम् औत्तरकालिकबाधप्रतिसन्धानेन त्याज्यम् आसंसारं बाधानवतारात् तादृशबाधस्यापीदानीं विनिश्चायकाभावात् शङ्कापिशाच्याश्चातिदौर्बल्येनाकिञ्चित्करत्वात् त्वयापि च व्यवहारदशायां सर्वलोकसिद्धस्यैव वर्त्मनोऽनुसर्तव्यत्वात् । अत एवानुमानवैरिणं चार्वाकं प्रत्यनुमानप्रयोगं कुर्वाणो न चार्वाकैरभिधीयते (१) तत्प्रयोगस्य लौकिकैरुपगमात् वाद्यनुमतत्वस्यादोषत्वात् प्रकृतव्यवहारदशायां लौकिकं पन्थानं जहत् उपेक्षणीय एव भवति । नापि प्रपञ्चमिथ्यात्वावष्टम्भेन प्रमाणादेरसत्त्वाभ्युपगमः प्रपञ्चमिथ्यात्वे प्रमाणाभावात् । न हि प्रत्यक्षेण तत्सिद्धिः न हि तन्मिथ्यात्वे प्रत्यक्षमस्ति । नाप्यनुमानं प्रत्यक्षबाधात् (२)। नाप्यागमः विरोधिप्रत्यक्षबाधेन प्रपञ्चमिथ्यात्वश्रुतेरेवान्यपरत्वात् । किं च प्रपञ्चमिथ्यात्वं न तावदभावप्रति-

(१) चार्वाकादिरिति शेषः ।

(२) प्रत्यक्षेण बाधितत्वादिति भावः ।

योगित्वं सिद्धसाधनात्(१)। नाप्यत्यन्तासत्त्वं न हीदं प्रमाणेनालिङ्ग्यते खपुष्पवत्। नापि प्राचीनैः प्रमाणादिसत्ता नाङ्गीकृतेत्यतोऽस्माकमपि तदनुपगम इति प्रपञ्चमिथ्यात्वमिति युक्तम्। अभ्युपगमबीजे सति प्राचीनानभ्युपगमस्यानभ्युपगमाहेतुत्वात्। तदेतत् दिगम्बरैर्दर्शनावरणीयं(२)तम इत्युपहस्यते। किं च प्रमाणं स्वार्थविचारे कथायां च विचारयितुः कथयितु श्चनियतोपस्थितिकम् अज्ञातस्य व्यवहारानङ्गत्वात्। अत एव लौकिकानां स्वार्थविचारे कथायां चाङ्गत्वात् प्रमाणादिकं तत्सत्त्वं च सर्वतन्त्रसिद्धान्त इति। न तत् कथासाध्यम्। न हि तेन मय्येव प्रमा जन्यते न तु त्वयि येन तस्य प्रमाकरणत्वं त्वां प्रति साधनीयं स्यात् तस्य त्वयि मयि च समवृत्तिकत्वात्। एवं च सति प्रमाणत्वासत्त्वाभ्युपगमवतः तदसत्त्वाभिधानम् औदासीन्याभिधानं वा नूनं विप्रलम्भकवाक्यं तथा च प्रमाणादिसत्त्वे ऽपि प्रमाणं कथायां वाच्यम् अकथायां वेति विकल्पस्यापि क्वावकाशः तत्सत्त्वस्य सकलव्यवहर्त्रनुमतत्वेन तत्र प्रमाणाभिधानस्यैवानवकाशात्। किं च प्रमाणादिसत्त्वाभ्युपगमस्तावत् विचारकथयोः प्रवृत्तिहेतुः। तथा च तं विनैव यदि ते मन्यसे तदा परप्रबोधहेतुभूतं वाग्व्यवहारमन्तरेणापि परप्रबोधमिच्छ तथा च विरमय वाग्व्यवहारादपीत्यलम् अतिपीडनया॥

नन्वियमपि प्रातबन्ध्युपायव्यतिरेके फलं भवतीत्यभ्युपगमस्य वादिभ्यां प्रवर्तितायां कथायां त्वया वाच्या

(१) तथा च सिद्धसाधनस्थले पक्षताया असत्त्वात् मिथ्यात्वानुमानासम्भवात् प्रमाणान्तरस्य चार्थान्तरग्रस्तत्वादिति भावः।

(२) तमो यथा दर्शनेनावृतं न भवति परन्तु तमसा दर्शनमेवावृतं स्यात् तद्वदिति भावः।

अन्यथा प्रवर्तितायां वा । नाद्यः स्वयमपि तथोपगमेन तस्यानुपायव्युत्पादनानौचित्यात् । नापरः न्यायमते जगति तादृश्याः कथाया एवासम्भवात् । न ह्युपायासत्त्वं तदौदास्यं वा समाश्रित्य वादी वादिनौ वा कथां प्रवर्तयत इति । न्यायमतमिति चेत् । हन्त तर्हि त्वयापि नैयायिकेषु यद्दूषणं दीयते तत् तदङ्गत्वानभ्युपगमप्रवर्तितायां कथायाम् अथ प्रमाणसत्त्वाभ्युपगमाङ्गिकायाम् । नाद्यः तत्र तदभिधानानौचित्यात् स्वयमेव नैयायिकेन प्रमाणादेरनङ्गत्वोपगमात् । नान्त्यः त्वन्मते तादृश्याः कथाया एवासम्भवात् तस्मात् प्रमाणाद्यनभ्युपगमे कथैव न सम्भवति उन्मत्तकेलिप्रसङ्गात् इत्येव स्यात् ॥

नव्यास्तु प्रमाणस्य हि सत्त्वं नेत्यभ्युपगच्छन् प्रमाणेन कथं दूषयेत् नेति । नाभ्युपैमि किन्तु तत्रौदासीन्येन वर्त इति चेन्न । प्रत्यक्षखण्डनाय त्वया प्रमाणस्याहरणात् औदास्ये च तदसम्भवात् । न हि तत्रोदास्ते चाश्रयते चेति सम्भवति तस्मादौदास्याभिधानम् असत्त्वाभिधानं च विप्रलम्भकवाक्यमिति । सांव्यवहारिकेन प्रमाणेन कथयामि न तु पारमार्थिकीमपि सत्तामभ्युपैमि शेषे बाधोदयादिति चेत् । किमिदं सांव्यवहारिकत्वम् । अविचारितसुन्दरत्वमिति चेत् । तर्हि तद्बाधकमेव प्रमाणम् । न हि बाध्येन किञ्चिद्बाध्यते किन्त्वबाध्येनैव । सर्वमेव बाधकं बाध्यम् उभयसिद्धबाध्याविशेषादिति(१) चेत् । इदमप्यनुमानं बाध्यम् अबाध्यं वा इत्युभयतः पाशारज्जुः । त्वत्कल्पितानि प्रमाणानि त्वत्कल्पितैरेव दूषणैरुपसृष्टानि विलीयन्ते एवं दूषणान्यपि सुन्दोपसुन्दवदिति ब्रूम इति चेत् । एवं हि

(१) उभयसिद्धबाध्यः शुक्तिरजतादिः ।

सर्वाणि प्रमाणानि त्वद्रीत्या बाध्यानीति त्वद्वचनार्थः सोपि व्याहतः तस्यैवाबाध्यत्वात् बाध्यत्वे चार्थासिद्धेः किं नश्छिन्नम् उपात्तस्य साधनस्य असाधनत्वे उपादातुरेव निग्रहात्। एतत् सर्वं बाध्यमेव शेषे बाधोदयादिति चेन्न। आसंसारं तदनुदयात्। व्यवहारदशोत्तरं बाधो भविष्यतीति चेन्न। आसंसारं व्यवहारदशाया एव सत्त्वात् तदुदीच्यापि दशा भविष्यतीत्यत्र प्रमाणाभावात्। उपनिषदां च तत्प्रमाणत्वाभिमतानाम् त्वया प्रामाण्याभावस्य मया चान्यपरत्वस्योपगमात् शङ्कामात्रस्य च दौर्बल्येनासाधकत्वात्। व्यवहारदशायां तावत् उपनिषदेव स्वप्रकाशशुद्धबुद्धस्वभावे ब्रह्मणि दशान्तरभूते(१) प्रमाणम् एतद्दशात्यये तु तदेव स्वस्मिन् स्वप्रकाशत्वादिति चेत्। दशान्तरे(२) तस्याः कुतो न प्रामाण्यम् भङ्गवैकल्याद्वा अङ्गिवैकल्याद्वा। नोभौ प्रागिव तदानीमपि बोद्धुर्योग्यताद्यवगतेरुपनिषदां च सत्त्वात् उपनिषज्जन्यबोधो हि वृत्तिलक्षणः स चानिर्वचनीयानाद्यविद्याद्वयमहिम्ना प्रादुर्भवति सारस्वत इव पवनोद्धूतस्य वीचिनिचयः। तदत्यये तु विलीयते तस्यैव निवातस्तिमितस्येवेति चेत्। भवेदेवं यदि ब्रह्मभिन्नो बोद्धा तदा न स्यात् स पारमार्थिको नास्त्येवेति चेन्न। साधयिष्यन्ते हि नानात्मानः॥

यत्तु प्रमाणादिसत्त्वाभ्युपगमस्य कथाङ्गत्वं नैयायिकेन तावत् साध्यते तत् कीदृश्यां कथायां न तावत् वैतण्डिकेन प्रमाणादिसत्त्वाभ्युपगमेनैव प्रवर्तितायां सिद्धसाधनापत्तेः। अथ तदनङ्गत्वाभ्युपगमेन तदङ्गत्वा-

(१) सर्वनिषेधावधीभूते इत्यर्थः।
(२) अद्वैतदशायामित्यर्थः।

नङ्गत्वौदासीन्येन वा तेन प्रवर्तितायां तथासति तत्क-थान्तरमपि तथैवास्तु न हि यया कथया प्रमाणादिसत्त्वा-भ्युपगमस्य कथाङ्गत्वं साध्यते सा कथा तदङ्गत्वसिद्धौ सत्यां प्रवर्तेत इति सम्भवति तदानीं साध्यस्य तदानीं सिद्धत्वासम्भवादिति। तत्तुच्छम्। कथा हि तावत् साधन-दूषणपरवचनसन्दर्भविशेषः। न च साधनाद्यनङ्गीकारे तदौ-दास्ये वा स तादृशो वक्तुं शक्यते तस्मात् गलेपादि-कयापि कथकेन साधनदूषणे मन्तव्ये तदनुमतिं विना तन्मय्यां कथायामेव प्रवेशासम्भवात् तस्मात्तदभ्युपगमम-न्तरेण कथैव न सम्भवति। तदुक्तम् भाष्यकृता। यदि नाभ्युपैति तदा उन्मत्तवदुपेक्षणीयः स्यात्। तर्हि तदङ्ग-त्वसाधिका कथा कथं तदङ्गत्वाभ्युपगममन्तरेण न कथ-ञ्चिदित्यवेहि। साधनदूषणानङ्गीकारे तत्परवचनसन्दर्भरू-पा कथैव कर्तुं न शक्यते नहि तन्नाभ्युपैति तेन च व्यव-हरति इति सम्भवति तस्मात् ईदृशव्यवहर्त्रा त्वयैवानी-दृशोऽभिसन्धिरपि स्वयमेव हेय इत्यलमस्माकं तदङ्गता-साधनप्रयासेन इत्याहुः ॥

अथावश्यकत्वाल्लाघवाच्च समयबन्ध एवास्तु कथाहेतु-र्न तु तस्मिन् सति प्रमाणादिसत्त्वाभ्युपगमोऽपि गौरवात् माध्यमिकादिकथाप्रयोगे व्यभिचाराच्चेति चेत्। स कीदृक्। तथाहि वादिना प्रमाणेन तर्केण च व्यवहर्तव्यम् प्रतिवा-दिनापि कथाङ्गतत्त्वज्ञानविरहलिङ्गप्रतिज्ञाहान्याद्यन्यतमं निग्रहस्थानं तस्य वक्तव्यं तद्व्युत्पादने च वादिनो भङ्गो व्यवहर्तव्यः तदव्युत्पादने तु प्रतिवादिन एव भङ्गः निरनु-योज्यानुयोगात्। यस्य च साधने परोक्तं दूषणं न लगति यदुक्तं च दूषणम् अनुद्धारं तौ जेतृतया व्यवहर्तव्याविति।

ईदृशोऽसाविति चेत् । हन्त तर्हि साधकबाधकतर्कैर्व्यवहर्त-
व्यम् ते च नाङ्गीकर्तव्या इति दुर्घटम् । परपक्षस्तावत् नाङ्गी-
क्रियते तथा च तमादाय तत्प्रतिषेधलक्षणो व्यवहारः क्रिय-
त एवेति चेन्न । प्रतिषेधस्य हि तत्र धीराहार्यरूपैवाङ्गम् प्रमा-
णादेरभ्युपगमरूपे ऽतिविशेषात् प्रमाणादेः प्रतिषेध्यको-
टिप्रविष्टस्य प्रमाणादिर्व्यवहर्तव्यमिति स्वोपगमेन करण-
कोटावपि प्रवेशात् । ननु प्रमाणादेरप्यभ्युपगमो न प्रयो-
जको गौरवात् किन्त्वनभ्युपगमाभाव एव लाघवात् वि-
शिष्टव्यवहारे भेदाग्रहवत् । अत एव प्रमाणादेर्नासत्त्वम-
ङ्गीकरणीयं वैयर्थ्यात् । किं तु मध्यस्थयैव धिया व्यवहार
इति ब्रूम इति चेन्न । आहारभिन्ना हि या प्रमाणादेः कथा-
व्यवहारादिहेतुत्वधीः सैव हि सत्त्वधीः स एव चाभ्युपगमः
तथा च तयाभ्युपपन्नाहमभ्युपैमीति च वदन् स्फुटमतिधृ-
ष्टोऽसीति दूरमपसर । किंच त्वदुक्तो न समयबन्धः शास्त्र-
सिद्धे साधनदूषणयोः सिद्धिप्रतिषिद्धिव्याप्यत्वे समय-
बन्धस्याधिकत्वात् । अत एव समयबन्धमश्रुतवतामपि त-
टस्थानां तत्साधनदूषणश्रवणे सिद्धिप्रतिषिद्धिधीर्जयभङ्ग-
धीश्चोत्पद्येते । किं तु यत्र शास्त्रं न जागर्त्ति तत्रैव समय-
बन्धो यथाऽनौष्ण्यमेव वाच्यम् अप्रतिभैवोद्भाव्या अमुक
एकदेशी समाश्रयणीय इत्यादि तत्र हि समयबन्धालिङ्गना-
देव तदतिक्रमादौ जयपराजयसिद्धेः । प्रमाणतर्कयोस्तु सा-
धकबाधकत्वे न सामयिके किन्तु स्वाभाविके एव तयोस्त-
थात्वस्य सर्वतन्त्रसिद्धान्तत्वात् इति न तत्र समयबन्धापे-
क्षेति । नन्वस्तु प्रमाणादिसत्त्वाभ्युपगमः कथाङ्गम् अन्यथा
व्याघातात् । तथापि प्रमाणादिसत्ता तावन्न तात्त्विकी
सेत्स्यति । सर्वदा सर्वथा सर्वस्य यत्र न बाधकावतारः
तद्धि तात्त्विकं एतच्चाशक्यनिरूपणं कथाप्रवृत्तिसमये

सर्वथैवाज्ञेयं तस्मात् कतिपयप्रतिपत्तृनिष्ठः कतिपयकालव्यापकोऽभ्युपगमो लौकिकव्यवहारहेतुः स एव च कथाङ्गमपि तथा च सांव्यवहारिकीं प्रमाणादिसत्तामभ्युपेत्य विचारारम्भ इति सिद्धं नः समीहितमिति चेत् । प्रमाणशरीरं वा दुरवधारम् तस्य प्रामाण्यं वा येनैवं मन्यसे । नाद्यः धूमादेः सर्वैर्धूमत्वादिनावधारणात् प्रमाणत्वेन तदवधारणं न शक्यमिति चेन्न । प्रमात्वस्य प्रवृत्तिसामर्थ्यादिना शक्यावधारणत्वेन तदुपहितप्रमाणत्वस्यापि शक्यावधारणत्वात् । विषयिणि संशयात् विषयेऽपि प्रमाणादौ सर्वत्र संशयः स्यादिति ब्रूम इति चेत् । न हि विषयिणो ज्ञानत्वेनापि घटविषयत्वेनापि तस्य घटत्वप्रकारकत्वसंशयः । न हि अजानन् जानामीति प्रत्येति । नापि घटं जानन् घटं जानामीत्यनुव्यवसायाकारनिरस्त एवास्यान्यथाभावः । नापि गृहीतेः प्रामाण्यसंशयात् गृहीतेऽप्यामूलं संशयः । न हि ज्ञाने प्रामाण्यसंशयो भवत्येवेति नियमः तज्ज्ञानस्याज्ञानेन वा कोट्यस्मरणेन वोत्कटविषयान्तरसञ्चारेण वा तत्संशयानुत्पत्तेरपि सम्भवात् । तस्मात् प्रमाणसत्त्वालम्बनापि धीः तन्निश्चयरूपा तावदुत्पन्ना सा चागृहीतप्रामाण्यासन्दिग्धप्रामाण्या सती प्रमाणानि दर्शयन्ती प्रमाणादिसत्त्वे प्रमाणमिति अग्रेतनेन विचारेण प्रमाणादयो बाध्या भविष्यन्तीति शङ्कया नेदानीमप्यभ्युपेयतइति चेत् । न हि भविष्यतो बाधकस्य शङ्कापि बाधिका अतिप्रसङ्गात् । नातिप्रसङ्गः सर्वमेव हि बाध्यमेवेति चेन्न । तर्हि सर्वं बाध्यम् सर्वबाधकस्यैव वा बाध्यत्वात् तस्मात् सर्वं बाध्यमित्यादिकं वाक्यम् नानुप्रतिपत्तेरङ्गम् स्वक्रियास्ववचनस्वज्ञानादिव्याघातग्रस्तत्वेन बाधितार्थकतया योग्यताज्ञानविरहादिति ॥

नन्वेभिरपि बाधकैः प्रमाणादिसत्त्वाभ्युपगमस्य कथाङ्गत्वं साधनीयम् कथायामेव न ह्यकथाभूतो वादिनोर्वचनसन्दर्भः सम्भवति तथा चैतत्कथावत् कथान्तरमपि प्रमाणादिसत्ताभ्युपगमं विनैवास्तु इति चेन्न। कथातः पूर्वमेव स्वार्थप्रमाणेनोक्तव्याघातादिसहायेन त्वद्व्यवतीर्णेन त्वयि तदङ्गत्वसिद्धेर्निष्प्रत्यूहत्वात् । नन्वेवं प्रमाणादिसत्तायामपि तद्धीः प्रमाणम् एवमुत्तरत्रापि इति धीधारोपगमेनाऽनवस्था स्यात् । तदनभ्युपगमे च मूलपर्यन्तमसिद्धिः स्यादिति चेन्न । न ह्यविरललग्नवित्तितद्धित्तिधारोपेयते येनानवस्था स्यात् किं तु काचिद्धीरनुव्यवसीयते शेषा तु सामान्यलक्षणया योगजधर्म्मेण वा ज्ञायते इति सर्वा ज्ञायते नवानवस्थेति प्रमाणादिसत्ता त्वया कथाङ्गत्वेनाभ्युपेता सा च स्वरूपसत्ता न तु बुद्धिसिद्धाऽतो न बाधमात्रपरिशेषः ॥

अथ यथा त्वन्मते घटादेस्तज्ज्ञानस्य च सत्ताविशेषेऽपि ज्ञानमेव व्यवहारकं तथा मन्मते तयोरसत्ताविशेषेऽप्यसदेव ज्ञानं व्यवहारकं व्यवहारोऽप्याविद्यक एवेति न सत्करणापेक्षी सर्वेषामेव प्रमेयाणां ब्रह्मविवर्तत्वादिति चेत्तर्हि व्यवहारो न साध्यते सर्वदा ऽसत्ताविशेषात् ।

यदि चालब्धात्मकः सलब्धात्मकी क्रियत इत्युच्यते तदा लब्धात्मकमेव पूर्वावधितयाऽपेक्ष्येत । असत एव पूर्वावधित्वे दण्डाद्यसत्त्वकालादपि घटादिः स्यादिति सर्वकार्याणामनादित्वापत्तिः । अथ यथा सामग्री आद्यक्षणे ऽसत्यपि तत्काले कार्यजन्म नियमयति तथा कारणमपि तत्काले ऽसत्तत्काले कार्यजन्म नियमयिष्यतीति चेन्न । भ्रान्तोऽसि । सामग्री हि तत्काले ऽसती यद्यपि

तथापि पूर्वक्षणे ऽसती तत्काले कार्यजन्म नियमयतु तथा स्वभावत्वेनैव सिद्धत्वात् असत् कारणम् सर्वदैवासिद्धम् निःस्वभावकम् तत्केनावष्टम्भेन नियमयिष्यति कूर्मरोमवन्निरूपाख्यत्वात् । ननु कारणत्वं तावत् सत्ताघटितं नियतप्राक्सत्त्वरूपत्वात्तस्य तथा च तत् सत्ताविशिष्टे धर्मिणि वर्तते तदविशिष्टे वा । नाद्यः आत्माश्रयात् एकस्या एव सत्ताया धर्मधर्म्युभयविशेषणत्वात् । न च प्रत्याश्रयं विभिन्नैव सत्ता सत्सदित्यनुगतव्यवहारस्याननुगताभिस्ताभिर्निर्वाहणासम्भवात् तत्सम्भवे वाननुगतानि स्वरूपाण्येव सदित्यनुगतव्यवहारकाणि भवन्तु कृतमननुगताभिः सत्ताभिरिति वृद्धिमिच्छतो मूलमपि नष्टमिति कारणमसदायातम् । द्वितीये तु सिद्धं नः समीहितम् । तदुक्तम् ।

अन्तर्भावितसत्त्वं चेत् कारणं तदसत्त्वतः ।
नान्तर्भावितसत्त्वं चेत् कारणं तदसत्त्वतः ॥ इति ।

मैवं नहि सर्वेषां कारणानां महासामान्यरूपा सत्ताऽस्माभिरुपेयते प्रतिबन्धकाभावादेरपि मया कारणत्वोपगमात् तथा च तामादाय विकल्प्य यत् खण्डनं तच्छलम् ॥

अथ स्वरूपसत्तामेव स्वकारणानां मन्यसे इति तामेवाहं विकल्पयामीति ब्रूषे तदपि न । स्वरूपसत्तया हि वस्तुत्वमनलीकत्वं प्रमाणगम्यत्वं वा तच्च धर्मिविशेषणम् स्वरूपसत एवोक्तरूपस्य मया नियतपूर्ववर्तित्वलक्षणकारणत्वोपगमात् इयं च स्वरूपसत्ता धर्मिण्यन्या कारणत्वे चान्येति क्वात्माश्रयः । न चैवं कारणतायामननुगमो दोषाय इष्टत्वात् कारणता हि विषयप्रतियोगिभेदेन भि-

नैव । ननु स्वरूपसदप्यसदेव घटो नेत्यादिधिया घटत्वा-सत्तयोः सामानाधिकरण्यानुभवादिति चेत् । घटो धर्मी कदाचित् स्वरूपसन् कदाचिच्चासन्निति ब्रूषे सर्वदैव संश्चा-संश्चेति वा । नाद्यः उभयोरपि दशायोस्तस्य त्वन्मते घटत्वम-विशिष्टमस्तीति उभयोरपि ततो घटार्थक्रिया तुल्यैव स्यात् तथा चासन्नित्यपि न स्यात् अर्थक्रियाकारित्वात् । नान्त्यः विरोधात् तर्हि घटो नास्तीत्यस्य कोऽर्थः घटस्याभावोऽस्तीत्येव हि न ह्यसत्ताविशिष्टे घटे किमपि प्रमाणं प्रसरति इन्द्रियसन्निकर्षव्याप्त्यादेस्तेन सहासम्भवात् । शब्दोऽप्ययं प्रमाणविरोधी उक्तपर एवेति घटतदसत्तयोश्च न धर्मधर्मिभावः नित्यविरोधेन द्वयोः सहासम्भवात् ॥

किं च निरुपधिर्विरोधोऽनयोः परस्परप्रतिक्षेपरूपत्वात् इति प्रतियोग्यनुयोगिभाव एवानयोः न तु धर्मधर्मिभावः । अत एव गोपाङ्गना अपि स्तेनशङ्कायां(१) प्रदीपमुपादाय तेनापवरकादौ(२) स्तेनासत्त्वमवेत्य निःशङ्कं शेरते स्तेनप्रतिक्षेपात् । स्तेनधर्मत्वे तु तदसत्त्वस्य तेन स्तेनाप्रतिक्षेपात् त्वमिव ता अपि कांदिशिकी भवेयुः । कथं तर्हि घटो नास्तीति समानाधिकरणप्रयोगः घटाभावे तस्यैव साधुत्वानुशासनात् यथा सूर्यस्याप्यद्रष्टृरि असूर्यम्पश्येति ।

ननु चासतो यदि घटत्वसत्ता तदा घटोऽभूत् भविष्यतीत्यादौ भूतभविष्यतोरिदानीमसतोर्घटयोः कथं सा । न कथञ्चित् न हीदानीं घटत्ववत्ता तयोः प्रतीयते किं तु स्वकाले घटत्ववतोस्तयोरिदानीं तत्कालस्पर्शेन कालास्पर्शेन वा तद्वत्तया प्रतीयमानयोरिदानीं प्रागभावप्रध्वंसौ परं प्रतीयेते अभावधियः प्रतियोगितावच्छेदकधर्मप्रकार-

(१) चौरशङ्कायामित्यर्थः । (२) आवृतदेशे ।

कप्रतियोगिधीसाध्यत्वनियमात् । नन्वयमभावः प्रत्यक्षो योग्यानुपलब्ध्या ग्राह्यः सा चेह नास्ति आहाररूपायाः प्रतियोग्युपलब्धेः सर्वत्र सत्त्वनियमादिति चेन्न । प्रतियोगिसत्त्वप्रसञ्जिताया उपलब्धेरभावस्य मयानुपलब्धित्वेनोपगमादिति दिक् ॥

अपि च बुद्धिसिद्धस्यापि स्वरूपासतः कारणत्वमनुपपन्नम् मानोरथिके वास्तवे च मोदकादिभक्षणे तृप्त्यादितौल्यं स्यात् । तदुक्तं स्थापकेन ।

आशामोदकतृप्ता ये ये चोपार्जितमोदकाः ।
रसवीर्यविपाकादि तुल्यं तेषां प्रसज्यते ॥

यत्तु मानोरथिकेनापि मोदकादिना तृप्त्यादिकमसद्रूपं जन्यत एवेति । तत्तुच्छम् । कारणाधीनं यस्योत्तरसमये स्वरूपं तस्यैव कार्यत्वात् अन्यथा वेमा घटस्य दण्डः पटस्य निगृहीतत्वं जयस्य सत्साधनप्रयोक्तृ भङ्गस्य कारणं स्यादिति सर्वं व्यत्यस्तमापद्येतेति साधुपाण्डित्यम् । न च जयभङ्गौ समयबन्धो नियमयिष्यतीति वाच्यम् । दृढीभूतं हि जयभङ्गकारणत्वं समयबन्ध आलम्बिष्यते तत्कारणत्वदृढिमैव तु न स्यादसतोऽपि कारणत्वात् तस्मात् कार्यपूर्वसमये नियमतः स्वरूपसत् कारणम् । तदुक्तमाचार्यैः । पूर्वभावो हि हेतुत्वमिति । त्वमप्यात्थ पूर्वसम्बन्धो हेतुत्वमिति । पूर्वसम्बन्धनियमश्च स्वरूपासतो न सम्भवति तस्मात् पूर्वसम्बन्धे हेतुत्वे तुल्यएव नौ । हेतुतत्त्वबहिर्भूतसत्त्वासत्त्वकथा वृथेति यत् त्वयोक्तम् तत् सर्वथैवानुपपन्नम् तथाहि नियमतः प्राक्समयसम्बन्धः कारणत्वम् स च खपुष्पादेः स्वरूपासतो न सम्भवति किं तु प्राक् स्वरूपसतः ईदृशो मत्पक्षः त्वत्पक्षोऽप्ययमेव तदा शान्तं विवादेन विप्लुतं च खण्डनेन ॥

अथ प्राक् कारणस्य स्वरूपसत्तां नाभ्युपैषि तदा नावयोः पक्षतौल्यमिति गाथापूर्वार्द्धमशुद्धम् । अपि च सत्त्वं यत्कारणत्वबहिर्भूतं ब्रूषे तत्तावत् स्वरूपसत्त्वं तदीयकारणत्वान्तर्भावस्य व्यवस्थापितत्वात् । अथ सत्ताजात्यभिप्रायेण ब्रूषे तदा व्यक्तम् निरनुयोज्यानुयोगस्तव । न हि वयं सत्ताजातिमपि कारणत्वनिर्वाहिकां ब्रूमहे विशेषादर्शनस्य भ्रमे दोषाभावस्य प्रामाण्ये विहिताकरणस्य प्रत्यवाये समवायस्य रूपादिप्रत्यक्षे मिथ्याज्ञानाद्यभावस्य मोक्षे अस्माभिः कारणत्वोपगमात् । अत एवाचार्या अप्याहुः । भावो यथा तथाभावः कारणं कार्यवन्मत इति । अथ यादृश्या धिया त्रिचतुरकक्षाविश्रान्तया सिद्धान्तिनः कारणस्य वस्तुसत्तावधारणं ममापि तादृश्यैव धिया तस्य कारणत्वावधारणं तदेतत् सांवृतं सत्त्वं किं तु सापि धीस्त्वन्मते स्वरूपसत्स्वेव न तु निरुपाख्येषु येन तेषामपि कारणत्वापत्तिः । मन्मते तु त्रिचतुरकक्षातस्तस्यापि बाध्यत्वावसायात् । मूलपर्यन्तं बाधावताराच्च कारणानां सत्तावधारणं इति चेत्तर्हि त एव पश्चिमाद्याधाच्च धीर्न वा तदधीनं कारणत्वावधारणम् न वा तत्सत्तावधारणमिति निरुपाख्यादविशेषः ॥

यत्तु संवृत्तिरपि सती व्यवहारयेत् असती वा । नाद्यः त्वयानभ्युपगमात् । नान्त्यः असत्त्वेनावधृतस्य कारणत्वोपगमात् इति नैयायिकदत्ते दोषे सा तावदिदानीं त्रिचतुरकक्षामात्रविश्रान्ता अविचारितसत्तासत्त्वैव व्यवहारयतीति ब्रूमः । अन्यथा प्रथमत एवैतादृशविचारावतारणे मतिकर्दमे व्यवहार एव न स्यात् । वस्तुतस्तु सा यदि सती तदा व्यवहारयितुं क्षमा यदि चासती तदापि तथैव । भ्रमविषयेणासता भ्रमे तथा भविष्यदादिविषयके ज्ञाने

ऽसतैव विषयेण तथा ऽसतैव कार्येण कारणशक्तेश्च विलक्षणव्यवहार इत्यस्य त्वयाप्यनुमतत्वादिति तन्न । उक्तक्रमेण तत्सत्त्वस्यैवावधारणात् न हि सम्भवति व्यवहाराय तामाश्रयते तस्याश्च सत्तासत्तयोरुदास्ते इति । दृष्टान्ताश्चायुक्ताः । तथाहि भ्रमस्तावदसद्वैशिष्ट्यावगाहितया व्यधिकरणप्रकारकतया वा विलक्षणव्यवहारविषयः क्रियते तच्च द्वयं तत्रास्त्येव एवं भविष्यदादिना घटादिना समं ज्ञानस्य विषयविषयिभावः सम्बन्धोऽस्त्येव तद्विषयत्वमेव च तस्य विलक्षणव्यवहारे हेतुः । असत्तु कार्यं कारणस्योपलक्षणमिति तदेवं खण्डनकारेण सर्वशून्यतावष्टम्भेन यदादिष्टम् तत् प्रत्यादिष्टमेव ।

अथेदानीं तत्रानुशयानेन तेन वेदान्तमतमाश्रीयते तथाहि सर्वशून्यता सिद्धा न वा अन्त्ये पूर्णतैव आद्येपि स्वतः परतो वा तत्राद्ये स्वप्रकाशत्वेन ज्ञानमस्त्येव परतः पक्षे तु परपदवाच्यम् प्रमाणमस्तीति सर्वथा न शून्यतास्तीति तस्मात् ज्ञानं परिशिष्यते तच्च स्वप्रकाशं तथाहि ज्ञानस्य ज्ञानान्तरवेद्यत्वे ऽनवस्थानात् स्ववेद्यतैव । ननु किं ज्ञानवेदनेन ज्ञानस्य स्वरूपसत्तयैवार्थव्यवहारसिद्धेरिति चेन्न । स्वरूपसत्तायां विप्रतिपत्तौ तद्वेदनस्याप्यवश्यानुसर्तव्यत्वात् । एवं तत्तद्वेदनेष्वपि इत्यनवस्थैव चरमवेदनस्यावेदने तस्य मानाभावेनासत्त्वे ऽर्थपर्यन्तमसत्त्वं वा स्यात् । तदुक्तम् । अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यति इति । अथ सर्वा वित्तिरवश्यवेद्यैव प्रमेयत्वस्य केवलान्वयित्वात् । अविरललग्ना तु वित्तितद्वित्तिधारा नाभ्युपेयते तथाननुभवात् । किं तु काचित्तदैव काचिदन्यदा काचित् प्रत्यक्षेण काचिच्च लिङ्गादिना प्रतीयते इति ब्रूम इति चेन्न । प्रथमा अर्थग्राहिणी व्यवसायात्मिका

द्वितीया अर्थावरुद्धज्ञानग्राहिणी अनुव्यवसायात्मिका घटज्ञानमिति तृतीया अर्थावरुद्धज्ञानावरुद्धात्मग्राहिणी घटं जानामीति। इतोऽधिका धीधारा त्वन्मतेऽपि नानुभूयते। अन्यथा घटं जानामीति जानामीत्याद्याकारा धीः कदाचित् केनचित् अनुभूयेत। तस्याः सविषयतत्तद्धीविषयकत्वनियमे घटपर्यन्तावगाहनावश्यकत्वात्। किं च चरमा धीर्न चरमसमानाधिकरणज्ञानग्राह्या अनिर्मोक्षापत्तेः। नापि व्यधिकरणज्ञानग्राह्या प्रमाणाभावात्। नापि चरमा स्वग्राहिका स्वप्रकाशापत्तेः। नाप्यग्राह्या मूलपर्यन्तं विलोपापत्तेः। नाप्युपान्त्यया ऽन्त्याया ग्रहः स्वविषयकतद्ग्रहे स्वप्रकाशापत्तेः। न च सामग्र्यनवस्थावज्ज्ञानानवस्था तस्याः प्रामाणिकत्वात्। अत्राहुः। ज्ञानस्यावश्यवेद्यत्वेऽपि नानवस्था ज्ञानं प्रमेयमित्यादिव्याप्तिज्ञानस्य तथा एतदनुव्यवसायस्यैतद्विषयभूतस्वग्राहकस्य तथा योगजधर्मज्ञानस्य तथा भगवत्प्रत्यक्षस्य च मयापि स्वप्रकाशत्वोपगमात्। अथ घटोऽयमित्यादिस्थले ज्ञानतज्ज्ञानधारा स्यात् ज्ञानस्य जातसम्बद्धत्वात् अपेक्षणीयान्तरस्य चाभावादिति चेत्। अत्राप्युत्कटविषयान्तराकर्षणेन मनसः प्रतिबन्धसम्भवात्। यत्र नोत्कटो विषयोपरागो न वा सुखदुःखरागद्वेषादिसामग्री तत्र धीतद्धीधारास्त्विति चेत्। बाढं तर्हि तत्र विषयशतभारमन्थराशेषा धीरवसीयेतेति चेत्। बाढं तत्र हि मूलविषये घटत्वे मध्यमानि परःशतान्यपि ज्ञानानि ज्ञानत्वेन आत्मा ज्ञानवत्त्वेन प्रतीयते तेन शेषापि धीर्घटं जानामीत्याकारिकैव॥

अथ या धीर्घटविषया सा च न वर्तमाना या च वर्तमाना सा न घटविषया तथा च कथमत्र घटं जानामीति

धीरस्त्विति चेन्न । अस्या अपि परम्परया घटविषयकत्वात् । वीणायां शब्द इतिवत् समयसौक्ष्म्याच्च वर्तमानत्वधीः । अथ ज्ञाने उत्पन्ने सति न तस्याज्ञानसंशयविपर्यया इति तस्य प्रमा तावदावश्यकी । सा चैवंरूपेऽपि सुखादौ भवतु भिन्ना तस्यां प्रकाशत्वात् । ज्ञाने तु प्रथमज्ञानाभिन्नैव तद्भेदकल्पनेऽनिर्मोक्षापत्तेः । ज्ञानस्य ज्ञानकर्मत्वे घटवज्ज-डत्वापत्तिरिति चेन्न । न हि सर्वं ज्ञानं समानकालीनस-मानाधिकरणसाक्षात्कारविषयतानियतं ब्रूमो येन मान-सानुव्यवसायधारया निर्मोक्षो न स्यात् । किं तु किञ्चि-ज्ज्ञानं व्यवहारेण किञ्चिल्लिङ्गान्तरेण किञ्चिन्मानसानु-व्यवसायेन किञ्चित्सामान्यलक्षणया किञ्चिद् योगजध-र्मलक्षणया च प्रत्यासत्त्या अवसीयत इति न किञ्चिदपि ज्ञानमवेद्यमिति ब्रूमः । नापि जडत्वापत्तिरप्रयोजकत्वात् ॥

ननु चार्थो ज्ञानप्रकाशाधीनप्रकाशत्वाज्ज्ञाने प्रकाश-मान एव प्रकाशिष्यते । तथा च सिद्धं ज्ञानस्य स्वप्रकाशत्वं ज्ञानार्थयोः प्रकाशद्वयस्यैकदानुदयादिति चेत् । किमिदं तदधीनत्वम् । न तावत्तद्धेतुकत्वम् । न हि ज्ञानप्रकाशहेतुको-ऽर्थप्रकाशः । तथा चासिद्धिः स्वप्रकाशत्वे साध्ये विरुद्धता च । न हि तद्धेतुकस्तदभिन्नो भवति । नापि तद्व्याप्यत्वं अभेदेऽसम्भवात् । नापि तदभिन्नत्वं साध्याविशेषात् ॥

यत्तु घटादीनां तावज्जडत्वं ज्ञानकर्मत्वं स्वव्यवहारे परापेक्षत्वं वास्ति तत्तावत् न निर्बीजम् । नापि यत्कि-ञ्चिद्बीजम् । नाप्यनियतबीजम् । अतिप्रसङ्गात् । तस्मात् नियतकिञ्चिद्बीजं वाच्यम् । तच्च परिशेषादस्वप्रकाशत्व-मिति ज्ञाने जडत्वाद्यभावात् स्वप्रकाशत्वमिति । तन्न । जडत्वं हि प्रकाशान्यत्वम् । तच्च प्रकाशसामग्र्यजन्यत्वरूपं

निबन्धनं तज्जन्यत्वे प्रकाशत्वापत्तेः । ज्ञानकर्मत्वं हि ज्ञानविषयत्वम् । तच्च वस्तुत्वनिबन्धनं स्वव्यवहारे परापेक्षत्वमपि अस्वप्रकाशत्वनिबन्धनमेव । ज्ञानचतुष्टयभिन्नानि तज्ज्ञानानि जडानि च सर्वाणि स्वव्यवहारे परापेक्षाण्येव अस्वप्रकाशत्वादिति ॥

ननु ज्ञानं जिज्ञासावेद्यं न वा । आद्ये जिज्ञासापि हि सामान्यज्ञानपूर्विकेति जिज्ञासातः प्राक् ज्ञानस्य सामान्यज्ञानमायातम् । तदपि च जिज्ञासातः स्यात् ज्ञातस्यात् तज्जनन्यपि जिज्ञासा सामान्यज्ञानादिति जिज्ञासाज्ञानयोर्द्वारा द्वयमनिर्वृत्तमापद्येत । न वा पक्षेऽप्यवेद्यं वा स्यात् अजिज्ञासावेद्यं वा । अत्राद्ये ज्ञानव्यवहृतिर्न स्यात् ग्रहणाभावात् । ज्ञाततयापि न ज्ञानग्रहः ज्ञानाबोधे तस्या अबोधात् तस्या ज्ञानोपहितशरीरत्वात् । सा हि न चक्षुःपातमात्रवेद्या । नापि व्यवहारानुमेयं ज्ञानं व्यवहारेण ज्ञानोपस्थितौ व्याप्तिग्रहो गृहीतव्याप्तिकाच्च व्यवहारात् ज्ञानोपस्थितिरित्यन्योन्याश्रयात् । अजिज्ञासावेद्यत्वे चानिर्मोक्षो ज्ञानमनःप्रत्यासत्तेः सर्वदा सत्त्वादिति परिशेषादपि ज्ञानं स्वप्रकाशमिति । उच्यते । आत्ममनःसंयोगस्य यदेन्द्रियार्थसन्निकर्षः सहायीभवति तदा बाह्यार्थानुभवः । स एव सहायो यदा स्थिरस्तदा धारावाहिकानुभवः । यदा च संस्कारपरिपाकस्य स सहायः तदा प्रत्यभिज्ञा । यदा तु तत्सहायरहितः संस्कारपरिपाकः तदा स्मृतिः । यदा तु संस्कारपरिपाकेन्द्रियार्थसन्निकर्षरहित आरब्धज्ञान आत्ममनःसंयोगः तदानुव्यवसाय इत्युत्सर्गः । यदा त्वस्मिन् सत्यप्युत्कटविषयेन्द्रियसन्निकर्षः तदा तदर्थज्ञानम् । न तु ज्ञानज्ञानमित्यलमति-

विस्तरेण । तस्मादजिज्ञासावेद्यत्वे ऽपि ज्ञानस्य प्रबलविषयमहिम्ना धाराया निवारणात् । प्राबल्ये च फलमेव प्रमाणम् । किञ्चोक्तगत्यापि ज्ञानस्यैव स्वप्रकाशत्वसम्भावनापि । न तु ब्रह्माभिन्नस्य नित्यचैतन्यस्य तस्य घटाद्यनालम्बनत्वात् आसंसारमप्रतीयमानत्वाच्चेति व्यर्थस्ते स्वप्रकाशतासाधनश्रमः । किञ्च प्रकाशस्य स्वधर्मावरुद्धस्यैव प्रकाशमानस्य स्वप्रकाशत्वसिद्धेर्नाद्वैतसिद्धिः । धर्मानवरुद्धस्य तु तस्य स्वप्रकाशत्वेन भाने धर्मापग्रहप्रवर्तिष्णुशब्दविषयता तस्याविद्यादशायामपि न स्यात् । अथ शब्दान्तरं तावद् ब्रह्मणि न प्रवर्तते । किं तूपनिषत् । सापि न कण्ठतस्तदाह येन प्रकारतया धर्ममपेक्षेत् । किं तु विषं भुङ्क्ष्वेत्यस्य एकादश्यभोजने यथा तात्पर्यं तद्वत् प्रपञ्चनिषेधश्रुतेरपि ब्रह्माद्वैतविधौ तात्पर्यम् । तथा च ब्रह्माद्वैतमेव तच्छ्रुतेरर्थः यत्परः शब्दः स शब्दार्थ इति न्यायादिति चेन्न । न हि तात्पर्यमात्रं सामग्री कारणान्तरविलोपापत्तेः । नाप्युपलक्षणन्यायाच्छ्रुत्या ब्रह्मधीः काकपदोपस्थापितकाकस्मारितोत्तृणत्वादिविशिष्टगृहविशेषधीवत् श्रुतितो ब्रह्मधियोऽनुदयात् ॥

अथाविद्यादशायां श्रुतितोऽपि तद्धीः । तथाहि नित्येन तावदध्ययनविधिनाधीतस्वाध्यायो मुमुक्षुरापाततो वेदान्तवाक्यं श्रुत्वावगच्छति यत् आत्मनस्तु कामाय सर्वं प्रियं भवतीत्युपक्रमोपनिषदात्मौपाधिकमितरेषां प्रियत्वं वदन्त्यात्मैव निरुपाधिप्रिय इति प्रतीते तत आत्मनि ज्ञाते सर्वमिदं विज्ञातं भवतीत्युपसंहारेणानन्दात्मकस्यात्मनः सर्वाभिन्नत्वमिति प्रतीतेः । अथ एतावदरे खल्वमृतत्वमित्युपसंहारशेषादानन्दात्मकब्रह्माभेददर्शनस्यामृ-

तत्त्वसाधनत्वमवेत्य कथं तद्दर्शनं स्यादित्याकाङ्क्षायां आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति श्रुत्वा मुमुक्षुर्मीमांसते । न च तस्य मीमांसनाऽसम्भवः । अधीत्य स्नायादिति श्रुतेर्मन्त्रब्राह्मणाध्ययनवत् गृहस्थीभविष्यत्स्वकरिष्यमाणाग्निहोत्राद्यनुष्ठानसाधनीभूततत्तद्वाक्यार्थविचारमूलस्तम्भत्वेनावश्यकतया कर्ममीमांसाध्ययनस्यापि तदानीं सिद्धेः । एवं च मीमांसामेनां विचारेण मुमुक्षुर्विचारयति । न हि तावदेते चत्वारोऽपि विधयः आत्मदर्शनस्य निदिध्यासनविधिविहितक्रियानुष्ठानमात्रसाध्यतया पृथक्कृतिसाध्यत्वासम्भवेन पृथग्विधानायोगात् । नापि श्रवणमनननिदिध्यासनानि त्रीण्येव यथोक्तक्रमवन्ति प्रधानानि एकस्मै फलाय विधीयन्ते तेषां परस्परनिराकाङ्क्षतया समुच्चयायोगात् ॥

अथ य आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्य इति[१] छान्दोग्योपनिषदा आत्मज्ञानस्यैवेष्टसाधनत्वे गमिते ज्ञानस्य प्रकाराकाङ्क्षायामिष्टसाधनत्वमनूद्य द्रष्टव्यः श्रोतव्य इत्यादिविधयः प्रवर्तन्त इति चेन्मैवम् । एवमपि द्रष्टव्य इत्यस्यानर्थक्यादेव । न च सोऽनुवादः । न हि तस्येष्टसाधनत्वानुवादेनात्र किञ्चित्प्रयोजनम् प्रतिपत्तिचतुष्टयस्य तुल्यवदुपस्थितेः । तस्मात् पूर्वोक्तेनोपक्रमोपसंहारसंस्कृतवेदवाक्येनात्मदर्शनस्यावगतम् अपवर्गेष्टसाधनत्वम् आत्मा द्रष्टव्य इत्येकदेशेनानूद्य तदर्थितया श्रवणमङ्गि विधीयते लाघवात् । तत्फ-

(१) श्रुतिरियं छान्दोग्योपनिषदि अष्टमप्रपाठके दृश्यते ।

लीभूते चात्माद्वैतज्ञाने कुतर्काभ्यामदूषितान्तःकरणतया
भेददृशामश्रद्धामलक्षालनरूपायोपकाराय मन्तव्य इत्यत्र
मननं श्रवणाङ्गतया विधीयते मलक्षालने ऽपि सत्यात्मप्रका-
शिकाया उपनिषदो निदिध्यासनरूपेणान्तरव्यापारेण ना-
त्माद्वैतसाक्षात्कारफलपर्यवसानमिति दात्रस्य पांसुरक्ष-
णवत् शब्दस्य निदिध्यासनमपरमङ्गं विधीयते । तथा च
मनननिदिध्यासनाभ्यामङ्गाभ्यां उपहृतानि ब्रह्माद्वैतवा-
क्यानि मुक्तिहेतुभूतब्रह्माद्वैतसाक्षात्कारं फलन्तीति । श-
ब्दश्च आत्मसाक्षात्कारे ऽस्मिन् करणम् असाधारणत्वात् ।
यदेव यस्यां बुद्धावसाधारणं तदेव तस्याः करणमिति मत्-
सिद्धान्तात्[1] । अद्वैतप्रकाशिकास्तु उपनिषदः ऋग्वेदे
प्रज्ञानं ब्रह्मेति । यजुर्वेदे अहं ब्रह्मास्मीति । तत्रैव बृह-
दारण्यके एष त आत्मान्तर्याम्यमृतः । तत्रैव तैत्तिरी-
ये स यश्चायं पुरुषे यश्चासावादित्ये स एक इत्यादि ।
सामवेदे तत्त्वमसीति । अथर्ववेदे अयमात्मा ब्रह्मेति ।
एतानि तावन्महावाक्यानि । अत्र प्रथमवाक्ये प्रज्ञानपदे-
नैकादशेन्द्रियाधिष्ठातरि द्वितीयवाक्ये चाहमा जीवे चतु-
र्थवाक्ये ऽपीदमा स्वप्रकाशे जीव उक्ते सर्वत्र तस्य ब्रह्माभे-
दो ऽनुभाव्यते । तृतीयवेदवाक्ये तु तत्पदस्य वाच्यं यतो
वा इमानि भूतानि जायन्ते सदेव सौम्येदमग्र आसीत्
तमो वा इदमेकमेवाग्र आसीत् नासदासीन्नो सदासीत्त-
दानीं नासीद्रजो व्योमापरो यत् किमावरीवः कुहकस्य
शर्मन्नम्भः किमासीत् गहनं गभीरं न मृत्युरासीत् अमृतं
न तर्हि न रात्र्या अह्न आसीत् प्रकेतः आनीतवातं सुधया
तदेकं तस्माद्धान्यं न परः किञ्च नासत्तम आसीत् तमसा

(१) व्यापारवदसाधारणं कारणं करणमिति लक्षणमनुमितिग्रन्थे
दृश्यते ।

गूढमग्रे प्रकेतं सलिलं सर्वमा इदं तुच्छेनास्त्वपिहितं यदासीत्तपसस्तन्महिना जायतैकम् । तदैक्षत बहुस्यां प्रजायेयेत्यादिवाक्यार्थीभूतमनाद्यविद्यामायाश्रयो जगदुत्पत्तिस्थितिनिरोधकारणं सच्चिदानन्दैकरसं ब्रह्म । तत्पदस्य लक्ष्यं तु सत्यं ज्ञानमनन्तं ब्रह्म। ब्रह्मैवेदममृतं पुरस्ताद् ब्रह्मक्षिणतः पश्चाच्चोत्तरेणाधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठमित्याद्युपनिषद्भिः(१) प्रतीतं नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दाद्वयं ब्रह्म । त्वं पदस्य शक्यं तु देहेन्द्रियमनोबुद्धिप्राणाहङ्कारैः कृशस्थूलादिदेहधर्मैर्मूकत्वादीन्द्रियधर्मैः कामादिभिरन्तःकरणधर्मैः अस्तित्वोत्पत्तिविवृद्धिपरिणत्यपक्षयविनाशैः षड्भिर्भावविकारैः अशनायापिपासाशोकजरामरणैः षड्भिरूर्मिभिः त्वगसृग्रुधिरमांसमेदोऽस्थिमज्जात्मकैः षड्भिः कोशैरुपेत आध्यात्मिकाधिदैविकाभौतिकेन तापत्रयेणाभिभूतः स्वर्गनरकाद्यनुभवी प्रत्यगात्मा । लक्ष्यं तु योऽयं विज्ञानमयो हृद्यन्तर्ज्योतिः पुरुष इत्यादिवाक्यैर्निरूपितो देहादिविलक्षणस्तत्साक्षीति ॥

अत्र च जहदजहत्स्वार्थलक्षणया तत्त्वविरुद्धमाविद्यकं देहादिसम्भेदमपास्य त्वं पदार्थैकदेशं प्रत्यगात्मानमन्तर्ज्योतिरादिरूपं तत्पदार्थीभूतब्रह्माभिन्नतयाऽसिपदेनानुभाव्यते । लक्षणा च तात्पर्यमात्रम् । एतादृशमेव वाक्यार्थज्ञानमौपदेशिकं तत्त्वज्ञानं श्रोतव्य इत्यादिविधिविषयीभूतमिति। एवं च आत्मातिरिक्ते प्रकाशासम्बन्धेन निरस्ते प्रत्यगात्मनि च परमात्माभिन्नतया श्रुत्या तात्पर्यतोऽविद्यादशायामनुभाविते सिद्धं ब्रह्माद्वैतमिति वदन्ति ॥

(१) श्रुतिरेषा मुण्डकोपनिषदि द्वितीयमुण्डके दृश्यते ।

तत्रोच्यते । शब्दो न साक्षात्कारकारणम् चक्षुषा साक्षात्करोमीतिवत् शब्देन साक्षात्करोमीत्यनवगतेः । किञ्चात्मा वा अरे द्रष्टव्य इत्याद्युपक्रम्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितं भवतीति शतपथे श्रवणात्तुल्यवत्प्रतिपत्तिचतुष्टयावगतेर्नाङ्गाङ्गिभावः । हन्तैवमात्मज्ञानेन सर्वं विदितं भवतीति शतपथादप्यात्माभिन्नं सर्वं सिद्ध्येदिति चेन्न । सर्वस्याविद्यकतयात्मनश्च तात्त्विकत्वेन तयोरभेदासम्भवात् किं तु तज्ज्ञानं स्तूयते । अपि च नित्यानित्यवस्तुविवेके शमादिमुमुक्षाभोगवैराग्यैर्ब्रह्मविचारेऽधिकार इत्यात्थ । अत्राद्यो न तावद् ब्रह्मविचारादेव अन्योन्याश्रयात् । नापि न्यायात् ब्रह्मविचारस्य न्यायपूर्वकत्वनियमापत्तेः । न चेष्टापत्तिरपसिद्धान्तात् । किञ्च श्रुतिजन्या ब्रह्माद्वैतविषया धीर्न तावद् ब्रह्माभिन्ना अजन्यत्वापत्तेः । नापि ब्रह्मभिन्ना परप्रकाशापत्तेः । तद्भेदाभ्यां न सा निर्वक्तुं शक्यत इति चेत् । सोऽयं पुंसोऽपराधो न तु वस्तुनः । वस्त्वेव तत्तथेति चेत् । अहो मोहो येन प्रमाणगोचरस्यावस्तुत्वं तदगोचरस्य तु वस्तुत्वमङ्गीकार्यसे नूनं गगनारविन्दादिकमपि वस्तु मंस्यसे । किञ्च सर्वशून्यतानगरं विज्ञाननगरं वा प्रविश स्वीकुरु वा पारमार्थिकीं प्रमाणगम्यतामिति । अपि च स्वप्रकाशत्ववत् स्वात्मिकाया लौकिक्याः प्रकाशक्रियायाः कर्मत्वं वाच्यम् । तच्च न । अभेदे क्रियाकर्मभावानुपपत्तेः । अलौकिकधीचतुष्के त्वगतिः समाधिः ॥

अथ किमिदं कर्मत्वम् । न तावत्क्रियाफलशालित्वम् । गमनक्रियाफलीभूतग्रामसंयोगशालिनो ग्रामस्येव चैत्रस्यापि कर्मतापत्तेः । किं तु परसमवेतेति क्रियाविशेष-

णम् । ननु परत्वं न तावत् कर्मत्व आत्माश्रयापत्तेः । नापि फलाश्रयतः कर्तुरपि संयोगविभागरूपफलाश्रयत्वादिति चेन्न । तत्क्रियानधिकरणत्वे सति तत्क्रियाफलशालिनः कर्मत्वात् । हन्त तर्हि वृक्षात् पतति पत्रे ऽपादानीभूतस्यापि वृक्षस्य पत्रनिष्ठस्पन्दक्रियाजन्यविभागरूपफलाश्रयतया कर्मतापि स्यात् । तथा च वृक्षं पत्रं पततीति स्यात् । न स्यात् धात्वर्थतावच्छेदकत्वेन फलविशेषणात् । पूर्वविभागस्तु न पतिधात्वर्थतावच्छेदक इति न तरुः पतेः कर्म । अत एव पत्रस्पन्दक्रिया यदा त्यजिनोच्यते तदा वृक्षः कर्मैव पूर्वविभागस्यैव त्यजिधात्वर्थतावच्छेदकत्वात् । यद्यपि यमेव स्पन्दं त्यजिराह तमेव पतिरपि । तथा च त्यजेरेव प्रयोगे तरुः कर्म न तु पतेरपि शब्दशक्तिवैचित्र्यात् । तथा च विशिष्टस्यैव तत्तद्धात्वर्थतावच्छेदकफलशालित्वम् तत्तद्धातुप्रयोगे तत्तत्कारकस्य कर्मत्वमित्यननुगतमेव कस्याः क्रियायाः किं कर्मेति विशिष्यैवाकाङ्क्षोदयात् । नन्वेवं नदी वर्धत इत्यत्र वृद्धिरवयवोपचयरूपा धात्वर्थः । तत्फलं त्वप्राप्तदेशप्राप्तिः । तच्च तीरनिष्ठमतस्तीरं कर्म स्यात् । एवं पतेः स्पन्दविशेषोऽर्थः । तत्फलं त्वधःसंयोगः । स चाधो निष्ठ इत्यधः कर्म स्यात् । तेन नदीतीरं वर्धत इति भूतलं पत्रं पततीति च प्रयोगः स्यादिति चेदत्र प्राञ्चः । अप्राप्तदेशप्राप्त्युपहितावयवोपचयस्य विशिष्टस्यैव वृद्धिधात्वर्थत्वम् । तथाऽधःसंयोगावच्छिन्नस्पन्दस्य पत्यर्थत्वमिति तीराधःपदार्थयोरुक्तसंयोगविशेषवतोर्धातुभ्यामेवोपस्थितिरिति न तत्र कर्मविभक्तिराकाङ्क्षाविरहात् । तदुक्तम् ।

धातोरर्थान्तरे वृत्तौ धात्वर्थेनोपसंग्रहात् ।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥ इति ।

संगच्छते इत्यादौ धातोरर्थान्तरे वृत्तिः । वर्धते पततीत्यादौ धात्वर्थेनोपसंग्रहः । माघे माघे व्रजाम्यहमिति काञ्चनमालिनीवाक्ये प्रयागमिति । प्रसिद्धेरविवक्षातो यथा । गच्छ गच्छसि चेत् कान्तेत्यादावित्याहुः ॥

नव्यास्तु वृधेर्व्यापारोऽर्थः अवयवोपचयः फलं तदवच्छेदकमिति न तीरं कर्म तादृशफलभागित्वाभावात् । पतेस्त्वधः कर्मैव धात्वर्थोपलक्षणीभूततत्फलरूपसंयोगाश्रयत्वात् । कर्मविभक्तिरपि तत्र । अत एव ।

उद्धृत्य मेघैस्तत एव तोयमर्थं मुनीन्द्रैरिव संप्रणीताः ।
विलोकयामास हरिः पतन्तीर्नदीः स्मृतीर्वेदमिवाम्बुराशिं ॥

इति माघकाव्यमपि [1] ।

अत एव न अकर्मकधातुगणे लज्जासत्तास्थितिजागरण इत्यादौ पतेः पाठः द्वितीयाश्रितातीतपतितेत्यादिना नरकं पतित इत्यादौ समासश्च घटत इत्याहुः ॥

नन्वधस्तीरयोः कथं कर्मताशङ्कापि पतने वृद्धौ च कारकत्वाभावात् कारकविशेषस्य च कर्मत्वादिति चेद् भ्रान्तोऽसि । द्वितीयाप्रयोगो ह्यापाद्यते स चाकारकेऽपि प्रकृतक्रियाफलशालिनि यथा ग्रामादौ । कुत्र तर्हि कीदृशी द्वितीया व्रीहीन् प्रोक्षति घटं पश्यामीत्यादौ कर्मत्वे शाक्ती आत्मानं जानातीत्यादौ तु तत्र भाक्ती परत्वाभावात् । ग्रामं गच्छतीत्यादावपि तथा ग्रामादेस्तत्क्रियायामकारकत्वात् । एवं वह्निमनुमिनोमीत्यादावपीति । विस्तरस्तु तत्त्वालोके मयैवोक्त इतीहोपरम्यते ।

यत्तु स्वकर्मत्वं स्वप्रकाशत्वमुक्तदोषैर्माभूत् अस्तु स्वविषयत्वमेव स्वप्रकाशत्वम् । यद्वा स्वव्यवहारे ज्ञाना-

(१) माघकाव्यस्य तृतीयसर्गस्य पञ्चसप्ततिसंख्यकोऽयं श्लोकः ।

न्तरानपेक्षत्वमेव स्वप्रकाशत्वं स्वस्मिन् सत्येव स्वव्यवहारात्। अथ विषयविषयिभावो भेदे दृष्टस्तथा व्यवहारो व्यवहर्तव्यज्ञानादृदृष्टः। तथा च तदुभयं विनापि विषयविषयिभावस्य व्यवहारस्य चाङ्गीकारे दृष्टविरोधः स्यादिति चेन्न। यदि स्वप्रकाशो न स्यात् तदा ज्ञानमेव न सिद्ध्येत् परप्रकाशे ऽनवस्थानादित्यन्यथानुपपत्त्या दृष्टविरोधविधूननादिति। तन्न। परप्रकाशपक्षे ऽप्यनवस्थाया निरस्तत्वेनान्यथानुपपत्तेरनवतारात्। यत्तु स्वाविषयकेणाज्ञानेन स्वव्यवहारो जन्यत इति तन्न व्यवहारस्य व्यवहर्तव्यविषयकधीसाध्यतानियमात्। न ह्यजानन् न वान्यं जानन् अन्यद्व्यवहरति। सत्तायामपि सद्व्यवहारः सत्तावत्त्वधीजन्य एव। किं तु सा च तत्र भ्रान्तिर्बाधात्। एवं तद्गुणसंविज्ञानबहुव्रीहौ भुवादयः कुटादय इत्यादौ क्रियावाचित्वादिना गुणीभूतस्यापि भुवः कुटश्च धीश्चरेति क्वापि नाज्ञाते व्यवहारः॥

अथ सत्तासत्ताभ्यां विचारासहत्वाज्जगदेव शून्यमिति माध्यमिकः। चिद्व्यतिरिक्तमत एवैवमिति खाण्डनिकः। तथा च सूत्रम्। नासन्न सन्न सदसत्सदसतोर्वैधर्म्यादिति(१)। मैवम्। यैर्दोषैः प्रमेयजातं ग्रस्तनया विचारासहं ते दोषाः स्वकमपि ग्रसन्ति न वा। आद्ये क्व प्रमेयशून्यता तद्बीजभूतानां दोषाणामेव विलयात्। तथाप्यहमेव जयी मदुक्तदोषाणामेव प्रागल्भ्यादिति चेत्। धिङ्निस्त्रप व्याहतं ब्रुवाणोऽपि जैत्रतामिच्छसि। दूष्यदूषणसाध्यसाधनजयपराजयाः सर्वेऽप्यविद्याविल-

(१) सूत्रमिदं गौतमसूत्रस्य चतुर्थाध्याये प्रथमाह्निके ४८ संख्यायां वर्तते।

सिना एव मरुमरीचिकातोयवदिति चेत् । नूनमुन्मदिष्णुरसि यदेवं तत्त्वमवगच्छन्नपि निष्फले कथापथे प्रवर्तसे । न प्रवर्ते किं तु चिदात्मनि स्वप्रकाशे भरमवलम्ब्य सुखमास इति चेत् । तर्हि न त्वदुक्तदूषणानि मद्वाक्यस्पृंशि कथकानुक्तत्वादिति दूरमपसर । अन्त्ये तु दोषा एवावशिष्यन्त इति न सर्वशून्यतासिद्धिः । अथ तेषां सर्वेषां सत्त्वासत्त्वौदासीन्येन विचारं प्रवर्तयाम इति चेन्न । न हि तदाश्रयमाण इति सम्भवति केवलं वाङ्मनसाविसंवादजन्मा प्रलापोऽयमिति । यत्तु अद्वैते प्रमाणमुपन्यसिष्यंस्तदवताराय नैयायिकप्रश्नमद्वैते किं प्रमाणमित्येवं रूपं खण्डनकृद् वर्णयामास तेन जानीमः स न्यायनयस्य किं वदन्तीमपि नाश्रौषीत् । तथाहि न्यायनये सर्वत्र प्रमितस्यैव धर्मीकरणात् अद्वैतस्य च त्वन्मतस्य त्वन्मते गगनारविन्दायमानत्वात् व्यावृत्तत्वस्य केवलान्वयित्वोपगमात् । किञ्च नायं बुभुत्सोः प्रश्नः । किं तु जिगीषोः स चाचिक्षिपुस्तथा चाक्षेपयुक्तिं प्रत्यक्षबाधादिरूपां हृदि निधाय द्वैतनिषेधधिया किं करणमभिप्रैषीति प्रश्नः । तत्र च श्रुतिस्त्वदभिमतं करणं न घटते बाधादिति प्रष्टुर्भावः । तथा च त्वदुक्तं सर्वमेव प्रश्नखण्डनमलग्नकमिति ॥

अथेदानीमन्योन्याभावप्रतियोगित्वमत्यन्ताभावप्रतियोगि न वेति संशये सति विधिकोटिमद्वैतं साधयितुं खण्डनकृदेकमेवाद्वितीयम् नेह नानास्ति किञ्चनेति श्रुती तावदुदाजहार । तत्र च ब्रह्मेति प्रकृतम् । तेन यद्यपि ब्रह्मैकमेव द्वितीयं ब्रह्म नास्ति एवकारस्तत्राभेदं नियमयन् भेदाभेदं वारयति तथा अद्वितीयं ब्रह्मणि ब्रह्मप्रतियोगिकोऽन्योन्याभावो नास्तीत्यापाततो व्युत्पत्तिलभ्यो

ऽर्थः प्रतीयते। तथापि नात्र श्रुतेस्तात्पर्यम्। एवं कृत्वो-
ह्येयं गिरागिरेति ब्रूयादितिवदर्थवादत्वापत्तेः। किं तु श्रु-
त्यन्तरैकवाक्यत्वानुरोधादप्राप्ते शास्त्रमर्थवदित्यतश्चा-
द्वैते तत्तात्पर्यम्। न च घटपटादिभेदप्रत्यक्षबाधादिबला-
न्मुख्यमर्थमपास्य मुमुक्षुणा केवलात्मभावनानिष्ठेन भवि-
तव्यमित्यत्र श्रुतेस्तात्पर्यमिति वाच्यम्। भेदप्रत्यक्षस्य
घटपटादिविषयत्वेन श्रुतेश्चापाततस्तदविषयत्वेन विष-
यभेदेन बाधनायोगात्। क्रत्वङ्गीभूतहिंसाया विदिताया
रागप्राप्तहिंसानिषेधः श्रुत्यैवेति। तथा अद्वैतश्रुतिर्घटपटा-
दिप्रत्यक्षेण सह स्वजन्याभेदज्ञानस्य तथा घटेन पटेन
तद्भेदेन च सह तद्विषयकप्रत्यक्षाणामेवं तेषां प्रत्यक्षाणा-
मन्योन्यमभेदमवगाहताम्। न हि तेषामप्यन्योन्यं भेदः
घटपटभेदग्राहिणा प्रत्यक्षेण प्रागग्राहीति। तथा च न
श्रौतप्रत्यक्षेण श्रौतधीर्बाध्या स्वाभेदात् श्रुत्या तदभेदा-
लिङ्गनात् घटपटादीनां सर्वेषामेव भेदप्रत्यक्षालिङ्गिता-
नामप्यभेदोऽर्थात् सिध्यति। न हि सम्भवति घटाभिन्न-
ज्ञानाभिन्नं पटादि परस्परं भिन्नमिति। अथ तेषामपि
ज्ञानानां भेदः प्रत्यक्षेणालिङ्गनीयः। तदा तद्धियामभेदं
श्रुतिरवगाहताम् तावतैव मूलपर्यन्तमनुपपत्तेरभेद आया-
स्यति। न च प्रत्यक्षेण तद्भेदालिङ्गनमपि अनवस्थानात्
विषयान्तरसञ्चाराच्च। तथा च भेदधीर्यतो निवर्तते तदे-
वाश्रित्याभेदश्रुतिः प्रवृत्ता तदभेदं अर्थापत्तिसहकाराच्च
मूलपर्यन्तमभेदं साधयिष्यति। तस्मात्

सुदूरधावनश्रान्ता (१) बाधबुद्धिपरम्परा।
निवृत्तावद्वयाम्नायैः (२) पार्ष्णिग्राहैर्विजीयते॥

(१) अलसेति यावत्। (२ विनिवृत्ताऽद्वयाम्नायैरित्यपि पाठः खण्डने दृश्यते।

पार्ष्णिग्राहः पृष्ठस्थोऽरातिः । न च तुल्यन्यायतया भेदप्रत्यक्षेण चरमबुद्धेरप्यालिङ्गनम् । न हि तुल्यन्यायता सामान्यलक्षणादिवत् प्रमाणसहकारिणी येन व्यवहितातीतानागतानपि गमयेत ॥

अथ सर्वा बुद्धयः सर्वस्वविषयभिन्नाः बुद्धित्वादिति । न । सर्वतद्विषयावगाहने सार्वज्ञ्यापत्तेः अलौकिकप्रत्यक्षेषु व्यभिचाराच्च तेषु स्वस्यापि विषयत्वात् । अथ सर्वं भिन्नं प्रमेयत्वादिभ्य इति तदानुपसंहारस्वरूपासिद्ध्यादयः । न हि सर्वेषां पक्षीकृतानां स्वरूपं हेतुमत्तां वा किञ्चिज्ज्ञो वेद । अथ काचिदेव बुद्धिः पक्षः तद्धर्म एव च हेतुः तदा बुद्ध्यन्तरं द्वारीकृत्याद्वैतश्रुतिः प्रवेक्ष्यति । तथा च ।

हेत्वाद्यभावसार्वज्ञ्ये सर्वं पक्षयताऽऽस्थिते ।
किञ्चिच्च त्यजता दत्ता सैव द्वारद्वयश्रुतेः ॥

आस्थिते अङ्गीकृते । अथ घटपटौ भिन्नावित्यादिरूपया प्राथमिकधिया योऽनयोर्भेदो गृहीतः स एव बुद्धितद्बुद्धिधाराया अभेदे सति न निर्वहेत । न हि सम्भवति वस्त्वनेकम् तदभिन्नं तु तज्ज्ञानमेकमिति । तस्मादर्थभेदान्यथानुपपत्त्यैव धीधारायामपि भेद इति न तदभेदं श्रुतिराह बलवदर्थापत्तिविरोधादित्याशङ्क्य साप्यर्थापत्तिर्ज्ञाता भविष्यतीति तस्यास्तज्ज्ञानस्य चाभेदे श्रुतिः प्रवर्तिष्यत इति धीवेद्यभेदस्यान्यथानुपपत्तेस्तज्ज्ञानस्य चाभेदे श्रुतिः प्रवर्त्स्यतीत्यर्थः । अस्तु वा भेदप्रत्यक्षविषय एव घटादावभेदश्रुतिप्रवृत्तिः । योग्यताज्ञानं न शाब्दधीहेतुरङ्गुल्यग्रे करिशतमित्यादौ व्यभिचारात् । अस्तु वा तदपि । श्रौतधीश्चेयं प्रमैव श्रुतेरन्यत्रालब्धावकाशायाः प्रमाण-

त्वात्तद्विरोधेन भेदप्रत्यक्षस्यैवाप्रमाणत्वात् । अथ योग्यताया असंसर्गाग्रहादियमसंसर्गाग्रहरूपा । तथाप्यस्या असदसंसर्गाग्रहरूपत्वात् संसर्गसिद्धिः । न च प्रत्यक्षबाधं श्रुतिबाधेन परिहरतो वेदान्तिनोनौचित्यम् तदुद्भावितनिग्रहस्थानेनैवोद्भावितनिग्रहस्थानपरिहारस्य तत्त्वात् । तथा च तेन श्रुतेर्बाध इति वाच्यम् । श्रुतेः प्रमाणत्वात् तर्कस्य चाहार्यारोपरूपत्वात् । किञ्चानौचित्यात् तत् बाध्यते यस्य मूलं तया हूयते । प्रकृते तु नैवं अद्वैतश्रुत्यैव तर्कमूलव्याप्यव्यापकस्य भेदगर्भस्य खण्डनात् ॥

यत्तु प्रागन्तिमज्ञानतो भेदाग्रह उक्तः । तदयुक्तम् । तस्याप्युदाह्रियमाणतादशायां भेदग्रहणसम्भवादिति । तन्न । अन्तिमबुद्धेरिदानीं प्रत्यक्षेण ग्रहणासम्भवात् । न चानुमानेनानुपपत्त्या वा तद्ग्रहणम् अभेदाभिमानिनं वादिनं प्रति भेदधीमूलकयोस्तयोरप्रवृत्तेः । न च ममानुमानादितस्तद्भेदबुद्धौ मद्वचनाद्वादिनस्तत्र भेदसन्देहोऽप्यस्त्विति वाच्यम् । अभेदाभिमानिनः कोटिद्वैताभिमानेन निष्परिपन्थिश्रुतिरूपसाधकमानसत्त्वेन सन्देहस्याप्यनुदयात् । किञ्च परः किञ्चिद्वेत्तीति यत्रावगम्यते तत्र न तस्य घटादितो भेदो ग्राह्यः स्वरूपानवधारणात् । तथा चाभेदश्रुतिस्तत्रैव लब्धपदा तत्त्वाद्विश्वाभेदे पर्यवस्यति ॥

ननु कथं भेदानङ्गीकारे पदपदार्थवैचित्र्यव्यवहारः आविद्यकभेदोपगमात् । न च मयि व्याघातापादनमपि भेदाभावे आपादकस्यैवासिद्धेरिति खण्डनम् ॥

अत्रोच्यते । अभेदश्रुतिः प्रत्यक्षेण प्रतिरुध्यते । न च प्रत्यक्षश्रुत्योरविनिगमादुभयत्र प्रामाण्यसंशयः प्रत्यक्षस्य सकलप्रमाणोपजीव्यत्वेन भेदप्रत्यक्षस्योपजीव्यजातीयतया तेनैव श्रुतेर्बाधनात् ॥

ननु भवतु प्रत्यक्षमुपजीव्यम् । तथापि नेह नानास्ति किञ्चनेति श्रुतिस्तावदभेदबोधिका । अत्र किञ्चनेतिपदेनोपस्थिते सर्वत्रैवाभेदः श्रुत्या विधीयत इति नाभेदविधौ प्रत्यक्षोपजीवनमिति चेत् । तथापि किञ्चनेतिपदसमानविषयत्वादुपजीव्यत्वाच्च प्रत्यक्षं तां बाधेतैव । किञ्च यत्र भेदाभेदप्रत्ययौ परस्परस्पर्धिनौ तत्राप्यनन्यथासिद्धत्वाद्भेदधीस्तमेव अभेदधीस्तु तज्जातीयत्वमालम्बते ता एव चैत्रक्षपा इतिवत् । तथा च तद्वदत्रापि स्यात् । न च भेदधियो भ्रमत्वमपि सम्भवति भ्रान्तेरभ्रान्तिपूर्वकत्वात् त्वन्मते भेदस्यालीकत्वात् अलीकस्य च विधिनिषेधाङ्गीकारे उन्मत्तकेलिप्रसङ्गात् । अविवेकाद् बाधयतु वा श्रुतिरद्वैतम् । तथापि भेदप्रत्यक्षधिया तद् बाधनीयं ग्राहकस्य दौर्बल्यात् । पारमार्थिकत्वादद्वैतमबाध्यमिति चेन्न । असिद्धेः । न हि पारमार्थिकमबाध्यं दृष्टम् । लोके दृष्टमिति चेन्न । त्वन्मते लोके द्वयोरप्यदर्शनात् । एवं विषयान्तरे ऽपि गृहीते श्रुत्या नाभेदधीः तद्धियैवातादात्म्यग्राहिण्या स्वरूपभेदस्य गृहीतत्वात् । किञ्च विशिष्टबोधिकायां श्रुतौ विशेष्यमुद्दिश्य विशेषणं विधीयते । तथा चोद्देश्यत्वविधेयत्वलक्षणभेदावगतेरावश्यकत्वात् तयाप्युपजीव्यया श्रुतेर्बाधः । यच्च श्रुत्या भेदप्रत्यक्षास्पृष्टेनान्तिमज्ञानेन समं स्वजन्यज्ञानस्याभेदे ग्राहिते तदन्यथानुपपत्त्या मूलपर्यन्तमभेदः स्यादिति । तन्न । प्रत्यक्षेण घटादिभेदग्राहिणा श्रुतेरिवान्यथानुपपत्तेरपि बाधनात् विषयविरोधाविशेषात् । किञ्च तत्तद्विशेषरूपेण श्रुत्याऽभेदबोधने वाक्यभेदः स्यात् । न च श्रुतितो द्रागेव सर्वविषया अभेदधीरुदेति । मद्बुद्धिस्तु विचारजन्यत्वात्तस्याः

सर्वविषयत्वं गाहत इति इति चेन्न। घटपटयोर्भेदप्रत्यक्षेण तत्राभेदश्रुतेर्विघ्निततया द्राक् सर्वत्राभेदश्रुतेरप्रवृत्तेः। यच्च परः किञ्चद्रेत्तीत्याद्युक्तम्। तदप्ययुक्तम्। तन्मात्रे अर्थादावभेदग्रहे विरम्य व्यापारायोगः स्यात्। तत्रान्यत्र च द्रागेव सर्वत्र श्रुत्याऽभेदग्रहणे घटपटादिभेदप्रत्यक्षेण तत्र विघ्नः स्यात्। यच्चोक्तम् अन्तिमबुद्धौ श्रौतबुद्ध्या सममभेदधीरभेदश्रुतित आदावस्त्विति। तन्न। अन्तिमबुद्धावज्ञातायां न तावदभेदः श्रुत्या बोध्यते उद्देश्याज्ञाने विधानासम्भवात् विधायकशब्दस्य च तथैव सर्वत्र प्रवृत्तिदर्शनात्। नापि ज्ञातायाम् तेनैव ज्ञानेन तस्याः स्वरूपभेदस्य गृहीततया तत्राप्यभेदश्रुतेरप्रवृत्तेः। एतेन सुदूरधावनश्रान्तेति निरस्तम्। किञ्चाभेदे बोध्यबोधकसहकार्यसहकारिजन्यजनकवाच्यवाचकप्रतिपन्नाप्रतिपन्नभेदविरहात् कथमभेदं श्रुतिर्बोधयतु। अथाविद्यकाद्भेदात् सर्वमिदं घटते तर्हि तत एव त्वच्चनिष्टापादनमपि घटताम्। सर्वमिदमनिर्वचनीयमिति चेत्। अहो पाण्डित्यं निर्वचनात्मकश्रुतिप्रामाण्यमुपक्रम्यानिर्वचने पर्यवसानम्। वयं वैतण्डिकाः किमपि न साधयामः किं तु भेदं निषेधाम इति चेत्। अविद्यादशायां श्रुतिरद्वैते प्रमाणमिति धुष्यन् पुरुषायुषमनैषीरथेदानीं तत्र दोषदर्शनादन्यथा वर्णयन् स्वाशयमपि नावधारयितुं क्षमसे। किञ्चाभेदो यः साध्यः स भेदाभावो भेदविरोधी वा। उभयथापि भेदः पारमार्थिक आपद्येत। न ह्यवस्तुनो विरहो विरोधी वा वस्तु सन्निति घटते। किञ्च श्रुतिः प्रपञ्चब्रह्मणोऽभेदमाहेत्यप्ययुक्तम्। ब्रह्मैव तत्त्वं प्रपञ्चस्त्वतत्त्वमिति शङ्कराचार्यवचनविरोधात्। अत एव तयोर्भेदं निषेधतीत्यपि

न। एवं हि ब्रह्मणः प्रपञ्चाभिन्नतया जडत्वेन स्वप्रकाशचिदानन्दानात्मकत्वे तदर्थी मुमुक्षोः प्रवृत्तिरपि न स्यात्। तथा च श्रुतिः प्रपञ्चनिषेधपरेति वाच्यम्। तथा च क्व ब्रह्मप्रपञ्चयोरभेदगन्धोऽपि। अथ जीवपरमात्मनोरभेदं श्रुतिराह तत्त्वमसीत्याद्युक्तेरिति चेन्न प्रत्यक्षबाधात् परमात्मान्योन्याभावस्य प्रतिस्वं स्वात्मनि प्रत्यक्षत्वात् नाहं ज्ञानमितिवन्नाहं परमात्मेति प्रतीतेः। आत्मनि तत्तादात्म्यसत्त्वे तथोपलम्भापत्त्या तद्भेदस्य तत्राध्यक्षतोपगमात् प्रतियोगिसत्त्वविरोधिन्या एवानुपलब्धेर्योग्यानुपलब्धित्वात्। किञ्चाभेदश्रुत्या क्रमेणाभेदावगाहनमिति यदुक्तम्। तदप्ययुक्तम्। शब्दस्य विरम्य व्यापारायोगात्।

यत्त्वभेदश्रुत्या द्रागेव सर्वत्रैवाभेदधीर्जन्यते। न च घटादौ भेदप्रत्यक्षेण श्रुतिबाधनं वस्तुतः श्रुतेर्बलवत्त्वात्। तथा च श्रुतिर्निर्दोषत्वेन बलीयसी भेदप्रत्यक्षमेव प्रतिक्षिपेत्। तदुक्तम्।

पारमार्थिकमद्वैतं प्रविश्य शरणं श्रुतिः।
बाधनादुपजीव्येन न बिभेति मनागपि॥
एकं ब्रह्मास्त्रमादाय नान्यं गणयतः क्वचित्।
आस्ते न धीरवीरस्य भङ्गः सङ्गरकेलिषु॥ इति।

तन्न। एवं हि सर्वेषामेकदैवाभेदबोधने बोद्धुः सार्वज्ञ्यं स्यात्। तच्च न मन्यसे। अन्यथा सामान्यप्रत्यासत्त्योपस्थितानां सर्वेषामेकदैव भेदे प्रत्यक्षेणावगते श्रुतिर्निरवकाशैव स्यात्। श्रुतेर्बलवत्त्वं च विचार्यमेवास्ति। किञ्च बोद्धुर्बाधावधारणमेव शाब्दधीविरोधि न तु याथार्थ्यमपि। तच्चात्रास्त्येव। न च भेदप्रत्यक्षस्यान्यथासिद्धि-

सम्भावनया दौर्बल्यम् श्रुतेरप्यन्यपरत्वसम्भावनया तत्सम्भवात् । न चैवं श्रुतिप्रत्यक्षयोर्बलाबलसन्देह एवास्त्विति वाच्यम् श्रुतेः सहकारिविरहादिना दौर्बल्यात् ।

नन्वेतत्सर्वमविद्याविजृम्भेन मयोक्तम् । वस्तुतस्तु परमात्मभिन्नं न किञ्चित्तत्त्वम् । एवं च श्रुतिश्चाविद्या च जगच्च सर्वमाविद्यकं विचारासहत्वात् । ब्रह्मैवैकं तत्त्वम् । तच्च स्वप्रकाशचिद्रूपत्वान्मेयमातृप्रमामानभेदशून्यमवाङ्मनसगोचरत्वाच्च न विचारगोचरोऽपीति चेत् । नूनं मत्तः सञ्ज्ञाशून्योऽसि यद्ब्रह्मणो वचनागोचरत्वं वचनेनैव प्रतिपादयसि । इदमप्याविद्यकमिति चेत् । यत्र प्रमाणानि प्रसरन्ति तन्न वस्तु यत्र तु न प्रसरन्ति तदेव वस्त्विति महती दुष्प्रत्याशा । तस्माज्जगत्कर्तारं ब्रह्मपदार्थमवेहि । तत्र च कार्यायोजनादि प्रमाणं जानीहि अभेदश्रुतीर्भावनापरत्वेन विद्धि विरम जगद्भेदाभिमानादित्यलमतिविस्तरेणेति । किञ्च केयमविद्या किंनिष्ठा कतिविधा चेति । तत्र परमात्मन्येका जीवेषु प्रतिस्वमपरेति टीका । तन्न । अविद्यावशेन हि जीवे ब्रह्मतो भिन्ने सत्यविद्या तमाश्रयेत । अविद्याश्रयणेन च स ब्रह्मतो भिन्नः स्यादित्यन्योन्याश्रयात्(१) । न चात्रानादितापरिहारो व्यक्तिभेदे हि स स्यात् बीजाङ्कुरवत् । अत्र तु न तथा । न हि जीवा अपि उद्यन्ते व्ययन्ते चेति । येन व्यक्तिभेदः स्यात् ॥

एतेन जन्मप्रवृत्तिदोषमिथ्याज्ञानानामप्यन्योन्याश्रयचक्रकप्रतिबन्धिरपास्ता । आत्माश्रयानवस्थयोर्हि प्रामाणिकत्वं परिहारः । तच्चानवस्थायां व्यक्तिभेदादेव सम्भवति आत्माश्रये व्यक्त्यभेदादेव । अन्योन्याश्रयच-

(१) तदपेक्ष्यापेक्षित्वनिबन्धनोऽनिष्टप्रसङ्गोऽन्योन्याश्रयः ।

ऋकयोस्तु व्यक्तिभेद एव परिहारः । यथा जन्मप्रवृत्त्योः जन्मप्रवृत्तिदोषमिथ्याज्ञानानां चेति । तद्वन्नात्र व्यक्तिभेदोऽस्ति । परस्परापेक्षि च व्यक्तिद्वयं न सम्भवति कारणाभावादिति ॥

अथास्तु विवरणमतम् । तथाहि अविद्या हि ब्रह्ममात्राश्रिता एकैव । सा च ब्रह्मवदनादिरेव । ब्रह्मण्येव च स्थिता जीवानावृणोति । तथा च तयाऽवृता जीवा ब्रह्मणो भिन्नत्वेन बहुत्वेन चकासति । यदा तु तामावरिकां योगसमाधिमर्यादया जीवो व्यतिक्रामति तदा जीवन्मुक्त इत्युच्यते । यदा तु सर्वे तदा सर्वे जीवा ब्रह्मणि लीयन्ते अविद्या च व्येति कर्तव्याभावात् ब्रह्मैव निर्विकारमवतिष्ठत इत्येकदैव सर्वमुक्तिरिति । तन्न । सा ह्यविद्या ब्रह्माश्रिता ब्रह्मतो भिन्ना वास्तवी चेत्तदा द्वैतं स्यात् । ब्रह्माभिन्ना चेत्तदा तद्वयानुपपत्तिरपसिद्धान्तश्च । साप्याविद्यकी चेत्तदा तस्या अविद्यान्तरप्रभवत्वे अविद्यानन्त्यं स्यात् । किञ्चेयमविद्या मोहात्मिका वा तत्त्वज्ञानविरहात्मिका वा । नोभौ । न हि ब्रह्मणि तौ सम्भवतः । न हि ब्रह्मानभिज्ञं मूढञ्चेति स्वप्रकाशचिद्रूपत्वात्तस्य । अथ जीवसमवेतं मिथ्याज्ञानमविद्या ब्रह्म विषयीकरोति । तदान्योन्याश्रयः । जीवे हि ब्रह्मतो भिन्ने सति तत्र मिथ्याज्ञानं समवेयात् । समवाये च स ब्रह्मतो भिद्येतेति । अथाविद्याविजृम्भितं मायानगरं तथा विश्वमेवेति ब्रूम इति चेन्मायास्वरूपं पृष्टो मायाफलेनोत्तरयन्नूनमनभिज्ञोऽसि । किञ्चाऽविद्याऽस्तु यथा तथा । न हि सा ब्रह्म विषयीकरोति । न वा तत्र समवैतीति कथं ब्रह्माश्रितेत्युच्यते । ननु सत्त्वेनासत्त्वेन च सा निर्वक्तुं यथा न शक्यते तथा

भावत्वेनाभावत्वेन मोहत्वेन जीवनिष्ठत्वेन वा ब्रह्मनिष्ठत्वेनापि निर्वक्तुं न शक्यत इत्येव तदनिर्वचनीयत्वार्थ इति। धिङ्मुढ यां बोद्धुं व्याहर्त्तुं च न शक्नुषे तामाश्रित्य विवदमानो न लज्जस इति दूरमपसर। किं कुर्म एवं स्वभावैव सेति चेत्। निःस्वभावामेवं स्वभावां वदन् व्याघातादपि विभेषि। तस्माद् यथा यथा परीक्षसे तथा तथा व्याघातसंघातनिर्घातघातमासाद्य माद्यन्नुन्माद्यन्नितस्ततः प्रलपसीति। अथाविद्या ब्रह्मावृणोतीत्ययुक्तम् तस्य स्वत एवावाङ्मनसगोचरत्वात्। आवृतत्वादेव तत्तथेति चेन्न। अपसिद्धान्तात्। अविद्या ब्रह्म नावृणोति किं तु तद्बलाद्ब्रह्म विवर्तत इति ब्रूम इति चेत्। कोऽयं विवर्तः। मिथ्यापरिणामः। कोऽयं परिणामः। प्रकृत्यनुवृत्तौ रूपान्तरा वृत्तिः। यथा हेम्नः कुण्डलादि। सोऽयं परिणाम आविद्यकत्वान्मिथ्येति ब्रूम इति चेत्। यथा हेम कुण्डलत्वेन पर्यवस्यति। तथा ब्रह्मासद्भूतादित्वेन पर्यवस्यतीति त्वद्वाक्यार्थः। स चायुक्तः। सदसतोश्चेतनजडयोरात्मानात्मभूतयोस्तादात्म्यासम्भवात्। न हि तात्त्विकस्यातात्त्विकः परिणामः सम्भवतीति। हिमान्या मायागन्धर्वनगरवदेतत् स्यादिति चेन्नैवम्। न हि हिमानी तथात्वेन परिणमते विवर्तते वा। किं तु हस्त्यश्वादित्वेन मूढैः प्रतीयते। ब्रह्म तु कथं तथा प्रतीयतां सर्वपरोक्षत्वादिति॥

ईश्वरसिद्धिस्त्वेवम्। य आत्मापहतपाप्मा विजरो विमृत्युर्विशोको ऽविजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्य इति छान्दोग्योपनिषदा आत्मविषयकप्रतिपत्तिविधौ सा प्रतिपत्तिः

किंरूपा कतिविधा वेत्याकाङ्क्षायां आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेयीति शतपथश्रुत्यात्मविषयकयथोक्तप्रतिपत्तिचतुष्कस्येष्टसाधनत्वेऽवगते इष्टाकाङ्क्षायां च न स पुनरावर्तत इत्यर्थवादेनापुनरावृत्तेर्मोक्षस्योपस्थितौ विध्यनुवादैकवाक्यतया च प्रतिपत्तिचतुष्टयस्य मोक्षसाधनत्वावगमे मोक्ष्यमाणप्रवृत्तिप्राप्तौ प्रवृत्तिविषयीभविष्यत्तदुपायविशेषजिज्ञासायां श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिरिति गुणविधिना वेदानुमानयोस्तदुपायत्वविधानात् । अथ श्रवणकारणवेदाकाङ्क्षायां सहोवाचैतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनणव ह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोवायु नाकाशमसङ्गमस्पर्शमगन्धमरसमचक्षुःश्रोत्रमरागमनोतेजस्कमप्राणमुखमनामागोत्रमजरममरमभयममृतमरजोऽशब्दमविवृतमसंवृतमपूर्वमनपरमबाह्यं न तदश्नोति कश्चन तदश्नोति कश्चनेत्यादि शतपथश्रुत्यात्मनि श्रुते विधिबोधितद्वितीयप्रतिपत्तये निरञ्जनत्वादिश्रुतिसंजाताश्रद्धामलक्षालनाय च मननानुसरणे इतरभिन्नानुमितेर्व्याप्तिपक्षधर्मतासंवेदनसाध्यत्वेऽपि तस्यात्र प्रावादुकप्रवादनिरासक्षमात्मपञ्चावयवसाध्यतया साङ्गोपाङ्गन्यायस्वरूपनिरूपणाय षोडशपदार्थव्युत्पादनप्राप्तौ तत्रापि षोडशपदार्थनिरूपणस्य निरस्तसमस्तदोषानुषङ्गस्वलक्षणसाध्यतया लक्षणदोषनिरासस्य च लक्षणमन्तरेणासम्भवितया लक्षणस्य च धर्मिज्ञानसाध्यस्य तत्साधकोद्देशसाध्यतयोद्देशलक्षणपरीक्षात्मकप्रवृत्तित्रित्वे व्यवस्थिते यथोक्तहेतुहेतुमद्भावसङ्गत्योद्देशलक्षणपरीक्षाणां पौर्वापर्ये सिद्धे जातिनिग्रहस्थानविशेषलक्षणा नात्यभ्यर्हिततमप्रमाणादिपरीक्षाविषयकशिष्यबुभुत्सौत्कट्येन प्रतिबन्धे । अथ तत्पर्याप्तावस-

रतः करणादर्थतश्चरमभाव इति सर्वमभिसन्धाय दुःखपङ्क-निमग्नानुद्दीधीर्षन्नक्षपादो महामुनिस्तदुपशमस्य परम्परयो-पायभूतामान्वीक्षिकीं प्रणिनाय। तत्रापि चान्वीक्षिक्या साङ्गोपाङ्गया प्रावादुकप्रवादनिरासक्षमे पञ्चावयवे समु-पवर्णिते तेनैव मननात्मिका द्वितीया प्रतिपत्तिरपि साध्यते क्षित्यादेः कार्यत्वेन घटवत् सकर्तृकत्वानुमानात् ॥

नन्वादिपदस्य प्रकारवाचित्वेन कश्चिदेकः प्रकारो वाच्यो येन तत्र तत्र महामहीधरादयः संगृह्यन्ते। अत्राहुः। अदृष्टाद्वारकोपादानगोचरजन्यकृत्यजन्यसमवेतजन्यत्वं तथा। अत्र कृत्यजन्यत्वेन पक्षविशेषणे कृते सर्वासंग्रहः सर्वस्य सन्दिग्धकर्तृकस्य स्वमते कृतिजन्यत्वादिति तदर्थं जन्येति। जन्यपदं तु स्वमते कृतौ विशेषणम् परं प्रत्या-पातत उपरञ्जकम्। एवमपि शब्दफूत्कारादीनां मृदङ्गा-दिगोचरकृतिजन्यानां जन्यकृतिजन्यत्वेन न पक्षत्वमिति तत्संग्रहायोपादानगोचरेति जन्यकृतिविशेषणम्। शब्दा-दयोऽपि हि गगनपवनगोचरजन्यकृत्यजन्या एव तयोर-तीन्द्रियत्वात्। नन्वेवमपि सर्वासंग्रहः। क्षित्यादयो हि परमाणुगोचरजन्यकृतिजन्या एव। तथाहि यागादिगोचरा यष्टुर्या जन्या कृतिः सापि यागहिंसादिकं भावयन्ती तत्फ-लीभूतं सुखं दुःखञ्चोत्पादयन्ती तदवरुद्धत्वेन तत्कारणी-भूतं परमाणुमपि विषयीकरोतीत्यतः सर्वसंग्रहायादृष्टा-द्वारकेति उपादानगोचरजन्यकृतिविशेषणम्। इयं तु कृतिरदृष्टाद्वारिकैवोपादानगोचरा भवति। एवमपि निरु-पादानानां प्रध्वंसानामदृष्टाद्वारकोपादानगोचरजन्यकृ-त्यजन्यतया पक्षप्रवेशो वृत्ते तदंशे सकर्तृकत्वानुमाने बाधः। न हि ध्वंसस्य निरुपादानस्योपादानगोचरापरोक्षज्ञानचि-कीर्षाकृतिमज्जन्यत्वलक्षणं सकर्तृकत्वं सम्भवतीति तद्वहि-

व्करणाय समवेतपदम् । एवमपि सामान्यानां नित्यगुणानां च पक्षप्रवेशो वृत्ते तदंशे बाधः स्यादिति तद्वारणाय चरमं जन्यपदम् । साध्यं तु अदृष्टाद्वारकोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वम् । अत्राप्युपादानेत्यादौ कृतेऽदृष्टद्वारा उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतयः क्षेत्रज्ञस्य भवन्त्येवेति तद्विशिष्टक्षेत्रज्ञेनैवार्थान्तरमिति तद्वारणायादृष्टाद्वारकेति उपादानगोचरप्रत्यक्षज्ञानचिकीर्षयोः कृतेश्च विशेषणमिति केचित् । तन्न । न ह्यर्थान्तरवारणाय साध्ये विशेषणं साध्यगौरवेण व्याप्यत्वासिद्ध्यापत्तेः । किं त्वदृष्टाद्वारकोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमानेव हि कर्ता । यथा घटपटादौ कुलालकुविन्दादिः । एवं चैवं प्रयोगः । अदृष्टाद्वारकोपादानगोचरजन्यकृत्यजन्यानि समवेतानि जन्यानि अदृष्टाद्वारकोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि समवेतत्वे सति प्रागभावप्रतियोगित्वात् । यद्यत् समवेतत्वे सति प्रागभावप्रतियोगि तददृष्टाद्वारकोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यम् यथा घटः । एतानि चादृष्टाद्वारकोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वव्याप्यसमवेतत्वसमानाधिकरणप्रागभावप्रतियोगित्ववन्ति । तस्मादुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि । नायं हेतुराभासस्तल्लक्षणायोगादिति नैयायिकेन स्थापितेऽनुक्तग्राह्योच्यमानग्राह्याभासबहिरुक्तग्राह्याणां यथायथमनुसन्धीयमानानामनवतारे उक्तग्राह्यविशेषेण हेत्वाभासेन मीमांसकः स्थापनां दूषयति । तथाहि कर्ता शरीरावच्छिन्न एवात्मा घटादौ दृष्टः स च पक्षे बाधितः । न हि शरीरी क्षित्यादि निर्मातीति त्वमपि ब्रूषे इति । प्रत्यक्षेणोपाधिना वा यद्यपि

नात्र शरीरजन्यत्वमुपाधिः साधनव्यापकत्वात् । क्षित्यादेरप्यदृष्टद्वारा शरीरजन्यत्वादिति । तथाप्यदृष्टाद्वारकचेष्टाश्रयजन्यत्वं सः । न च लाघवात् तादृशचेष्टाजन्यत्वमेवास्तूपाधिः चेष्टायामेव साध्याव्याप्तेः । न हि चेष्टापि चेष्टाजन्याऽनवस्थापत्तेः । स्थापनां निरस्य स एव स्वपक्षे प्रमाणमाह क्षित्यादीनि नादृष्टाद्वारकोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि शरीराजन्यत्वात् । यद्यत् शरीराजन्यं तत्तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यं न भवत्येव यथा व्योमेति महार्णववत्सेश्वरमते । नरसिंहहरिशर्ममते तु तदि न वीप्सेति । कण्टकोद्धारस्तु क्वापि मते नास्ति ॥

एवं प्रयुज्य विरतवाचि मीमांसके स्थापकः । न हि शरीरघटितमपि कर्तृत्वं गौरवात् । किं त्वदृष्टाद्वारकोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वमात्रम् । यत्तु कुलालादेः शरीरित्वं तज्ज्ञानादिनिष्पत्तये क्षित्यादिकर्ता त्वजन्यज्ञानादिमानेवेति किं तस्य शरीरेण । तथा च कर्तृस्वरूपे शरीराननुप्रवेशात् । ज्ञानेच्छाप्रयत्नवतश्च कर्तुः परं प्रति नित्यपरोक्षत्वान्न प्रत्यक्षबाधः । यत्तु शरीराजन्यत्वादिकं हेतूकृतम् । तत्र शरीरं नार्थे विशेषणम् प्रतियोगिनि वा । आद्ये स्फुटं व्यर्थविशेषणम् अजन्यत्वमात्रस्यैव कर्त्रजन्यत्वसिद्धिक्षमत्वात् । अन्त्ये यदपि शरीरं हेतूकृताऽभावं न विशिनष्टि । तथापि जन्यत्वं विशिषत् विशिष्टाभावस्य हेतुतायां पर्यवस्यति । तथा च लाघवाद्विशेष्याभावमात्रस्यैव कर्तृजन्यत्वाभावव्याप्यत्वम् । न तु विशिष्टाभावस्य गौरवादिति शरीरजन्यत्वाभावो व्याप्यत्वासिद्धः । एवं च हेत्वाभासेन मीमांसके पराजितेऽव्याहतहेतुप्रयोक्ता

नैयायिको विजयी । तदिदमीश्वरस्य जगत्कर्तृत्वमागमोऽपि संवदति । तद्यथा विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात् संबाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन् देव एकः । नन्वेवमीश्वरविषयकं प्रतिपत्तिचतुष्टयमपवर्गजनकमिति निर्गलितम् । तमेव विदित्वा अतिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति श्रुतिरप्येवमाह । एतच्चायुक्तम् । तत्त्वज्ञानस्य हि समानाधिकरणमिथ्याज्ञानध्वंसद्वारोपयोगात् दुःखजन्मेत्यादिसूत्रे तथैव सिद्धान्ताच्च । ईश्वरविषयकं तु मिथ्याज्ञानं न जीवस्य संसाराय । किं तु स्वविषयकमहं गौरोऽहं स्थूल इत्यादिना शरीरविषयकेण जीवाभेदभ्रमेण तदनुकूले रज्यते तत्प्रतिकूलं च द्वेष्टीति तदीयरागद्वेषमोहैरेव संसरति उच्यते तद्विषयकदोषत्रयोच्छित्तिस्तद्विषयकतत्त्वज्ञानादेवेति । सत्यम् । तदेव तु श्रवणमननिदिध्यासनैः क्रमादुच्छितैरुत्पन्नेनेश्वरसाक्षात्कारेण जन्यते । तथा च श्रुतिः । स हि तत्त्वतो ज्ञातः स्वात्मसाक्षात्कारस्योपकरोतीति । अस्त्वेवम् । तथापि शतपथे आत्मा वा अरे द्रष्टव्य इति श्रूयते । शास्त्रान्तरे साक्षात्कर्तव्य इति । तच्चोभयमप्ययुक्तम् । निदिध्यासनप्रवृत्त्यैव साक्षात्कारसम्भवे तस्य प्रयत्नान्तरासाध्यत्वेन फलैकरूपतया च विधानायोगात् । कृतिसाध्येष्टसाधनत्वस्य च विध्यर्थत्वात् । अत एव यागविध्यनन्तरं नापूर्वविधिः यागानुष्ठानेनैव तत्सिद्धेरिति । मैवम् । आत्मा वा अरे द्रष्टव्य इत्येव दर्शनस्येष्टसाधनत्वमाह । कृतिसाध्यत्वं तु कथं तस्य दर्शनस्येत्याकाङ्क्षायां निदिध्यासितव्य इति । निदिध्यासनं च आसनप्राणायामप्रत्याहारधारणाध्यानसमाधियमनियमरूपाष्टाङ्गयोगेन चिरनिरन्तरादरसेवितेन परमपुरुषीयचित्तसन्तानरूपम् । एतच्च

सङ्गस्तु कस्य नाश्रद्धामलक्षालनं विना सम्भवतीति तदर्थं श्रुत्यात्मस्थिरीकरणाय मन्तव्य इति द्वितीयप्रतिपत्तेरानुमानिक्या विधानम् । सापि च धर्मिज्ञानसाध्येति । श्रवणसाक्षात्कृतवेदप्रभवायाः प्रथमप्रतिपत्तेर्विधानं श्रोतव्य इति । तथा चेष्टसाधनत्वं प्रतिपत्तिचतुष्टयस्यैव । कृतिसाध्यत्वं तु चतुर्थप्रतिपत्तेस्तृतीयप्रतिपत्तिद्वारेति तदुपपत्तये तत्साधनसमाधौ तृतीयप्रतिपत्तौ च तत उत्पन्नायां साक्षात्काराय चिन्तामेवं तनोतीति सर्वं सुस्थम् ॥

ननु भेदधीः श्रुतिबाधिकेति यदुक्तं तत्र को भेदः । स्वरूपमन्योन्याभावो वैधर्म्यमन्यद्वा । आद्ये घटः पटो नेत्यत्र पटः स्वभेदे विशेषणमुपलक्षणं वा । अत्र नाद्यः । पटविशेषितभेदात्मकत्वे घटस्य स्वात्मकभेदविशेषणीभूतपटात्मकता वज्रलेपायितैवेति । घटपटयोरभेद एव पटाद् भेदो घटस्य स्वरूपमिति धियाऽभावः प्रमित इति तद्विरोधेन पटाद्भिन्नो घट इति धिया विशेषणीभूतभेदजन्यया घटपटयोर्भेदो न प्रमापणीयः उपजीव्यविरोधात् । तदुक्तम् ।

अभेदं नोल्लिखन्ती धीर्न भेदोल्लेखनक्षमा ।
तथा चाद्ये प्रमा सा स्यान्नान्त्ये स्वापेक्ष्यवैशसात्॥ (१) इति।

आद्ये ऽभेदे । अन्त्ये भेदे । अथ घटो भेदमात्रात्मक एव । किं तु तेन तेन पटादिना प्रतियोगिना निरूप्यमाणः स्वस्मिंस्तत्तद्भिन्नधियं जनयतीति चेत् । पटप्रतियोगिकत्वं घटस्य स्वरूपं चेत् तदा पूर्ववद्घटपटयोरभेदः स्यात् । यदि तु तद्धर्मस्तदा घटः पटवान् स्यात् पटघटितपटप्रतियोगि-

(१) आद्ये अभेदे सा धीः प्रमा नान्त्ये भेदे स्वस्य भेदग्रहस्यापेक्ष्य उपजीव्योऽभेदग्रहस्तद्वैशसात् तद्विरोधादित्यर्थः ।

कत्ववत्त्वात् । एवं पटोऽपीति । किञ्च स्वरूपस्यावधिशून्यत्वेन घटो घटाद्भिन्न इत्यवधिघटितार्थधीर्न स्याच्च भिन्न इति । न हि स एव तद्वान् भवतीति । न च पटप्रतीतेर्विशिष्टघटप्रतीतिकारणतया पटादितीयं पञ्चमी । पटाद्भिन्न इत्यत्र हि भेदावधौ पञ्चमी । न तु विशिष्टधीहेतुभूतविशेषणधीविषये । अन्यथा विशिष्टधीहेतुर्निर्विकल्पकविषयतया घटत्वाद्घट इत्यपि स्यात् । उपलक्षणपक्षस्त्वतिप्रसङ्गान्निरस्तः । अन्योन्याभावस्तु भेदो दुर्निर्वचः । तथाहि स हि घटपटोभयतादात्म्यप्रतियोगिको न सम्भवति अत्यन्तासत्प्रतियोगिकतापत्तेः । नापि घटे पटतादात्म्यप्रतियोतिक एवं पटेऽपीति घटे पटतादात्म्याभावस्य व्यधिकरणाभावत्वेन संसर्गाभावत्वात् । वैधर्म्यमपि न भेदः तत्रापि वैधर्म्यान्तरस्य सत्त्वेऽनवस्थापत्तेरननुभवाच्च । असत्त्वे च वैधर्म्याणामभेदाद्धिधर्मिणामप्यभेदे जगदभेद एव स्यात् । अपि चास्तु यः कोऽपि भेदः सोऽपि नाभिन्ने निविशते विरोधात् । किञ्चाभिन्ने भेदप्रवेशे एकाभावेनैकमपि न स्यात् तस्यैकसमूहत्वात् । नापि भिन्ने । एवं सति हि सोऽपि भिन्ने सोऽपि च भिन्ने इत्येकस्मिन्नेव घटे नियतायुषि क्रमेण तत्तद्भेदालिङ्गनमयुक्तम् । किञ्च विधेयीभूतभेदफलमधिकरणावच्छेदकीभूतभेदेनैव स्यादिति विधेयीभूतभेदधाराविलोपः स्यात् । अयमेव प्राग्लोप इहोक्तः । अथानन्ता भेदा अपि क्रमेणैव घटमालिङ्गन्ति तदा किं भेदविशिष्टे किं भेदवृत्तिरित्यशक्यावधारणम् । इदमेव चाविनिगम्यत्वम् । अपि च भिन्नबुद्धेरेकेनैव भेदेनोपपत्तावनन्तभेदकल्पने मानाभावः । अयमेव प्रमाणापगमः । तदुक्तम् ।

प्राग्लोपाद्विनिगम्यत्वप्रमाणापगमैर्भवेत् ।
अनवस्थितिमास्थातुरचिकित्स्यत्रिदोषता [१] ॥ इति ।

अथानवस्थाभयात् द्वितीयो भेदो धर्मिस्वरूपमेवोच्यते । तदा धर्मिस्वरूपं निःस्वरूपमेव स्यात् स्वरूपव्यावृत्त्यात्मकभेदात्मकत्वात् । अथ धर्मात्मको भेदः स्वरूपविशेषव्यावृत्तिर्न तु स्वरूपसामान्यव्यावृत्तिः तदा द्वावपि घटपटादिरूपौ भेदिनौ स्वरूपसामान्यरूपतयाऽभिन्नौ स्याताम् । किञ्च भेदः स्वप्रतियोगिस्वानुयोगिस्वधर्मस्वसम्बन्धैः समं यदि भेदान्तरेण भिद्येत तदानवस्था न चेत्तर्हि अद्वैतमेव ।

तदद्वैतश्रुतेस्तावद्बाधः प्रत्यक्षतः क्षतः ।
नानुमानादि तं कर्तुं तवापि क्षमते मते [२] ॥
अद्वैतागमनासीरे साधु सा धुन्वती परान् ।
सेवामेवार्जयत्यर्थापत्तिपत्तिपरम्परा [३] ॥

अद्वैतश्रुतयश्च वर्णपदादिभेदेनाविद्यकेनाद्वैतं पारमार्थिकं प्रतिपादयन्त्योऽपि न तेन दुर्बलेन बाध्यन्ते । तस्मात्

पारमार्थिकमद्वैतं प्रविश्य शरणं श्रुतिः ।
बाधनादुपजीव्येन बिभेति न मनागपि [४] ॥

(१) तृतीयाविभक्त्यर्थः प्रयोज्यत्वम् । तथा च प्राग्लोपादिप्रयोज्या त्रिदोषतेत्यर्थः । अभिन्नत्वं वा अर्थः । तथा च प्राग्लोपाद्यभिन्ना त्रिदोषतेत्यर्थः ।

(२) प्रत्यक्षविषयाभावात् प्रत्यक्षबाधो न सम्भवतीत्युपसंहरति तदद्वैतेति । नानुमानादीति । अनुमानापेक्षया आगमस्य बलवत्त्वात् । अन्यथा नरशिरः कपालं शुचिः प्राण्यङ्गत्वादित्याद्यप्यवकाशमासादयेत् ।

(३) अर्थापत्तेः स्वपक्षानुकूलत्वमुक्तं स्मारयति अद्वैतेति । अद्वैतागमस्य नासीरे पुरतः सा अर्थापत्तिः परान् विरोधिनः प्रमाणाभासान् धुन्वती निराकुर्वन्ती सेवामानुकूल्यमर्जयति भजते ।

(४) श्रुतिः पारमार्थिकमद्वैतं शरणं प्रविश्य उपजीव्येन बाधनात् मनागपि ईषदपि न बिभेतीत्यन्वयः ।

श्रुतिजन्यत्वस्याप्याविद्यकत्वान्न ब्रह्माद्वैतधियो नित्यत्वविरोधः । तस्मात्

आपाततो यदिदमद्वयवादिनीनाम्
अद्वैतमाकलितमर्थतया श्रुतीनाम् ।
तत्स्वप्रकाशपरमार्थचिदेव भूत्वा
निष्पीडितादहह निर्वहते विचारात् (१) ॥ इति ।

अत्रोच्यते । यथायथं तावत्त्रयो भेदाः । तथाहि स्वरूपं तावद्भेदः भिद्यते व्यावर्त्यते अभेदधीविरोधिधीविषयीक्रियते ऽनेनेति व्युत्पत्तेः । स्वात्मना च पटस्तथा क्रियत एव अतो न स्वरूपस्य भेदत्वं पारिभाषिकं वैधर्म्यान्योन्याभाववत् स्वरूपे ऽपि व्युत्पन्नत्वात् । अत एवात्मतत्त्वविवेके । त्रीनपि भेदानाचार्या आहुः । ननु स्वरूपभेदवत्ता स्वरूपस्य न सम्भवत्यभेदात् । न हि स एव तद्वांस्तेनैव भवतीति चेत् । माभूत् । न हि स्वरूपभेदवतस्तेन भेदवत्त्वां ब्रूमः । किं तु प्रतियोग्यपेक्षविलक्षणधीविषयतामात्रम् । प्रतियोगित्वाभिमताभेदारोपविरोधिधीपर्यालोचननिबन्धनस्तत्र घटाद्भिन्नः पट इत्यादिः प्रतिभासः । तथा च स्वरूपभेदस्थले अभेदं नोल्लिखन्ती धीरित्यादि यदुक्तम् । तदयुक्तम् । न हि तत्र भेदो वा भिन्नता वा चकास्ति । किं तु भेदान्तरमन्तरेणैव विलक्षणधीमात्रं तत्रोदेति । तदुक्तम् । किञ्चिद्धि वस्तु स्वत एव विलक्षणमिति । यद्वा घटादिव्यक्तेः पटादिसाकाङ्क्षत्वमेव तद्भेदत्वम् । यद्यपि घटादिव्यक्तिर्न स्वरूपेण पटा-

---

(१) अद्वयवादिनीनां श्रुतिनां यदिदमद्वैतं आपाततोऽर्थतया आकलितम् विचारितम् तत्स्वप्रकाशचिद्रूपमेव भूत्वा निष्पीडितात् शोधितात् विचारान्निर्वहते निर्वाहं प्राप्नोतीत्यन्वयः ।

दिसाकाङ्क्षा। तथापि तत्प्रतियोगिको भेदो भवन्ती तत्साकाङ्क्षैव। प्रतियोगित्वं च पटादेः भेदत्वप्रकारकघटादिधीकारणीभूतधीविशेषविषयत्वम्। अन्योन्याभावस्तु यद्यपि तदात्मीभवतोर्घटपटयोर्नाभावौ। नापि तयोस्तादात्म्यस्याभावोऽसौ येनात्यन्तासत्प्रतियोगिकः स्यात्। नाप्यतदात्मीभवतोः। येन स्तम्भः पिशाचो न भवतीत्यत्र तस्यैकस्यैकमेव ज्ञानं स्तम्भे प्रत्यक्षं पिशाचे चाप्रत्यक्षमापद्येत। नापि घटे पटतादात्म्यस्याभावो येन संसर्गाभावः स्यात्। किं तु घटः पट इत्यारोपशरीरम्। एष च घटे पटत्वारोपः तथैवानुभवात्। निषेधस्तु पटस्यैव तस्यैव सामानाधिकरण्येनान्वयात्। वैयधिकरण्येन तु तदन्वये घटे पटो न घटे पटत्वं नेति बाधधीः स्यात्। तस्मादभावाधिकरणे प्रतियोगितावच्छेदकं धर्ममारोप्य यो निषेधः प्रतीयते सोऽन्योन्याभाव इति विज्ञेयम्। ननु धर्म आरोप्यते धर्मी निषिध्यत इति दुर्घटम्। आरोपितस्यानिषेधान्निषेध्यस्य चानारोपादिति चेन्न। आरोपे निषेधबुद्धौ च घटपटयोर्भानमित्यनुभवसिद्धम्। किं त्वनुभववैचित्र्यादारोपो धर्मप्राधान्येन। निषेधस्तु धर्मिप्राधान्येन तथैवानुभवादिति दिक्। वैधर्म्येषु वैधर्म्यापगमेऽनवस्था न दोषाय प्रामाणिकत्वात् तत्र स्वरूपभेदेन भिन्नधीसम्भवाद्वेति॥

यत्तु भेदो भिन्ने निविशत इत्यादि। तत्तुच्छम्। तस्य नित्यसमाप्रपञ्चत्वात्। न हि तद्भेदविशिष्टे तद्भेदवृत्तिं नाप्यभिन्ने भेदवृत्तिं ब्रूमः। किं तु भेदोपलक्षिते भेदवृत्तेर्मयोपगमात्। किञ्च यदा यत्र भेदो वर्तते तत्तदा तद्भेदवदेव तत्पूर्वं तु नास्त्येव। न हि गौर्गोत्वादिशून्यः

क्षणमपि जातेर्जातसम्बन्धत्वात् अन्योन्याभावस्य स्वरूपभेदस्य च तत्समत्वात् स्वरूपभेदस्य पिण्डे निवेशानुपगमाद्वा । एतेन प्रागलोपेत्यादि खण्डितम् अप्रसक्तत्वात् । नूनं किं गवि गोत्वमुतागवीति वदता धर्मधर्मिभाववैरिणा बौद्धेन शिक्षितोऽसि यदीदृशान्यसाराणि प्रलपसि । धर्मधर्मिभाव एव मह्यं न रोचत इति चेत् । नूनमज्ञोऽसि यदभिन्नं प्रतिजानीषे धर्मधर्मिभावं त्वपजानीषे इति । अभेदधर्मा हि धर्मी अभिन्न इति धर्मधर्मिभावाभावे काभिन्नमिति । किञ्च भेदाभावे कथमभिन्न इति । न हि धर्मिमात्रम् नाप्यभेदमात्रमभिन्न इति । किं त्वभेदवानभिन्न इति । एवञ्चाभिन्नतापि भिन्नमुपजीव्यैव प्रवर्तते अभेदधर्मिणो भेदधियमन्तरेणाभिन्नताधियोऽसम्भवादिति । तस्मात्

अनुल्लिखन्ती भेदं धीर्नाभेदोल्लेखनक्षमा ।
तथा चाद्ये प्रमा सा स्यादन्त्ये स्वापेक्ष्यवैशसात् ॥ इति ।

त्वदुत्थापिता कृत्या त्वामेवाधाक्षीदिति । अथ निर्वचनानां सर्वेषामेव दोषवत्वे निर्वचनासिद्धावनिर्वचनतारूपो मत्पक्ष एव सिध्यतीति चेत् । निर्वचनमुपक्रम्य दोषमवेक्ष्यानिर्वचनीयतामाश्रयन् व्याघातमासादयन् ततस्त्वविभ्यत्त्वपेक्षणीयतामाप्नुवानो जड मैवं पुनर्वोचः । अन्योन्याभावात्यन्ताभावोऽभेदः तद्वति च तादात्म्यं वर्तत इति क्वात्माश्रय इति चेन्न । अन्योन्याभावात्यन्ताभावो हि घटत्वादिकं तदेव च तादात्म्यं तथा चात्माश्रय एव । अथ नाभेदेनावच्छिन्नेऽन्यो भेदो वर्तत इत्युच्यते तदा प्रागलोपादिकं त्वदुक्तं त्वयि प्रहरतीति । अथाभेदो न धर्मिणो विशेषणम् किन्तु धर्मिणः

स्वरूपमेव त्वन्मते स्वरूपभेदवत्। तदा न हि स एव तद्वांस्तेनैव भवतीति स्वरूपभेदवदत्रापि दोषः। अथाभेदपक्षे धर्मितदभेदयोरप्यभेद एव। अन्यथा शतेनापि प्रमाणैरभेदे साध्यमाने ऽप्यभेदो न स्यात्। अभेदतद्धर्मिणोर्वज्रलेपत्वादिति चेत्। मासैत्सीदभेदः किन्नश्छिन्नम्। अभेदोपलक्षिते ऽभेदो वर्तत इति चेत्। क उपलक्षणार्थः। गवि गोत्वमित्यत्र यः तत्रैव कः। न हि गोत्वेनोपलक्षणानन्तरं गोत्ववृत्तिस्तत्र भवतीति चेत्। मैवम्। यो हि पिण्डो गोत्वेनैव विशिष्यते तत्र विशेष्यभागे गोत्ववृत्तिरित्येवोपलक्षिनवृत्त्यर्थः। एवमभेदे चेदेवं भेदे ऽपीति। यदपि च किञ्च भेद इत्यादि। तदप्यसत्। अनवस्थायाः प्रामाणिकत्वात्। एवञ्च भेदप्रत्यक्षस्य भेदालम्बनत्वे समर्थिते तदद्वैतश्रुतेरित्याद्यपि निरस्तम्। अर्थापत्तेस्त्वद्वैतागमोपकारकता प्रागेवापास्ता। यत्तु पारमार्थिकमद्वैतमित्यादि। तदप्यसत्। तस्य पारमार्थिकत्वे बीजाभावात्। अत एवापातत इत्युपसंहारो व्यपास्तः अद्वैतस्य योग्यताज्ञानविरहेण श्रुत्यापि प्रतिपादनायोगादिति। यत्तु तर्केण नैषा बुद्धिरपनेयेति श्रुतिराहेत्युक्तम्। तदपि नाद्वैतसिद्धौ प्रमाणं स्त्रियश्च धर्मप्रसेविका इतिवत्। तादृशभावनस्य मोक्षानुकूलत्वे ऽपि तादृशवस्तुतत्त्वस्यासिद्धेरभेदधीप्रतिपालनमात्रस्य श्रुत्युपदिष्टत्वात्॥

अथैयता प्रबन्धेन प्राधान्येन स्वमतं व्यवस्थाप्येदानीं तैर्थिकमतानि खण्डयितुं खण्डनयुक्तीः प्रयोक्ष्यमाणः जल्पे तु स्थापनाघटिते तदवतारं कर्तुमशक्नुवानः जल्पस्त्वेका कथा न भवत्येव वितण्डाद्वयशरीरत्वात्। अन्यथा जल्पद्वयेनाप्येका कथा किमिति न भवतीति जल्पमेव

खण्डनकृत् प्रत्यादिदेश । यद्यपि जल्पे प्रथमकक्षायां स्थापनाकण्टकोद्धारः द्वितीयकक्षायान्तु प्रथमस्थापनाखण्डनं प्रतिस्थापना वेति न वितण्डाद्वयसम्भवः । तथापि अजहत्स्वार्थलक्षणया स्थापनैव स्वपक्षसिद्धिपरपक्षप्रतिषेधोभयधीपरा सत्प्रतिपक्षवदिति खण्डनार्थ इति प्राञ्चः ॥

आदौ प्रथमः स्थापयति ततो द्वितीयः खण्डयतीत्येका वितण्डा । ततो द्वितीयः स्थापयति ततः प्रथमः खण्डयतीत्यपरा वितण्डेति तु नव्याः ॥

अत्राहुः । परपक्षहननशक्तिमात्रजिज्ञासायां वितण्डा स्वपक्षरक्षणपरपक्षहननशक्तिजिज्ञासायां जल्प इत्यनयोर्भेदः । इतोऽधिका तु जिज्ञासैव न सम्भवति येन जल्पपृष्ठयेनापि कथान्तरं स्यात् ॥

अथ खण्डनकृत् षोडशपदार्थीं खण्डयिष्यन् तत्र मूर्धन्यं प्रमाणं खण्डयितुं तदुपधायिकां प्रमामादौ खण्डयति स्म तत्त्वानुभूतिः प्रमेत्ययुक्तम् । तद्यथा । तत्त्वपदं यौगिकं रूढं वा । नाद्यः । तद्धि प्रकृतं न चात्र तदस्तिभवितुस्त्वशब्दार्थत्वाभावेन तत्प्रमायामव्याप्तेः । नान्त्यः । स्वरूपपर्यायतया भ्रान्तावतिव्याप्तेः । यत्र यदा यत् स्वरूपसत् तत्र तदा तदनुभूतिः प्रमेति चेन्न । देशकालप्रमयोरव्याप्तेः । देशे देशत्वं काले कालत्वमनुभूयत इति सापि धीः प्रमेति चेन्न । धर्मिप्रमायामव्याप्तेः । सा हि देशकालयोर्धीर्न तु तत्त्वयोः । अनुभवत्वमपि न जातिः आगमेनानुमानेन वा भविष्यतोः सुखदुःखयोः प्रत्ययेऽपि सुखं दुःखं वानुभवामीति प्रतीतेरनुत्पत्तेः । नापि स्मृत्यन्यत्वमुपाधिः तयोरेव स्मृत्यन्यत्वप्रत्ययेऽप्यनुभवामीतिप्रत्ययानुदयात् । स्मृत्यन्यत्वे च लक्षणान्तरेण सिद्धे तेनै-

वेतरभेदसिद्धावस्य वैयर्थ्यात् । इत एव तत्सिद्धावात्माश्रयात् । असिद्धौ च स्वरूपासिद्धेरिति । उच्यते । यद्यस्य पारमार्थिकं रूपं तत्तस्य तत्त्वम् । यथा घटस्य घटत्वम् । तथा च तद्धर्मिणि तद्धर्मधीः प्रमेति लक्षणार्थः । तेन यत्र यदस्ति तत्र तस्यानुभवः प्रमेति निर्विकल्पकसविकल्पकोभयसङ्ग्राहकं लक्षणं पर्यवस्यति । यद्वा व्यवहारानङ्गत्वेन निर्विकल्पकं तिरस्कृत्य तदङ्गं विशिष्टप्रमामात्रं पुरस्कृत्य तद्वति तत्प्रकारकानुभवत्वमिति । न चाननुगमः । न ह्येकत्र प्रमा सर्वत्र प्रमा । किन्तु काचित् क्वचित् । तथा च किं ज्ञानं कुत्र प्रमेति जिज्ञासायामस्योत्थितावननुगमस्यादोषत्वात् । आकाशकालादिप्रमापि आकाशादौ तत्त्वधीत्वात् प्रमैव । ननु भविष्यद्रागे इदानीं श्यामे रक्तधीः प्रमा स्यात् । मैवम् । सा हीदानीं रागालम्बना वा भविष्यद्रागालम्बना वा कालास्पृष्टरागालम्बना वा । आद्ये इदानीं कालविशिष्टे रागो नास्तीति कुतः सा प्रमास्तु एतत्कालविशिष्टस्याधिकरणत्वात् तत्र च रागाभावात् । अन्त्ययोस्त्वनुमतिरेव । नन्वाद्यलक्षणे मूलावच्छेदेन तरौ कपिसंयुक्तधीः प्रमा स्यात् । न स्यात् । सा हि तरुः कपिसंयोगीति वा मूलावच्छिन्नस्तरुः कपिसंयोगी वा । आद्ये इष्टापत्तिः । अन्त्ये तत्र लक्षणमेव नास्ति । द्वितीयलक्षणस्थं तत्प्रकारकत्वन्तु न तद्रूपविशेषणज्ञानजन्यत्वमीश्वरप्रमायामव्याप्तेः । किन्तु तद्वैशिष्ट्यावगाहित्वम् । न च समवायस्यातीन्द्रियतया घटः पट इत्यादिप्रत्यक्षाव्याप्तिः न्यायमते तस्यापि प्रत्यक्षत्वोपगमादिति (१) । न च चलद्बलाहकसन्निहिते वस्तुतश्च-

(१) समवायस्य प्रत्यक्षत्वं समवायवादे 'प्रत्यक्षं समवायस्य विशेषणतया भवेदि'त्यादिकारिकायामपि प्रमाणीकृतम् ।

लति चन्द्रे चन्द्रश्चलतीति धीः प्रमा स्यादिति वाच्यम् । चन्द्रादिकर्मणोऽतीन्द्रियत्वेन सतोऽपि तस्यास्मदादिभिरग्रहणे बलाहककर्मण एव तत्रारोपाभ्युपगमात् । अनुभवत्वञ्च जातिरनुभवामीत्यनुगतमतिबलात् । न चैवं भविष्यत्सुखादावपि शब्दाद्यवगते सुखमनुभवामीति धीः स्यात् । इष्टापत्तेः । एवमपरोक्षकस्यापि स्यादिति चेत् । शब्देन भविष्यत्सुखं जानामीति तस्यापि प्रतीतिरेव । सुखदुःखानुभवो भोगमात्ररूप एवेति । मिथ्याधीदूषितान्तःकरणस्य तु दोषवशात् सुखमनुभवामीति धीर्नोदेतीति ॥

यत्तु अनुभवत्वं न जातिः प्रत्यभिज्ञायां धर्म्यंशे संस्कारेन्द्रिययोर्व्यापारात् तदंशज्ञाने स्मृतित्वानुभूतित्वयोः सङ्करादिति । तन्न । संस्कारेण स्मृत्योपनीयमानायास्तत्ताया धर्मोदन्ताग्राहिणेन्द्रियेण भानोपगमेनांशत्रयेऽपि प्रत्यभिज्ञायाः(१) साक्षात्त्वोपगमात् । न हि प्रत्यभिज्ञा ज्ञानद्वयमभेदासिद्धापत्तेः । नापि ग्रहणस्मरणकरम्बिताकारमेकमुक्तसङ्करापत्तेः । नापि परोक्षापरोक्षानुभवाकारमेकं साक्षात्त्वस्यानुगतिमतिसिद्धाया जातेरव्याप्यवृत्तित्वापत्तेः । नापि स्मरणमात्राकारमेकमिदन्तायां संस्काराभावात् तस्मादुपनीततत्तासन्निकृष्टेदन्ताविशिष्टधर्मिग्राहीन्द्रियकरणकं साक्षात्कारीन्द्रियकरणकमेकं तदिति पश्यामः । तत्तायान्तु संस्कारघटिता इन्द्रियसम्बद्धविशेषणता प्रत्यासत्तिरिति निबन्धकृतः । तज्जनितस्मरणघटितेति वार्त्तिककृतः । अत्र तद्धेतोरेवेति न्यायात् प्रथम एव कल्पः श्रेयानिति केचित् । चिरध्वस्तानुभवस्य क्रमिकस्मरणं प्रति व्यापारत्वेन संस्कारकल्पनमिति धर्मि-

(१) जिज्ञासाया इति २ पुस्तके पाठः ।

ग्राहकप्रमाणेन स्मरणार्थमेव तस्य कल्पनात्। यथार्थोऽनुभवः प्रमेत्यपि निरवद्यं यथाशब्दोऽयमनतिवृत्तिवचनः। तेनानतिवृत्तोऽर्थो यस्येत्यर्थः। भ्रमार्थो ह्यतिवृत्तो भवति। प्रमार्थस्तु न तथा तस्मिन् घटत्वादौ घटादिषु सत्येव प्रमोदयात्। तेन घटत्ववति घटत्वप्रकारकोऽनुभवो घटप्रमेति तत्तत्प्रमितीनां लक्षणं तद्वति तत्प्रकारकत्वमिति तत्तत्सर्वलक्षणसूचनाय सामान्यलक्षणं तत्त्वस्यैकस्याभावात् प्रमात्वस्यापि विषयप्रकारभेदेन प्रतिव्यक्ति भिन्नत्वादिति। यत्तु द्यूतकारेण पाणौ पञ्च वराटकान् कृत्वा पृष्टस्य पञ्च वराटकास्त्वत्पाणौ सन्तीति अजाकृपाणीयन्यायेन संवादिवचनं तत्सम्भावनायोनि विप्रलिप्सायोनि वा। कारणाभावेन तत्र निश्चयमात्रस्यैवानुत्पत्तेः। उत्प्रेक्षासहितमनोजनितप्रमायोनि वा अनुमातुस्तृतीयलिङ्गपरामर्शाभासात्। वस्तुतो वह्निमति या वह्न्यनुमितिः प्रमाभूता सापि तद्व्याप्तिपक्षधर्मतावैशिष्ट्यावगाहिनो भगवज्ज्ञानरूपात् प्रमाणादिति न प्रमायाः प्रमाणातिपातः। एवं सम्यक् परिच्छित्तिः प्रमा समीचीनानुभूतिः विशेष्यावृत्त्यप्रकारिकानुभूतिरिति(२) यावत्। एतेनाव्यभिचार्यनुभवो ऽविसंवाद्यनुभवो वा प्रमेति व्याख्यातम्। न चात्र भ्रमांशभूतप्रमायामव्याप्तिर्दोषः असङ्कीर्णप्रमाया एवात्र लक्ष्यत्वात्। अन्यथा अनुभूतिः प्रमेत्येतावतैव निर्वृणुयादिति। अनुगतैस्तु तैस्तैस्तत्तत्प्रमितीनां लक्षणैस्तास्ताः प्रमितय इतरेभ्यो भिद्यन्ते न तु सर्वा प्रमितिरेकदैव तत्तल्लक्षणानां प्रत्येकं भागासिद्धत्वात्॥

(२) तथा च स्वव्यधिकरणप्रकारनिष्ठप्रकारतानिरूपिता या या विशेष्यता तत्तदनिरूपकज्ञानत्वं फलितम्।

ननु लक्षणमेव पक्षतावच्छेदकमिह रूपान्तरस्यानभिधानात्। तथा च हेतुसाध्ययोः सामानाधिकरण्यबुद्धिरेव पक्षतावच्छेदकसाध्ययोःसामानाधिकरण्यधीः सा चानुमानफलमित्यनुमानमफलं स्यादिति चेन्न। अत्र व्यतिरेकसम्बन्धो गमकोऽन्वयसम्बन्धो गम्यत इति मत्सिद्धान्तात् । अत एवात्र व्यभिचारसम्बन्ध एवोपदर्श्यते ॥

एवं प्रमायां व्यवस्थितायां प्रमाणमपि स्ववचनं । प्रमायाः करणं हि प्रमाणं करणञ्च साधकतमं तमबर्थश्चातिशयः स च कारकान्तराचरितार्थकारकत्वम्। तथा हि कर्ता तावत् करणं हस्तपरश्वादि व्यापारयन् लिङ्गपरामर्शादिकञ्चोत्पादयंस्तत्र चरितार्थः। एवं कर्मापि करणस्य व्यापारमुत्पादयत्तत्रैव। न हि कर्म विना निरालम्बनः करणव्यापार उदीते । अधिकरणमप्येवं न हि तेन विना कर्ता निरालम्बनः करणं व्यापारयितुमीष्टे। सम्प्रदानापादाने तु क्वाचित्के एव । तथा च कारकान्तराचरितार्थं क्रियामात्रान्वयि करणमिति व्याख्यायामन्तरपदार्थकल्पनया खण्डनम् । तदसत् । अन्तरपदार्थो हि समभिव्याहृतपूर्वपदप्रवृत्तिनिमित्तवत्त्वे सति प्रक्रान्तप्रवृत्तिनिमित्तसाक्षाद्व्याप्योपाधिभिन्नतादृशोपाधिमान् । यथाहि कठ उपस्थिते ब्राह्मणान्तरमानयेति शब्दः कठभिन्नं कण्वादिब्राह्मणमेवाह तत्रैव च प्रयुज्यते । न तु घटादिकमाह तत्र प्रयुज्यते वा तथा करणे प्रक्रान्ते कारकान्तरपदं करणकारकभिन्ने कर्मादौ कारके प्रयुज्यते तदेव चाहेति । अत एव हस्तः परशौ चरितार्थीभवन्नपि कारकान्तराचरितार्थ एव उभयोरपि करणत्वात् । एवञ्चान्तरपदस्यार्थान्तरं प्रकल्प्य यद्दूषणवचनम्। तच्छलं कल्पितदूष्यत्वादिति ॥

ननु करणप्रक्रमे करणभिन्नं कारकं कारकान्तरमित्यात्थ। तथा च करणज्ञानाधीनं कारकान्तरज्ञानं तदधीनं च करणज्ञानमित्यन्योन्याश्रय इति चेत्। नूनं शब्दवदर्थेऽप्यव्युत्पन्नोऽसि। तथाहि न हि लक्ष्यस्य लक्षणान्वयात् प्राक् प्रकारान्तरेणापि ज्ञानं न भवतीति सचेताः प्राह तथासति लक्षणविधिरपि तत्र न स्यात् उद्देश्यापरिचयात् उद्देश्यं ह्यनूद्य लक्षणं विधीयते एवमवधेरपि सामान्यमुखं तन्त्रम्। तथा च प्रक्रान्तकारकत्वेन कारकान्तरसाधारणेन करणस्य ज्ञानादन्तरपदार्थज्ञानं तज्ज्ञानाच्च तस्यैव प्रक्रान्तस्य करणत्वेन ज्ञानं फलं वदेति(१)। यथा वा बहिः सत्त्वेन विना जीविनो गृहासत्त्वमनुपपन्नमिति सामान्यमुखाद्बहिः सत्त्वालम्बिनोऽनुपपत्तिज्ञानाद्देवदत्ते पक्षे प्रवृत्ताद्देवदत्तो बहिः सन्निति विशेषमुखी धीः फलं वदेति(२)। अत एव यतोऽन्यत्वं तत्सिद्धेरग्रे तदसिद्धेरिति यत्प्रलपिष्यसि तदपि निरस्तम्। ननु किमिदं चरितार्थत्वं अन्यथा सिद्धत्वं वा परम्पराकारणत्वं वा। नोभयं कर्त्रादेरप्यतथात्वादिति। उच्यते। तत्तन्निष्ठान्यतरजनकत्वं तत्र चरितार्थत्वं कर्तुः कर्मणश्च करणनिष्ठव्यापारजनकत्वं मनसो हस्तादेः करणे चरितार्थत्वेऽपि न तस्य करणापेक्षया कारकान्तरतेति। कर्तृव्यापारविषयत्वं वा तत्त्वम्। न च कर्तृव्यापारफलेऽतिव्याप्तिः यदधिकृत्य हि कर्तृव्यापार उदेति स एव तद्विषयतयोक्तो यथा हस्तादि। गोचरता हि द्वयी उद्देश्यतयानन्यपरकृतिव्याप्यतया चेति मतसिद्धान्तात्। पिपक्षोर्हि पाकानु-

(१) वद इति छेदः।

(२) वद इति छेदः।

कूलो यत्नस्तत्करणं हस्तमधिकृत्योदेति । अथ शरीरचालनाय प्रयत्नः शरीरमधिकृत्योदेतीति शरीरं करणं स्यात् तथा च शरीरं चालयतीतिवच्छरीरेण चालयतीत्यपि स्यात् । भवत्येव दध्नाजुहोति पयसा जुहोतीति श्रौतप्रयोगदर्शनात् । अपौरुषेयत्वादयमपर्यनुयोज्य इति चेत् । मांसेन भुक्त्वा तृप्तो भवतीति मैत्रेयप्रयोगस्यापि दर्शनात् । सर्वेषामस्तीदृशः प्रयोग इति चेत् । किमतः प्रयोगे सति बीजानुसरणं न तु निमित्तवत्त्वादेव प्रयोगापादनं तस्य प्रयोगसमनियमाभावात् । अत एवारोपे सति मिमित्तानुसरणं न हि निमित्तमस्तीत्यारोप इत्याचार्याः । कथमीदृशः प्रयोगसङ्कर इति चेत् । निमित्तसमावेशादिति गृहाण । तथा च यदा कर्तृव्यापारविषयतापुरस्कारस्तदा करणतया यदा तु करणव्यापारविषयत्वपुरस्कारस्तदा कर्मतया प्रयोग इति । अत एवाधिकरणीभूते ऽपि देशे समेन देशेन यजेतेति । ननु करणत्वं कारकान्तराचरितार्थत्वगर्भं अधिकरणे तच्चरितार्थं कथमस्तु । तदुक्तं खण्डनकृता । अधिकरणस्यापि कर्मण इव करणे चरितार्थत्वमतः कर्मण्यधिकरणे च न कारकान्तराचरितार्थत्वरूपस्य करणत्वस्य समावेश इति । मैवम् । न ह्यधिकरणं विना करणं परश्वादि तद्विशेषणमुद्यमनादि वा नोदेतीति । एतेन कर्मापि निरस्तं तयोरसार्वत्रिकत्वात् तेन विनापि परशुतदुद्यमनयोरात्मलाभात् । एवं कर्तृव्यापारविषयत्वमप्यधिकरणकर्मणोर्नासम्भवि आद्ये प्रचरणादेव अन्त्ये प्रक्षेपणादेः कर्तृव्यापारस्य सम्भवात् । क्रियया ऽयोगव्यवच्छेदेन सम्बन्धित्वं वा तत्त्वम् । अत्र क्रिया प्रधानक्रियोक्ता तस्या एवोद्देश्यत्वेन वाग्बुद्धिस्थत्वात् । एवञ्च प्रधानक्रियासम्बन्धित्वमात्र उक्ते कारकमात्रे ऽतिव्याप्तिः

परम्परयापि तेषां तत्सम्बन्धित्वादतस्तद्वारणायायोगे-त्यादि। तृतीया चेयं लक्षणे। अयोगश्चेह प्रधानक्रियाया असम्बन्धः तस्य व्यवच्छेदकरणेनाव्यवहितोत्तरकाले प्रधानक्रियाया अभावः। तेनेदमुक्तं भवति यत् करणे सव्यापारे सति प्रधानक्रियायास्तत्र क्षणमप्ययोगो नास्ति किन्तु नैरन्तर्यमेव तेन प्रधानक्रियाकारकत्वे सति प्रधानक्रियया सममव्यवधानेन सम्बन्धित्वं करणत्वम्। काञ्चनेन धनीतिवदभेदे वा तृतीया। तेनायोगव्यवच्छेदात्मकं प्रधानक्रियासम्बन्धित्वं तत्त्वमिति। अत एव कृत्तिकोदयं प्रति रोहिण्यासत्तेः करणत्वमपास्तं तस्यास्तं प्रत्यकारकत्वात् कारकविशेषस्य करणत्वात्। एवञ्च सामग्र्यामपि नातिव्याप्तिः तस्या अकारकत्वात्। तथाहि सा हि कारणसमाहारः स च यदि कारणं स्यात्तदा तं समाहारमन्तर्भाव्य कारणसमाहारो वाच्यः सोऽपि च समाहारः पूर्ववत् कारणमिति कारणसमाहारात्मिका सामग्री न निर्वहेत् कारणञ्चापरिसङ्ख्येयं स्यात् (१)। अथ कारणप्रागभावानाधारः कार्यप्रागभावाधारः क्षणः सामग्रीकः क्षणः उपाधिर्वा उपधेयो वा उपहितो वा। आद्ये न हि रवेः स्पन्दो विशेषं कारणम्। अस्तूपधेयः कालो विश्वाधारतया विश्वकारणमिति चेत्। बाढम्। स तु न सामग्री अविलक्षणैकरूपत्वात्। नान्त्यः न ह्युपाधिसहस्रेणापि कालो भेत्तुं शक्यते आत्मवत्। अन्यथा जितमौपनिषदैरुपाधिभेदवादिभिः। तस्मात् कारणान्येव समाहारः। स च न कारणम्। न हि कारणान्येव कारणमिति। हन्तैवमपि कर्म विभागे स च पूर्वसंयोगध्वंसे स

(१) तथा चानवस्थादि दोषापत्तिरित्यर्थः।

चोत्तरसंयोगे करणं स्यात् तत् कारणत्वे सति तन्नैरन्तर्यादिति चेत् । बाढम् । यदि च करणे व्यापारवत्त्वनियमस्तदात्र निर्व्यापारे करणत्वशङ्का नास्त्येव । हन्तैवं हस्तश्छिदाकरणं न स्यात् छिदया समं नैरन्तर्येण सम्बन्धाभावात् । तथा च हस्तेन परशुना वृश्चतीति न स्यात् हस्तस्याकरणत्वादिति चेत् । न । न हि परशुं व्यापार्य हस्तो विरमति यदि तु स विरमेत्तदा परशुः पतेत् । नतु स पात्येत यत्र तूत्तरकरणं व्यापार्योत्पाद्य वा प्रथमं करणं विरमति तत्समद्रव्ये च प्रधानक्रियायामाद्यं तद्वितीयकरणक्रियायां करणं यथा अनुयाजप्रयाजौ । अत एव प्रधाने रागादङ्गे वैधी प्रवृत्तिरन्यथा भयत्रापि राज्ञैव सा स्यात् द्वयोः स्वर्गसाधनत्वाविशेषादिति(१) । हन्तैवमपि सुखदुःखयोः स्वभोगे करणता स्यात् ताभ्यामव्यवधानेन स्वभोगस्यावश्यमुत्पादनाहिति चेन्न । तादृशव्यापारवत एव कारकस्य मया करणत्वोपगमात् सुखदुःखयोश्च तादृशव्यापाराभावात् । आस्तां वा ते अपि तत्र करणे अयोगव्यवच्छेदेन सम्बन्धात् । न चैवं सुखेन भुङ्क्ते इत्यपि स्यात् । ईदृशसूक्ष्मेक्षिकावतां भवत्येव । अत एव मांसेन भुक्त्वा तृप्तो भवतीति मैत्रेयप्रयोगो घटते । व्यापारश्च तज्जन्यत्वे सति तज्जन्यजनकः(२) । अत्र व्यापारिवारणायाद्यं फलवारणाय त्वन्यं विशेषणं यथा यागस्यापूर्वमनुभवस्य संस्कारः । तृतीयलिङ्गपरामर्शस्तु न करणं किन्तु व्याप्तिस्मृत्यात्मकस्य करणस्यासौ व्यापारः । यत्राप्याप्तोक्तश-

(१) तथा च प्रधाने मुख्यफलेच्छया प्रवृत्तिर्भवति अङ्गे च प्रधानेच्छया इति वस्तुस्थितिः । एवञ्चोभयोरपि मुख्यफलसाधनत्वे उभयत्रैव मुख्यफलेच्छया प्रवृत्तिः स्यादिति भावः ।

द्वयोनिस्तृतीयलिङ्गपरामर्शस्तत्रापि व्याप्तिस्मृतिरादौ पदार्थज्ञानं विना वाक्यार्थधियो ऽनुदयनियमात् ॥

ननु लिङ्गाभासजन्या यत्र प्रमाभूतानुमितिस्तत्र तत्प्रामाण्यमीश्वरतृतीयलिङ्गपरामर्शरूपानुमानात् गुणजन्यमिति तावदात्थ तत्र हि स व्यापारभूतो न भवति नित्यत्वादिति चेत् । सत्यम् । जगत्कारणत्वात्तदत्रापि कारणं तत एव चानुमानकर्तुस्तस्य गुणादनुमितिः प्रमा । करणस्तु तत्रापि अनुमितिभाज एव तृतीयपरामर्शजननी व्याप्तिस्मृतिरिति । शब्दसाक्षात्कारे तु यद्यपि इन्द्रियसन्निकर्षो न व्यापारो नित्यत्वात् । तथापि आद्यः शब्द एव तत्र श्रोत्रस्य व्यापारः । ननु कर्मणः कथं करणकोटौ प्रवेशः उपाधिसमाधिवेशादित्युक्तं प्राक् । यत्तु चक्षुर्घटसंयोगं व्यापारमुदाहृत्य घटस्य कारणकोटिप्रवेशमाशङ्क्य तदपि माभूदित्याशयेन बाधे ऽन्यसाम्यादित्युक्तम् । तदयुक्तम् । न हि घट इन्द्रियसंयोगे तद्व्यापारभूते निविशते इन्द्रियाजन्यत्वात् किन्तु घटबहिर्भावेणैवेन्द्रियसंयोग इन्द्रियव्यापार इति भ्रमः ॥

ननु करणस्य प्रधानक्रियया समं नैरन्तर्यमुक्तं तदुयागे नास्ति अपूर्वेण स्वर्गव्यवधेरिति चेन्न । स्वाङ्गस्याव्यवधायकत्वात् प्रथमगृहीततत्कारणतानिर्वाहार्थमेवापूर्वस्य तन्निर्वाहकस्य यागव्यापारत्वेनाक्षेपणात् । यत्र तु निरन्तरयोः सम्बन्धग्रहे सति पश्चात्तद्द्वारा पूर्वतमस्यापि सम्बन्धो गृह्यते तत्र मध्यमजं प्रत्येव पूर्वतमस्योपयोगः । तेनैव च तस्य व्यवधिर्यथा पुत्रजन्ये घटे तत्पितुः । एतेन फलाव्यभिचारिव्यापारकत्वं करणत्वमित्यपि समर्थितम् । यद्वानेव करोति तत्करणमिति । कर्ता स्वजन्यासु सर्वास्वेव क्रियासु यत्कारकमपेक्षत एव तत् करणम् । कर्मा-

दिचतुष्कन्तु नैवं तेषां सर्वत्रानपेक्षणात् । करणमेव तथा तेन विना कर्तुः क्रियाप्रचयानुदयात् । एवं यद्वानेव प्रमिमीते तत्प्रमाणं केन प्रमितिकारकेण सहित एव कर्ता प्रमिमीते करणेनेति ब्रूमः । तथा हि प्रमितौ सम्प्रदानापादाने तावदसम्भाविते एव । अधिकरणन्तु प्रमितेः प्रमातैव । न च स एव तद्वान् भवति मेयस्य चाधिकरणं नावश्यकम् आत्मादेर्निरधिकरणस्यापि प्रमेयत्वात् । यत्राप्यस्ति तत्रापि न नियतभानं घटः पट इत्यादिप्रमितेरपि दर्शनात् । कर्म तु प्रमितौ पाक्षिकं अनागतादेरपि प्रमितेः । विषयमात्रन्तु न कर्म अकारकसाधारण्यात् । करणन्तु प्रमितौ नियतमेव तेन विना प्रमित्यर्जनासम्भवादिति । अत एव करणस्य यश्चरमो व्यापारः स न करणं न वा प्रमाणं तस्य निर्व्यापारत्वेनाकारकत्वात् व्यापारवत्कारणस्यैव मया कारकत्वोपगमात् । तद्विशेषस्य च करणत्वात् ॥

नन्वन्यथासिद्धनियतप्राक्सत् कारणं तदेव सव्यापारं कारकं तदेव साधकतमं करणमिति तावन्न्यायमतम् । तथा च व्यापारविशिष्टस्य करणतां गतस्य व्यापारान्तरान्वयाभावात् करणमपि करणं न स्यात् । मैवम् । यत्र रूपं तत्र स इतिवत् यस्य करणं तस्य व्यापारान्वय इति व्याप्त्युपगमात् । घटमुद्यम्य निपात्य प्रत्याक्षालयतो घटः कर्मैव करणं स्यात् तद्वानेव हि तं क्षालयति नातद्वानिति चेत् । अबोधात् । न हि यद्वानित्यत्र यत्पदेन वस्तुमात्रमुक्तं प्रमेयत्वादावति व्याप्तेः । नापि कारकमात्रं तत एव । नापि प्रकृतक्रियाकारकमात्रं पटस्यापि स्वक्षालने करणतापत्तेः । नापि प्रकृतक्रियाकरणमात्माश्रयादननुगमाच्च । किन्तु कर्तुः स्वक्रियायां क्रियात्वेनावश्यापेक्षणीयं कार-

कमुक्तं क्रियात्वेन हि रूपेण क्रियाभिः करणमेवापेक्ष्यते करणं विना क्रियामात्रस्यैवानिष्पत्तेः। कर्मादि तु नैवं तेषां सर्वासु क्रियास्वन्वयनियमाभावात्। कर्मादिकं चतुष्कं विनापि क्रियोदयदर्शनात्। एवं कर्मणि पटे कः प्रसङ्गः। न हि स क्षालनेन क्रियात्वेनापेक्ष्यते किन्तु क्षालनत्वेनैवेति विद्धि॥

ननु चक्षुरादेः परस्परव्यभिचारितया यद्वानेव प्रमिमीते इति न घटत इति चेत्। भ्रान्तोऽसि। प्रमया फलेन परिचायितं करणं प्रमाणमित्युच्यते। तथा च प्रकृतां प्रमारूपां क्रियां यद्वानेवार्जयतीति वचोभङ्ग्यापि प्रमाकरणमेव प्रमाणमुक्तं भवति। प्राक् करणे लक्षिते प्रमाणलक्षणाय तत्र प्रमान्वयमात्रस्य विधित्सितत्वात्। प्रमाकरणवत एव प्रमार्जनं नातद्वत इति नियमाच्च। ननु किं करणत्वं साधकतमत्वं तच्च निरुक्तम्। अथ करणत्वेनयानि लक्षयसि तेषां किमेकं रूपं लक्षतावच्छेदकमिति चेत्। धिङ्मूर्ख समनियतयोरेवैकं लक्ष्यतावच्छेदकं अपरं लक्षणं पृथिवीत्वगन्धवत्ववत् स्वबोधमेवैतत्। नापि साधकतमत्वं करणत्वमित्यादौ पौनरुक्त्यमर्थाभेदादिति देश्यं विवरणरूपत्वात् विवरणत्वेनैव विशेषात्। नाप्यात्माश्रयः पिकः कोकिल इत्यत्र। यथा कोकिलः पिकपदार्थ इत्यर्थस्तथा साधकतमत्वं करणपदार्थ इत्यत्रापि पदार्थान्तर्भावेनात्माश्रयापनोदात्। यदभावात् कर्तृकर्मणी न क्रियां जनयतः तत्त्वं करणत्वमिति वा। कर्त्रा क्रियात्वावच्छिन्नकार्ये कर्तव्ये स्वसहकारितया यदवश्यमपेक्ष्यते तत् करणम्। कर्मादिचतुष्कं नैवं तस्य क्रियासामान्येऽनावश्यकत्वात्। कर्त्रा च करणेन च विना कापि क्रिया नोदेतीति। एवं प्रमातृप्रमेये यदभावात् प्रमां

न अनयतस्तत् प्रमाणं प्रमात्रा हि प्रमात्वावच्छिन्ने कार्ये कर्तव्ये स्वसहकारितया यदवश्यमपेक्ष्यते तत् प्रमाणम् । प्रमेयाधिकरणे तु नैवं तयोः प्रमासामान्ये ऽनावश्यत्वात् प्रमात्रा च प्रमाणेन च विना कापि प्रमा नोदेतीति कर्म-प्रमेयपदे त्वत्र निरुक्तिद्वये सम्पातायाते न कर्तृवत् कर्मापि क्रियासामान्येऽपि प्रमातृवत् प्रमेयमपि जन्य-प्रमासामान्ये हेतुर्येनोक्तिसम्भवो ऽपि स्यात् । यच्च द्विक-र्तृके क्षेत्रस्य करणत्वमापादितं तदबोधात् । न हि भगवता क्रियासामान्योत्पत्तये क्षेत्रज्ञोऽपेक्ष्यते अङ्कुरोत्पत्त्यादाव-नपेक्षणात् । करणन्तु तत्राप्यपेक्षत एवेति । चरमव्या-पारवत्त्वं वा तत्त्वम् । कारकव्यक्त्यन्तरापेक्षया करणस्यैव चरमो व्यापारः । न च हस्ताद्यव्याप्तिः तद्व्यापारस्यापि परशुकाष्ठसंयोगपर्यन्तमनुवृत्तौ हस्ते ऽपि लक्षणसत्त्वात् । अनुवृत्तौ तु छिदायां हस्तस्य न करणत्वं किन्तु परशुव्यापार एवेति मदुपगमात् । अनुमानस्य तु व्याप्तिस्मृत्यात्मकस्य च-रमो व्यापारो विशिष्टपरामर्श एव । ईश्वरज्ञानजन्ये ऽपि घट-पटादौ क्षेत्रज्ञस्य यत्नादिर्न चरमः किन्तु तत्रापि तज्जन्यो दण्डवेमादिव्यापार एव तथेति । ननु पटक्षालने निर्णेजकस्य-व्यापारो जलरूपो यद्यपि न चरमस्तथापि काष्ठपटसंयोग-रूपश्चरम एव स च हस्तवत्पटस्यापीति पटः कर्मवत् स्व-क्षालने करणमपि स्यादिति चेत् । न । क्रियात्वेन क्रियया कर्तृकरणे एवापेक्ष्येते इति नान्यत्र प्रसङ्गगन्धोऽपीति तत्रा-पि करणस्यैव चरमो व्यापारः कर्तृव्यापारेण प्रयत्नेन चेष्टा-या एव निर्माणात् । तथा च क्रियात्वेन क्रियया यत्कार-कमपेक्षते तत्करणमिति प्रागुक्तं तदेव चरमव्यापारकं सत्करणमित्यधुनोच्यते । अस्तु वा मांसवत्पटेपि तृतीया अनन्तरफलकत्वं वा तत्त्वम् । फलं हि प्रधानक्रिया सा च

क्रियात्वेन रूपेण कर्त्तृकरणे एवापेक्षते न तु कर्मादि चतुष्कं तस्य क्रियामात्रे व्यभिचारात्। तत्रापि करणस्यैव व्यापारोऽनन्तरफलको भवति कर्त्तृव्यापारस्य यत्नादेः करणव्यापारेणैव व्यवधापितत्त्वात्। करणस्य तु करणव्यापारेण न व्यवधापनम् स्वाङ्गत्वात्। नन्वेवं लिङ्गपरामर्शेण व्यापारेण चक्षुरादिकमप्यनुमितौ करणमस्त्विति चेत्। न। व्यभिचारेण हि तेषामनुमितौ कारणतापि नास्ति दूरे तु करणताशङ्केति। हंत तर्ह्यव्यभिचारितया अनुमितौ मनः करणमस्तु वाढम्। तर्ह्यनुमितिरिन्द्रियजन्यतया साक्षात्कारिणी स्यादिति चेत्। नूनं स्मृतावप्येवं वक्ष्यसि। तत्रापि मनोजन्यतया साक्षात्त्वमप्यस्त्वित्यपि ब्रूम इति। चेत् नूनमज्ञोसि यत आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति शातपथी श्रुतिश्चतस्रः प्रतिपत्तीः प्रत्यक्षपरोक्षप्रख्यानाः प्राह लोकोऽप्येवमेव व्यवहरति त्वं पुनस्तदुभयविरोधी प्राज्ञम्मन्यः कथमुत्पथं यासि। मनोजन्यत्वाविशेषेपि कथं त्वदुक्तं वैलक्षण्यमिति चेत्। इत्थं इन्द्रियजन्यत्वेनेन्द्रियजन्यसाक्षात्कारः लिङ्गपरामर्शजन्यानुमितिःवाक्यजन्या शाब्दी सादृश्यवैसादृश्यान्यतरधीकरणिका उपमितिः संस्कारजन्या स्मृतिः। इयं च याचितमण्डनमिव याथार्थ्यं दधत्यपि न प्रमेति चतस्र एव प्रमाः चत्वार्येव तत्करणानि प्रमाणानीति। हन्तेन्द्रियार्थसन्निकर्षोत्पन्नमव्यभिचारि प्रत्यक्षमिति तावन्मुनिनोक्तं तदिदं न प्रत्यक्षप्रमामात्रलक्षणमीश्वरप्रत्यक्षाव्याप्तेः। नापि लक्षणोपलक्षणमाधिक्यात् इन्द्रियोत्पन्नमित्येतावतैव तत्सम्भवादिति चेत्। उच्यते। साक्षात्त्वं प्रत्यक्षधीमात्रलक्षणं तदेव प्रमात्वेन विशेषितसाक्षात्कारिप्रमितीनां एतदुपलक्षणाय विभागाय तद्विशेषलक्षणाय च सूत्रम्। साक्षात्त्वं तु जातिः साक्षा-

त्करोमीत्यनुगतमतिसाक्षिका अतो न लक्षणस्य दुर्ज्ञेयता लक्ष्यतावच्छेदकं तु ज्ञानाकरणकज्ञानत्वमतो न लक्ष्याणामसंग्रहः । तथा च ज्ञानाकरणकानि ज्ञानानि साक्षात्त्ववन्ति तेभ्यो भिद्यन्ते साक्षात्कारित्वादिति व्यतिरेकी । एवं च प्रत्यक्षं लक्ष्येतरेभ्यो भिद्यत इत्यत्र साध्ये ऽनुमेयाभावः लक्ष्यादन्येषां लक्ष्यादन्यत्वे प्रतीयमाने लक्ष्याणामपि तेभ्योऽन्यत्वं तदैव प्रतीतमित्यपास्तं साक्षात्त्वरहितेभ्यो भिद्यत इत्यस्य साध्यत्वात् । जन्याजन्यविभागतल्लक्षणाप्तये च सौत्रो निर्देशः तथाहि तच्च प्रत्यक्षं द्वेधा अजन्यं जन्यञ्च तत्राजन्यं भगवज्ज्ञानं तस्य तु साक्षात्त्वं च धर्मिग्राहकप्रमाणसिद्धम् । जन्यमपि द्वेधा षोढासन्निकर्षान्यतमजन्यं तदजन्यञ्च तत्राद्यस्यार्थत्वेनार्थजत्वं लक्षणम् आत्मानुमितिस्मृतिशाब्दास्तु यद्यप्यात्मना तासामनुभूतेन जन्यत्वे तथापि न तत्रात्मनोऽर्थत्वेन जनकता किन्तु समवायित्वेन अन्यथा जन्यत्वाविशेषात् सर्वा एवात्मधियः परोक्षा एव वा प्रत्यक्षा एव वा स्युः । अर्थत्वेनार्थजन्यधियां तु षोढासन्निकर्षान्यतमजन्यत्वं लक्षणं जन्यसाक्षाद्धीमात्रस्य तु इन्द्रियत्वेनेन्द्रियजन्यत्वं एता अपि द्वेधा षोढान्यतमजन्यास्तदजन्याश्च तत्राद्या गन्धादिधियः अन्त्यास्तु योगिधियः तथाहि योगजधर्मसंस्कृतेन मनसा चक्षुरादिना वा व्यवहितेषु विप्रकृष्टेषु चक्षुषा रूपवत् स्वपरमाणुष्वपि जन्यते । तदुक्तम् ।

तत्राप्यतिशयो दृष्टः सस्वार्थानतिलङ्घनात् ।
दूरसूक्ष्मादिदृष्टौ हि न रूपे श्रोत्रवृत्तिता ॥ इति ।

तथा च भगवज्ज्ञानं योगजप्रत्यक्षं च द्वयमलौकिकमेव सामान्यलक्षणया तु यद्धमादिप्रत्यक्षं तच्चक्षुःसन्निकृ-

षृांशे लौकिकं शेषे त्वलौकिकम् । एवं सर्वे व्यवसायानुव्यसाये लौकिका व्यत्यये त्वलौकिका इत्युभयेऽप्यमी लौकिकालौकिकरूपा इति । एवञ्चानागतगोचरसाक्षात्कारहेतुप्रत्यासत्त्यजन्यप्रत्यक्षत्वं लौकिकप्रत्यक्षाणां लक्षणं लक्ष्यतावच्छेदकं तु तेषां सामान्यप्रत्यासत्त्यजन्ययोगजधर्माजन्यस्वविषयकसविकल्पकाजन्यजन्यप्रत्यक्षत्वं सन्निकृष्टे हि धूमे संयोग एव प्रत्यासत्तिः न तु धूमत्वमेवं व्यवसाये संयुक्तसमवाय एव मनसः प्रत्यासत्तिः न तु ज्ञानलक्षणा अतस्तेऽपि ज्ञाने तयोरंशयोर्ज्ञानसामान्यप्रत्यासत्त्यजन्ये एवेति तदंशे लौकिकप्रत्यक्षे एवेति तदिन्द्रियजन्यत्वं जन्यप्रत्यक्षस्य तावल्लक्षणमुक्तम् तदयुक्तम् प्रत्यक्षविशेषाणामनुगतैकरूपाग्रहे इन्द्रियजन्यत्वग्रहणासम्भवात् । हन्त जन्यप्रत्यक्षत्वमेव तेषामेकमवच्छेदकं रूपमित्यपि न । जन्यत्वेऽप्यवच्छेदकं रूपमित्यस्यापि मया सुवचत्वादिति मैवम् । जन्यत्वे प्रागभावप्रतियोगित्वमवच्छेदकमिन्द्रियजन्यहेतुजन्यप्रत्यक्षमिति मदुपगमात् । हन्तैवं जन्यप्रत्यक्षत्वमेव तेषामितरभेदकमस्तु न तु नियमतश्चरमवेद्यमिन्द्रिजन्यत्वमिति चेत् । न । उपायस्यानुपायतादोषो न तूपायान्तरसंभव इत्याचार्यवचसैव निरस्तत्वात् अमी प्रत्यक्षविशेषा इन्द्रियजन्या इत्यादिना आक्षेपदेशेन द्रागिन्द्रियजन्यत्वस्यैवावगमसम्भवाच्च । एवमर्थजन्यत्वादावप्यूह्यम् । ननु साक्षात्कारिविज्ञानं स्वविषये साक्षात्कारि भवतु जातेः साधारण्यादिति चेत् । धिङ्मूर्ख यदि स्वाविषयः कथं विषयसमीयं स्वाविषय इति । अथ सोपि स्वविषय एव कथन्तर्हि स्वाविषयो विरोधात् । ननूक्तिदोषोयं तथा च साक्षात्कारिज्ञानं स्वविषयमिव तदन्यमपि प्रतिसाक्षात्कारि भवतु

यथा गौः सर्वं प्रति गौरिति चेत् । वाढम् । साक्षात्त्वं हि जातिर्गोत्ववत् सर्वसाधारणी । यथा हि गौः सर्वं प्रति गौस्तथा साक्षात्कार्यपि सर्वं प्रति साक्षात्कार्येव सर्वैस्तथा व्यवह्रियमाणत्वादिति यथा तस्याः साक्षाद्धियो व्यवहर्तृषु साधारण्यं तथा विषयेष्वपि साधारण्यं ब्रूम इति चेत् । हन्त तस्याः साक्षात्त्वं नानानिरूप्यं जातित्वादिति साक्षात्कारिणी भवत्येव किन्तु विवक्षितविवेकेन सर्वविषया सा भवत्वित्यापादनार्थः । स चायुक्त आपादकाभावात् । न हि घटमात्रविषयाया धियः पटविषयत्वे किमप्यापादकमस्तीति । साक्षात्त्वञ्च साक्षात्करोमीत्यनुगतानुव्यवसायसाक्षिकमिति न तत्र मानान्तरापेक्षा नापि निर्वचनापेक्षा जातित्वेनाखण्डत्वात् गोत्वादिवत् । एवञ्च ज्ञानाकरणकानां ज्ञानानां साक्षात्कारित्वं तच्च जातित्वरहितेभ्यः (१) साक्षात्कारिणां भेदधीजनकमिति सिद्धम् । इन्द्रियार्थेत्यादि तु तदुपलक्षणम् । न चात्राधिक्यं एकैकमेव तदुपलक्षणात् अवान्तरलक्षणाच्च । अस्तु वा लक्षणस्य प्रत्यक्षव्यवहारसाधकत्वम् । तथाहि इदं हि लक्षणवाक्यं वादिवाक्यत्वादन्यप्यप्रामाण्यशङ्काग्रस्ततया नाहत्य व्यवहारयति तथापि न्यायप्रयोगवदनुमानमुत्थाप्य व्यवहारयिष्यति । तद्यथा उक्तज्ञानानि प्रत्यक्षत्वेन व्यवहर्तव्यानि साक्षात्कारित्वात् । अयं च अन्वयी न सम्भवत्यन्वयाग्रहादिति व्यतिरेकितया परिणमत इति तावत् न्यायमतम् । तत्खण्डनन्तु व्यवहारविशेषो लक्षणसाध्यः तत्कर्तव्यता वा । नान्त्यः । न हि तदनभिज्ञः तत्कर्तव्यतां ग्राहयितुं शक्यः न हि वह्न्यनभिज्ञो वह्निसम्बन्धं ग्राह्यते । अथ व्यवहारवि-

(१) साक्षात्त्वरहितेभ्य इति २ पुस्तके पाठः ।

शेषाभिज्ञ एव लक्षणोद्देश्यो व्यर्थः कथन्तर्हि लक्षणं तत्फलस्य व्यवहारविशेषस्य स्वतः सिद्धत्वात्। आद्येऽपि व्यवहारविशेषो लक्षणेनानुमेयो न तु जननीयो मानस्य मेयाजनकत्वात्। तथा च स ज्ञानविशेषजन्यो वाच्यः ज्ञानविशेषश्चार्थविशेषाधीनः ज्ञानस्य स्वतो विशेषाभावात्। अर्थविशेषश्च न प्रमामात्रात् सिध्यति अतिप्रसङ्गात्। न हि घटप्रमया पटरूपोऽर्थविशेषः सिध्यति। नापि तत्तदर्थोपलक्षितप्रमया तत एव। नापि तत्तदर्थविशेषितप्रमया आत्माश्रयापत्तेः। तदुक्तम्।

नात्यापत्त्या(१) प्रमामात्रात्ते तेऽर्थाः स्वीक्रियोदिताः।
तद्धियस्तदुरीकारे स्वाश्रयं कश्चिकित्सतु॥

न च तत्तदर्थाहितविशेषया प्रमया अर्थविशेषसिद्धिः ज्ञानस्यार्थाहितविशेषाङ्गीकारे हि साकारपक्षप्रवेशः स्यात्। तदुक्तम्।

अथान्यः सविशेषश्चेत्तद्धीत्वं कश्चिदिष्यते।
दत्तः साकारवादाय विष्टरः(२) स्पष्टमेव तत्॥

अथ तद्धीत्वमनुमात्वादिवदर्थादुत्थास्नुस्तदार्थमन्तरेणैव स्यादित्यर्थो विलीयेत। तदुक्तम्।

अर्थादुत्थास्नवो(३) धर्मा नानुमात्वादयो यथा।
तद्धीत्वमपि तद्वत्स्या(४)दित्यर्थोऽनर्थमाविशेदिति॥

तस्मिन्नपि तद्धीविशेषे तद्विषयकस्तद्धीविशेषः प्रमाणमेवं तत्राप्येवं तत्रापि। तथा चानन्तायां तद्धीविशेषधारायां तद्धीनिर्वचनोक्तदूषणानि प्रसज्जतीत्याशयेन

(१) अत्यापत्तिः अतिप्रसङ्गः पटप्रमातोऽपि घटप्रसिद्धिलक्षणः।
(२) विष्टरः आसनम्।
(३) उत्थास्नवः उत्थितिशीलाः।
(४) तद्वत् स्यात् अर्थादुत्थितं न स्यादित्यर्थः।

सोऽपि वा धीविशेषः किं स्वीकार्यस्तद्धियं विना ।
एवञ्च सोऽपि सोऽपीति नान्तः सोपानधावने[(१)] ॥

एवमेष दोषो मन्मतानुसारेण परन्न लगतीति प्रश्नपूर्वकमाह

समस्तलोकशास्त्रैकमत्यमाश्रित्य नृत्यतोः ।
का तदस्तुगतिस्तद्वद्वस्तुधीव्यवहारयोः[(२)] ॥
उपपादयितुं तैस्तैर्मतैरशकनीययोः ।
अनिर्वचनतावादपादसेवा गतिस्तयोः[(३)] ॥

अत्र ब्रूमः । यो हि तास्ताः प्रत्यक्षव्यक्तीः प्रत्यक्षतया व्यवहरति व्यवहारः सनिमित्तक इति च जानाति अप्रत्यक्षव्यवहारे किं निमित्तमिति बुभुत्सते तं प्रति साक्षात्कारित्वं लक्षणमुपतिष्ठते । तच्च साक्षात्कारित्वमनुमानच्छायामवलम्ब्य व्यवहारयति तत्रापि साक्षात्कारित्वव्यवहारयोः पक्षादन्यत्रासतोरन्वयव्याप्त्यनवधारणात् लक्षणं व्यतिरेक्यनुमानमिति पर्यवस्यति । ननूक्तव्यवहारोत्पत्तये ज्ञप्तये वा नानुमितिः व्यवहर्तरि तयोः सत्त्वादेवेति चेत् । मैवम् । प्रत्यक्षधियां प्रत्यक्षत्वेन व्यवहारः साक्षात्कारित्वनिबन्धनः निबन्धनान्तराभावे सति सनिबन्धनत्वात् साक्षात्कारित्वान्वयव्यतिरेकानुविधायित्वाद्धेत्यस्य मानार्थत्वात् । एतेन प्रत्यक्षत्वेन व्यवहारः प्रत्यक्षपदप्रयोगरूपः सोऽपि तत्प्रयोगे साक्षात्कारित्वस्यान्वयव्यतिरेकितयैव सेत्स्यति किं तदर्थं लक्ष-

---

(१) सोऽपि धीविशेषः घटधीविशेषः किं तद्धियं घटधीविषयकधियं विना, स्वीकार्यः न स्वीकार्य इत्यर्थः । एवञ्च सोऽपि सोऽपि घटधीधीगोचरधीविशेषादिरपि स्वस्वगोचरधियं विना स्वीकार्य इति सोपानधावने ऽनवस्थेत्यर्थः ।

(२) तत् तस्मात् समस्तलोकशास्त्रयोरैकमत्यमाश्रित्य नृत्यतोः भासमानयोस्तत्तद्वस्तुव्यवहारतत्तद्धीव्यवहारयोः का गतिरस्तु इत्यन्वयः ।

(३) तैस्तैर्मतैरुपपादयितुमशकनीययोस्तयोरनिर्वचनतावादपादसेवा गतिरित्यन्वयः ।

णप्रणयनेनेत्यपास्तम् । अन्वयव्यतिरेकाभ्यामपि प्रत्यक्ष-शब्दवाच्यत्वादिकमपि यदवगन्तव्यं तदपि व्यतिरेकव्याप्तिबलेनैव न त्वेतद्व्यतिरेकयोः सामानाधिकरण्यमात्रबलेन अप्रयोजकत्वात् । तस्माच्चतुर्थविकल्पोऽयं नानिष्टाय । एवञ्च जवगडदशादिशब्दवाच्यतानुमानमप्यपास्तं व्यतिरेकव्याप्तिविरहात् । एवं युक्तो व्यतिरेक्यनुमानात्मकस्य लक्षणस्य प्रयोगः । व्यवहारविशेषश्च प्रत्यक्षत्वेन व्यवहारः तद्धेतुश्च ज्ञानगतो विशेषः स च साक्षात्कारिलक्षणजातिरूपः । एवञ्च स जातिविशेषो यस्मिन् ज्ञाने ऽस्ति स ज्ञानविशेषस्तज्जातियोगेन हेतुना प्रत्यक्षत्वेन प्रकारेण व्यवह्रियते । न च साध्यप्रसिद्ध्यप्रसिद्ध्योर्दोषः घटप्रत्यक्षादौ प्रसिद्धस्य प्रत्यक्षत्वव्यवहारस्यान्वयव्याप्त्यप्रतिसन्धाने ज्ञानाकरणकज्ञानत्वावच्छेदेन साक्षात्कारित्वेन व्यतिरेकिणा साधनात् । इतरभेदानुमाने न्यायाचार्या अप्येवमिति सर्वं सुस्थम् ॥

ननु भवत्वेवं तथापि प्रमामात्रेण वा अर्थविशेषः स्वीकार्यः तदर्थविषयकप्रमया वा तदर्थाहितविशेषया वा । प्रमयेत्यत्र न किञ्चिदुक्तमिति चेत् । त्वयापि न किञ्चिदुक्तम् । तथाहि न हि प्रमया स्वीकारो ऽभेदात् किन्तु प्रमाणेन अर्थार्थान्विताभ्युपगमस्वीकारः । तत्र यथोक्तत्रितयमध्ये किं निमित्तमिति मद्वाक्यार्थ इति चेत् । तेनार्थेन समं स्वभावसम्बन्धेन यथार्थबोधेन स स्वीकार्य इत्यवेहि । तथा चार्थो ज्ञाने विशेषणम् । ज्ञानस्य तु तदर्थकस्य तदर्थव्यवहारजनने उपलक्षणं रूपवति रस इत्यत्र यथा धर्मिणि रूपं विशेषणं रसवृत्तौ तूपलक्षणं आश्रयव्यवच्छेदकत्वे सति क्रियानन्वयित्वात् । न हि ज्ञानं विशिष-

न्नप्यर्थो व्यवहारं जनयत्यतितादिसाधारण्यात् । नापि व्यवहारं विशिषन्नप्यर्थो ज्ञानेन जन्यते ज्ञानस्य तत्प्राक्सत्त्वनियमाभावात् । नाप्यर्थो ऽर्थेन जन्यते आत्माश्रयादित्यगत्यैवार्थस्योपलक्षणतेति तदेव तत्रैव तदैव विशेषणञ्चोपलक्षणञ्चेति महद्वैशसमिति चेत् । न । अबोधात् तत्र हि तद्विशेषणमेव घटे रूपवत् ज्ञानस्य तु प्रत्यक्षव्यवहारार्जने ऽनङ्गत्वादुपलक्षणं शेषमशेषं प्रत्यक्षखण्डनं कल्पितदूष्यत्वादुपेक्षितमिति। ननु साक्षात्त्वं जातिरव्याप्यवृत्ति तथा च परमाणौ । ननु व्यवसायो व्यवसाय इव परमाणोरपि साक्षात्कारी स्यादिति चेत् । वाढं किन्तु स व्यवसेयांशे त्वलौकिको ज्ञानलक्षणप्रत्यासत्तिजन्यत्वात् । व्यवसाये तु लौकिकः संयुक्तसमवायजन्यत्वात् । हन्तैव. लिङ्गबुद्धिलक्षणया प्रत्यासत्त्या वह्निरपि मानसो ऽस्त्विति चेत् । कथं लिङ्गबुद्धिः । वह्निनिरूपितव्याप्त्युपहितपक्षधर्मधूमधीर्विशेषणविशेषणं वह्निमपि स्पृशन्ती भवति वह्निमनसोः प्रत्यासत्तिरिति ब्रूम इति चेत् । तर्हि तादृशलिङ्गधीर्मानान्तरमित्यकामेनाप्युपेयं तदवष्टम्भेन मनसो बहिः प्रवृत्तेश्चक्षुर्वत् । एवं प्रत्यभिज्ञापि साक्षात्त्ववती तमिमं साक्षात्करोमीति प्रतीतेः । ननु साक्षात्त्वस्य(१) व्याप्याश्रयज्ञाने सतो योग्यत्वेनावधारणे प्रत्यभिज्ञायां तत्तांशे साक्षात्त्वपरोक्षत्वसंशयो न स्यात् विशेषदर्शने भ्रमानुदयादिति चेत् । स्थाणुपुरुषसंशयवन्नायं सार्वलौकिकः(२) किन्तु तत्तद्दर्शनप्रामाण्याभिमानिनां विप्र-

(१) अत्रादर्शत्रये ऽपि द्वित्राण्यक्षराणि विलुप्तानि तत्र "व्याप्याश्रय" एवमनुमीयते ।

(२) अत्रापि पूर्ववदेवाक्षराणि विलुप्तानीति ।

तिपत्तेः परीक्षकाणामेवायं नित्यानित्यसंशयवत् । ननु स्वात्मानुमितिरात्ममनोरूपेन्द्रियार्थसन्निकर्षजत्वात् साक्षात्कारिण्यपि स्यादिति चेत् । न । तत्रात्मा नार्थत्वेन किन्तु समवायित्वेन मनोऽपि नेन्द्रियत्वेन किन्तु मनस्त्वेन जनकमिति मदुपगमात् । ननु भगवज्ज्ञानं कथं साक्षात्कारि इन्द्रियाजन्यत्वादिति चेत् । कार्यस्योपादानप्रत्यक्षजन्यत्वनियमादिति दिक् ॥

ननु नियतव्यञ्जकाभावात् साक्षात्त्वं न जातिरिति चेत् । न तावन्नियतव्यञ्जकधीपूर्विकैव जातिधीरिति नियमः ज्ञानत्वेच्छात्वयत्नत्वादौ व्यञ्जकस्यैवाभावात् । किञ्च त्वदुक्तरीत्या जातिर्न स्यादेव व्यञ्जकेनैवानुगतमतेरुपपत्तेः । अस्तु वा गोत्वे सास्नेवाननुगतमेव साक्षात्त्वे व्यञ्जकम् । तथाहि अस्मदादिरूपादिप्रत्यक्षे चक्षुरादिजन्यत्वं योगिप्रत्यक्षे योगजधर्मजन्यत्वं भगवत्प्रत्यक्षे धर्मिग्राहकमानम् । एतदनवधारणदशायामेव साक्षात्त्वसंशयो विशेषादर्शनादिति । अस्तु वा ज्ञानाकरणकज्ञानत्वमेव साक्षात्त्वस्य व्यञ्जकम् । न चैवमावश्यकत्वात्तदेव साक्षात्त्वधीविषयोऽस्त्विति वाच्यम् । साक्षात्त्वधीर्हि विधिमुखी सा कथं व्यतिरेकालम्बनास्तु गोत्वधीवत् । अन्यथा गोत्वधीरप्यगवापोहालम्बना किन्न स्यादित्यपोहापातः । तदुक्तं त्वयैव ।

विधिजः प्रत्ययोऽन्योऽयं व्यतिरेकासमर्थनः(१) ।
नैवञ्चेदपराद्धं ते किमन्यापोहवादिना ॥ इति ॥

अनुमानमपि किमुच्यते । लिङ्गपरामर्शोऽनुमानं लिङ्गत्वं व्याप्तपक्षधर्मत्वमिति चेत् । पक्षता हि साध्यस-

(१) व्यतिरेकेणासमर्थनं यस्येत्यर्थः ।

न्देहः । स च पर्वतस्य नोपलक्षणमनुमित्युत्तरमपि अनुमित्यापत्तेः पर्वतस्य तदापि साध्यसन्देहोपलक्षितत्वात् । नापि विशेषणम् । अनुमित्युत्तरं पर्वतः पक्षताविशिष्टः तावन्नास्तीति तत्राऽनुमित्सुर्थिनः प्रवृत्तिर्न स्यात् वह्नेः केवलपर्वतावृत्तित्वात् । धूमः पक्षवृत्तिः वह्निस्तु केवलपर्वतवृत्तिरिति न सम्भवति वैयधिकरण्यापत्तेः । न चैवं वैयधिकरण्यं न दोषः सामानाधिकरण्यरूपव्याप्तिविरोधित्वात् । विशेष्ये पर्वते द्वयोः सामानाधिकरण्यमस्त्येवेति चेत् । तर्हि साधनस्य पक्षधर्मता व्यर्था स्यात् । सा हि न साध्यसामान्यसिद्ध्युपयोगिनी व्याप्तेरेव तत्र सामर्थ्यात् । नापि तद्विशेषसिद्ध्युपयोगिनी प्रतीत्यपर्यवसानस्यैव तत्र सामर्थ्यादिति । सिद्धसाधनपरिहारमात्रार्थं सेष्टव्या । सिद्धसाधनञ्च न स्वार्थानुमाने दोषः आगमेनेत्यादेः । एतेन संशययोग्यतापि निरस्तेति खण्डनम् ॥

तन्न । न हि साध्यसन्देहघटितां पक्षतामाचक्ष्महे प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिका इति टीकाविरोधापत्तेः ।

आगमेनानुमानेन ध्यानात् प्रत्यक्षेण च ।
त्रिधात्मनि प्रमाणानां संप्लवः स्वार्थमिष्यते ॥

इत्यागमविरोधापत्तेः श्रोतव्यो मन्तव्य इति श्रुतिविरोधापत्तेश्च । एतेन संशययोग्यतापि निरस्ता । न चैवं शास्त्रे संशयव्युत्पादनानर्थक्यम् । संकशुकतानिवृत्तये न्यायोपासने तदङ्गत्वोपगमात् । अत एव संशयाभावे ऽपि मन्तव्य इति विधिसमभिव्याहृतवाक्यजनितेष्टसाधनताज्ञानजसिषाधयिषया भगवदनुमानप्रवृत्तिरिति कुसुमाञ्जलावाचार्या अप्याहुः । अस्तु तर्हि सिषाधयिषाघटिता

सा । हन्तानिष्टार्थायामनुमितौ सापि व्यभिचरतीति चेत् । बाढम् । तद्योग्यता तावदस्ति । सापि साधकबाधकमानाभावरूपा श्रुतिस्वरूपसाधकमानावरुद्धे भगवति नास्तीति । उच्यते । सिषाधयिषाविरहसहकृतसाधकमानस्याभावः सा । सा च सर्वत्रैवास्ति । शेषमनुमाननिर्णयेऽध्यवसेयम् । अस्तु वा कापि पक्षता सा तावदनुमित्युत्तरं नास्तीत्यविवादम् । अन्यथा लिङ्गोपहितलैङ्गिकावगाहिन्यामनुमितौ व्याप्तपक्षधर्मलिङ्गभानावश्यकत्वेऽनुमित्यविच्छेदः स्यात् । तथा चानुमित्युत्तरं तत्र पक्षता त्वयाभ्युपेया । तथा च विशेषणाभावाद्विशिष्टः पर्वतोऽपि नास्तीति तन्निष्ठोऽग्निरपि नश्येदिति चेत् । एवं सति हि क्षणभङ्गः स्यात् असद्विशेषणोपरागेण सतोऽपि विशेष्यस्यात्ययोपगमात् स च प्रत्यभिज्ञानबाधितः । किञ्चानुमानेनाग्निनिश्चयं प्रसूय समूलकाषं कषितोऽग्निसंशये विरोधिविधूननान्निष्कम्पा वह्न्यर्थिप्रवृत्तिः स्यादेव । अपि च धूमः पक्षवृत्तिरग्निः पर्वतवृत्तिरतो वैयधिकरण्यान्न व्याप्तिरनयोः तस्याः सामानाधिकरण्यरूपत्वादिति वदन् खण्डनकृद्व्याप्तिपक्षधर्मतयोरबोधमबोधयत् । तथाहि व्याप्तिर्हि अव्यभिचरितसम्बन्धरूपा । सा च समानाधिकरणयोरिवासमानाधिकरणयोरप्यस्ति । कथमन्यथा पृथिवीत्वादिना इतरेषामन्योन्याभावोऽनुमीयते तत्र हीतरे व्याप्याः पृथिवीत्वाभावस्तु व्यापकः । न चेतरे तत्समानाधिकरणा अवृत्तेरपीतरत्वात् । न च तत्रेतरतादात्म्यमेव पृथिवीत्वाभावस्य व्याप्यं तयोश्च सामानाधिकरण्यमस्त्येवेति वाच्यम् । तथा सति हीतरतादात्म्यस्यात्यन्ताभावः पृथिवीत्वेन सिद्धो न त्वितरान्योन्याभावः । इतरतादा-

त्म्यात्यन्ताभावेनेतरान्योन्याभावः पश्चात् साधनीय इति चेत् ! न साधनाभावेनेतरेषामात्मादीनां सामानाधिकरण्याभावस्य वज्रलेपतया केनापि कदापि इतरान्योन्याभावो नानुमातुं शक्येतेत्यस्याप्युक्तप्रायत्वात् । अथ य एवेतरतादात्म्यस्यात्यन्ताभावः स एवेतरान्योन्याभावो न तु ततोऽधिकः स इति चेद्धन्त य एव घटत्वात्यन्ताभावः स एव घटान्योन्याभाव इत्यपि वदिष्यसि ओमिति चेत् समानाधिकरणनिषेधोऽन्योन्याभावो व्यधिकरणनिषेधस्तु संसर्गाभाव इति घुष्यन् पुरुषायुषमनैषीरथेदानीं चरमे वयसि समस्ततीर्थतीर्थिकविरुद्धं प्रलपन्न जिह्रेषि न वा बिभेषीति । तस्मादिदमिह नास्तीदमिदं न भवतीतिविलक्षणधीवेद्ययोः संसर्गाभावान्योन्याभावयोरभेदं वदन् विश्वाभेदाय यतिष्यन्नभेदवादी पर्यवस्यन् भेदासिद्धेरभेदमपि व्यस्यन् भेदादभेदादभेदाभेदाच्च भ्रश्यन् कीदृशः स्या इति । तस्माद्द्वयोरेव सामानाधिकरण्यलक्षणा व्याप्तिः तत्परमेव निबन्धॄणां सामानाधिकरण्यनिर्वचनं न तु व्याप्तिमात्रपरमिति मन्तव्यम् । अत एवाऽव्यभिचरितः सम्बन्धो व्याप्तिरनौपाधिकः सम्बन्धो व्याप्तिरिति च सामान्यमुखी प्राचामपि निरुक्तिः अन्यथा सामानाधिकरण्यमुख्येव सा स्यात् रत्नप्रकाशकृतोऽप्येवमिति । अस्त्वन्यत्र यथा तथा धूमानलयोरेव सामानाधिकरण्यं न स्यादुक्तदोषादिति चेत् । भ्रान्तोऽसि यस्मिन् धर्मिणि साध्यसंशयोऽस्ति तत्र धर्मिणि धूमानलयोः सामानाधिकरण्यं न ब्रूमः न तु पक्षताविशिष्टे धूमवृत्तिमुपेमो येन त्वदुक्तसामानाधिकरण्यं स्यात् । तदयं संक्षेपः संशयादिलक्षणा पक्षता विशेषणं सत्त्वात् सत्यपि धूमादिवृत्तावुपलक्षणं

तद्दत्यनन्वयित्वात् लिङ्गपरामर्शे तु तत्कालेऽसती अदूरविप्रकर्षेण तु सत्यप्युपलक्षणमेव परामर्शानन्वयित्वात् न हि धूमवत् पर्वतवच्च संशयोऽपि ज्ञायमानोऽङ्गं किमर्थं तर्ह्युपादीयते स्वरूपसत्तामात्रेणानुमितेर्नियमनाय लिङ्गपरामर्शस्य चानुगमायेति। हन्तैवं साध्यस्य सामान्यसिद्धिर्व्याप्तितः विशेषसिद्धिस्तु प्रतीत्यपर्यवसानादिति साध्यसिद्धावनुपयोगिन्येव पक्षधर्मतेति तत्खण्डकमपि सिद्धसाधनं नानुमानदूषणं स्यात् अनुमितिप्रयोजकाखण्डनादित्युक्तमिति चेत् किमिदमपर्यवसानं प्रकृतानुमानं वा मानान्तरं वा प्रकृतानुमानस्यैवैकमङ्गं वा नाद्यः पक्षधर्मताविनाकृतस्य तस्याकरणत्वात् तस्याश्च द्वयाङ्गत्वानुपगमात्। नापरः पक्षधर्मतां विना तस्यापि मूकत्वात् तस्मात् परिशेषाच्चरमः कल्पः स्यात् तथा च पक्षधर्मतामेव स्वनाम्ना दूषयसि अपर्यवसाननाम्ना तु मन्यसे सोऽयं शिरश्छेदेऽपि काकणीं न ददाति पञ्चगण्डकांस्तु ददातीतिवदवसीयते ॥

ननु धूमाग्न्योर्देशगर्भा वा कालगर्भा वा उभयगर्भा वा व्याप्तिः नाद्यः व्योमलेलिहानायां धूमधारायां तदालीढव्योमनि व्यभिचारात्। अथ यत्र धूमस्तत्र तन्मूलावच्छेदेन वह्निरिति नियम इति चेत्। न आभीरकुट्यां व्यभिचारात्। अथाविच्छिन्नमूलसततोर्ध्वगतिशीलस्थूलधूमलहरीमूलप्रदेशे वह्निरिति देशगर्भव्याप्तिशरीरमिति चेत्। न। कालान्तरेऽपि तत्र वन्ह्यर्थिप्रवृत्त्यापत्तेः न द्वितीयस्तदा ह्रदेपि वन्ह्यापत्तेः तृतीयस्तु सम्भवति स नाङ्गं तदनवगमेऽपि अनुमित्युदयादिति तटस्थदेशनायां तु उच्यते आद्य एव कल्पः न च कालान्तरेऽपि तत्राग्न्यर्थिप्रवृत्त्या-

पत्तिः यत्र धूमस्तत्र सर्वदा वह्निरिति न व्याप्तिर्येन तथा स्यात् सामान्यव्याप्त्यैव तथा भविष्यतीति चेत्। न। तस्याः किञ्चित्कालीनवह्निमत्तयैव पर्यवसितत्वात् कुतस्तर्हि वर्तमानवह्निसिद्धिः पक्षधर्मताबलात् पक्षतावच्छेदकधर्मसंबद्धं हि साध्यं पक्षधर्मता ग्राहयति तद्बिना प्रतीतेरपर्यवसानात् पक्षतावच्छेदकः पर्वतत्ववत् वर्तमानः कालो ऽपि अयं पर्वतोऽग्निमानित्यनुमित्याकारात्। अस्तु तावदिदमविनाभावसम्बन्धो व्याप्तिरिति यदुक्तं तदयुक्तमन्वये ऽन्वयस्य व्यतिरेके व्यतिरेकस्य व्यभिचारिसाधारण्यादिति मैवम्। अविनाभाव इत्यत्र हि विनाभावपर्युदासे नञ् विनाभावश्च व्यभिचारः तेन व्यभिचारविरोधी सम्बन्धो ऽव्यभिचरितः सम्बन्ध ऐकान्तिकः सम्बन्धो ऽसम्बन्धासहचरः सम्बन्धो यथाग्निना धूमस्य धूमेन त्वग्नेस्तद्विपरीतः तथा च यत्समानाधिकरणान्योन्याभावप्रतियोगिता येन नावच्छिद्यते तेन समं तस्य सम्बन्धो व्याप्तिरिति धूमवान् वह्निमान्न भवतीत्यप्रतीतेः धूमसमानाधिकरणान्योन्याभावप्रतियोगिता वह्निना नावच्छिद्यते तेन वह्निना समं धूमस्य सम्बन्धो धूमस्य व्याप्तिः। हन्तैवं ईदृशेन वह्निना समं ज्ञाप्यज्ञापकत्वादिरपि सम्बन्धो व्याप्तिः स्यात् सामानाधिकरण्यमितिकरणे तु नायं दोषः सम्बन्धमात्रस्य सामानाधिकरण्यरूपत्वाभावात्। अत एव चिन्तामणिकारादयोऽप्येवमिति चेत्। न अविशिष्टव्यावृत्तविशिष्टधीनियामकस्येह सम्बन्धपदार्थत्वात् स च धूमादौ संयोगः रूपरसादौ समवायो वृत्त्यंशिंशपादौ सामान्यविशेषभावादिरिति ज्ञाप्यज्ञापकभाववाच्यवाचकभावादिस्तु न तथा किञ्च सामानाधिकरण्यविशेषस्य व्याप्तित्वे भेदानुमानं न

स्यात् । तथाहि घटः पटो न भवतीतिप्रतीतिसाक्षिक-स्तावदन्योन्याभावो दुरपह्नवः न चायं तद्धर्मात्यन्ताभावात्मैव घटः पटो न घटे पटत्वं नेतिप्रतीत्योः समानाधिकरणव्यधिकरणाभावग्राहितया तयोः समानाधिकरणाभावत्वव्यधिकरणाभावत्वरूपवैधर्म्यासिद्धेः । ननु भवत्वन्योन्याभावो धर्मिप्रतियोगिको धर्मात्यन्ताभावभिन्नः स त्वनुमानान्न ज्ञातुं शक्यते । तथाहि इतरे व्याप्याः पृथिवीत्वात्यन्ताभावस्तु व्यापक इति वाच्यं तच्च इतरेषामवृत्तिघटिततया समानाधिकरणत्वाभावात् व्याप्यत्वस्य च नियतसामानाधिकरण्यरूपत्वात् अस्तु वा अन्यत्किञ्चिद्व्याप्यत्वं तथापि व्यापकस्य व्यतिरेकात् व्याप्यस्य व्यतिरेकः संसर्गाभावात्मा सेत्स्यतीति वह्निव्यतिरेकात् धूमव्यतिरेकवत् स तु न भेदः आकाशसंसर्गाभावस्याकाशेऽपि सत्त्वात् आकाशसंसर्गाभावस्य केवलान्वयित्वात् न चाकाशादाकाशो भिन्नः । ननु यदि तावद्यत्र न पृथिवीत्वं तन्नेतरदिति नरसिंहाकारैव व्याप्तिरतः पृथिवीत्वेनेतरभेद एव सेत्स्यतीति चेत् अस्तु तावदेवं तथापि व्याप्तेराकारोनुगतो वाच्यः स च न सामानाधिकरण्यरूपो नाप्यन्यरूप इति महद्व्यसनं प्राप्तम् । उच्यते व्यभिचारविरोधिसम्बन्धस्तावद्व्याप्तिः अत एव स्वाभाविकसम्बन्ध इति टीकाकृतः अव्यभिचरितः सम्बन्ध इति वार्त्तिककृतः निरुपाधिः सम्बन्ध इति निबन्धकृतः कार्त्स्न्येन सम्बन्ध इति लीलावतीकृतः सामान्यमुखमेव व्याप्तिस्वरूपमाहुः । यत्त्वर्वाचां सामानाधिकरण्येन तन्निर्वचनं तत्प्रसिद्धतरधूमानलादिव्याप्तिमात्रपरं न तु सामानाधिकरण्यगर्भैव व्याप्तिरित्याशयेन अत एव ययोरेव सामानाधिकरण्येनैव परं

नियमसम्भवः तयोरेव सामानाधिकरण्येन व्याप्तिरित्यत्राचार्याणामनिर्भर इति वर्द्धमानोपाध्यायकृतखण्डनोद्धारफक्किकापि सङ्गच्छते। किञ्चान्यथा इतरेषामवादीनां त्रयोदशानां त्रयोदशान्योन्याभाववैधर्म्येण हेतुना साध्यत इति न्यायमार्गो व्याकुप्येत वैधर्म्येणान्योन्याभावस्त्वया साध्य इति खण्डनं च निरालम्बनमापद्यते सामान्यमपहाय विशेषाश्रयणे निर्बीजं च गौरवं स्यात् अवृत्त्यपि व्याप्यमेवं स्यात् यदाकाशं तत्र पृथिवीत्वाभाव इति व्याप्तेरिति चेत् अस्तु तल्लिङ्गस्यापीति चेत् भ्रान्तोऽसि यो धूमः स वह्निमानिति व्याप्तौ यथा धूमत्वं लिङ्गं क्रियते तथात्राकाशत्वमिति उक्तव्याप्तेस्तु फलं यत्र पृथिवीत्वं तन्नाकाशादीति भेदधीरेवेति सर्वं सुस्थम् ॥

व्याप्तिग्रहः सामान्यलक्षणया सकलधूमादिविषयकः कथमन्यथा पर्वतीयधूमस्य व्याप्त्यग्रहे तस्मादनुमितिः । ननु धूमो वह्निव्याप्य इति ग्रहणं स्मरणं च दृष्टान्तधूममात्रविषयकं तथा पर्वतवृत्तिर्धूम इति पक्षधर्मताग्रहणं च त्रयमिति धूमत्वप्रकारकमस्त्वनुमितिजनकं तद्धेतोरेवास्तु किन्तेनेति न्यायात् । तथा च न व्याप्तिग्रहाय सामान्यलक्षणा । अत एव शक्तिग्रहायापि नेयं सन्निकृष्टपिण्डमात्र एव घटो घटपदवाच्य इति शक्तिग्रहात् ततो घटपदात्तद्घटव्यक्तेरेव स्मृतिः ततो वाक्यार्थज्ञानेऽपूर्व एव घटो घटत्वेनान्वयधीविषयीभवतीति नानुमितिशाब्दयोरनुरोधात्सामान्यलक्षणेतिचेत् । न व्याप्यतावच्छेदकप्रकारकं हि ग्रहणं नानुमितिहेतुर्गौरवात् वह्निव्याप्यवानयमिति परामर्शस्थले व्यभिचाराच्च किं तु व्याप्यत्वप्रकारकमेव लाघवात् एवमन्वेष्यत्येव व्यक्तिः शक्तिग्रहे

ऽपि भासते कथमन्यथा तस्या अस्मरणे तदन्वयानुभवः स्यात् विशेषणज्ञानं विना विशिष्टज्ञानानुदयादिति मैवम्। एवं हि तृतीयलिङ्गपरामर्शस्य विशिष्टज्ञानानां विशेषणज्ञानजन्यत्वनियमस्य च बलात् सामान्यलक्षणेति निर्गलितम्। तथा च तदुभयासिद्धौ न सामान्यलक्षणा तदुक्तमसिद्धमसिद्धेन साधयतो महानैयायिकत्वमिति। किञ्च धूमत्वेन वह्निव्याप्तेर्महानसीयधूमे ग्रहात्पक्षवृत्तिधूमेऽपि धूमत्वेन भाते तद्व्याप्तिवैशिष्ट्यं ज्ञायतां एकैव हि सा व्याप्तिरिति तृतीयलिङ्गपरामर्शोऽपि तां विनैवेति किं सामान्यलक्षणया। अथ यदि सामान्यलक्षणा नास्ति तदा पाकादौ चिकीर्षा सुखादाविच्छा च न स्यात् सिद्धे तदसम्भवात् असिद्धस्य चाज्ञानात् तस्मात्सामान्यलक्षणया-सर्वपाकावगतावसिद्धं पाकं पक्षीकृत्य कृतिसाध्यत्वेऽनुमिते तत्र चिकीर्षा एवं तथैव सुखेषु ज्ञातेषु चासिद्धे तत्रेच्छेति चेत्। न सिद्धविषयतदुभयज्ञानादेवासिद्धे तदिच्छाद्वयोत्पत्तेः। यत्त्वहं सुखप्रागभाववान् मिथ्याज्ञानवत्त्वादित्यादिना भाविसुखे ज्ञाते तत्रेच्छेति तत्तुच्छम्। ईदृशानुमानानवतारेपि वाहीकादेः सुखेच्छादर्शनादिति। तत्रेच्छा भविष्यन्मात्रविषया सा च भविष्यन्मात्रवृत्तिधर्मप्रकारिकावाच्या कथमन्यथा कृतिसाध्यतानुमितिं भविष्यत्पाकविषयां शबरस्वाम्याहेति चेत्। न यथाहि दण्डं विना ऽसत्त्वेन दण्डसाध्यता घटस्य तथा कृतिं विना ऽसत्त्वेन कृतिसाध्यतापि पाकस्य उक्तहेतोस्तावन्मात्रसाधन एव सामर्थ्यात् सा च कृत्यन्तरनियतसत्त्वरूपा कार्यान्तरवदेव तथा च यद्यपि यथोक्तप्रकारता पाकान्तरस्मरणस्याप्यस्ति तथापि तन्न भविष्यत्पाकविषयकमिति प्रवर्तकज्ञानेच्छा-

योः समानविषयतां नैयायिकानुमतामनुरुध्य महार्णवकृदनुमानमानमाह । ननु समानप्रकारकधीसिद्धये पाकान्तरस्मरणस्यापि तथात्वात् अन्यथा स्नानपानान्तरस्य कृतिसाध्यतास्मरणादाद्या प्रवृत्तिर्फलस्येति तदुक्तमयुक्तं स्यात् तथा चान्यस्मरणादेव भविष्यतोः सुखपाकयोरिच्छाचिकीर्षे इति न तदनुरोधादपि सामान्यलक्षणेति । यत्तु व्याप्तिः सम्बन्धविशेषः तद्ग्रहश्च सम्बन्धिविषयतानियतः तत्र च सन्निकृष्टावेव धूमाग्नी सम्बन्धिनौ सर्वे वा । आद्ये धूमत्वं न तदवच्छेदकमतिप्रसक्तत्वात् अन्त्ये सामान्यलक्षणां विना न निस्तारः न हि तां विना सर्वे गृह्यन्त इति । तन्न सर्वीय एवायं सम्बन्धो धूमत्वावच्छिन्न इति सत्यं किं तु सर्वीयसम्बन्धग्रहः सर्वसम्बन्धिविषयताव्याप्त इति न नियमः समवायग्रहे व्यभिचारात् स हि सर्वेषां द्रव्यगुणकर्मसामान्यानामेक एव सम्बन्धो रूपवान् घट इत्यादौ घटघटत्वादिमात्रग्राहिणि प्रत्यये चकास्ति सर्वव्यक्त्यग्रहे सर्वव्यक्तयः कथं व्याप्तिमत्तया गृह्यन्तामिति चेत् । न कथञ्चिदपि सर्वो धूमो वह्निव्याप्य इति धीः किं तु धूमो वह्निव्याप्य इत्येव तथा च प्रसिद्ध एव हि धूमो धूमत्वेन प्रकारेण वह्निव्याप्तिमान् कृत्वा गृह्यतां तावतैव तृतीयपरामर्शोऽस्तु । ननु गौरितरेभ्यो भिद्यते गोत्वादित्यत्र गोत्वं लिङ्गमिति तज्ज्ञानं सविकल्पकं वाच्यं निर्विकल्पकस्य व्यवहारानङ्गत्वात् तत्र च सविकल्पके न गौर्विशेषणमन्योन्याश्रयात् जातेर्व्यक्तौ व्यक्तेश्च जातौ विशेषकत्वोपगमात् किं तु गोत्वत्वमुपाधिर्गोत्वे विशेषणं तच्च गवेतरावृत्तित्वे सति सकलगोवृत्तित्वमिति तदुपाधिज्ञानाय सकलगोज्ञानं तच्च न सामान्यलक्षणां विनेति

चेत्। न यथाहि गौरित्यत्र गोत्वविशिष्टः पिण्डो भासेत तथा गोत्वमित्यत्रापि गोविशिष्टं गोत्वं न तु ततोऽधिकमननुभवात् न चान्योन्याश्रयः। जातिर्हि यथा स्वतो विलक्षणा पिण्डं तथा पिण्डोऽपि स्वतो विलक्षणो जातिं विशिनष्टीति अन्यथोक्तान्योन्याश्रयाद्विशिष्टधियस्ततो धर्मधर्मिभावस्य ततस्तयोरत एव विश्वस्य खण्डने साधु सामान्यलक्षणाऽव्यवस्थापनमिति। यत्तु धूमो मदीयव्याप्यतासंशयविषयः मया ऽनुकूलतर्कवत्तयाऽगृहीतत्वादित्यनुमानेन प्रतीतधूमे बाधादप्रतीतं धूममादाय पर्यवस्यता ऽज्ञातधूमस्यैव संशयविषयत्वं बोध्यमिति। तन्न पक्षाज्ञानेनाश्रयासिद्धेः। धर्मिज्ञानजन्यस्य संशयस्य तदसत्त्वेनाभावादनुमानबाधितत्वात् मानस्य मेयाजनकत्वाच्चेति। अत्रोच्यते। अनुकूलतर्कं विना धूमे वह्निव्यभिचारित्वशङ्का तावदुदेति सा तावद्वह्निजन्यतया निश्चिते पुरोवर्तिनि धूमे न सम्भवति तस्य वह्निजन्यतयैव निश्चितत्वात्। न हि वह्निजन्योऽयं धूमो वह्निं विना भवत्वित्यनुन्मत्तः शङ्कते। अनयोर्धूमत्ववह्नित्वाभ्यामवच्छेदकाभ्यां कार्यकारणभावो न गृहीत इति सामान्यद्वयावच्छिन्नसम्बन्धितारूपा व्याप्तिरगृहीतैवेति व्याप्तेरव्यभिचरितसम्बन्धस्याग्रहादत्रैव व्यभिचारशङ्केति चेत्। धूमत्ववह्नित्वयोस्तदवच्छेदकता कुतो न गृहीता। धूमान्तरस्य व्यभिचारशङ्कयेति चेत्। तद्धियं विना कथं तर्हि व्यभिचारशङ्का धर्मिज्ञानजन्या हि सा तद्धीश्च न सामान्यलक्षणां विनेति घट्टकुट्यां प्रभातम्। एवं च धूमत्वावच्छिन्नानां वह्नित्वावच्छिन्नैः समं सम्बन्धिता वह्निव्याप्यता सा च सर्वधूमेषु गृह्यते। कथमन्यथा पर्वतीयधूमस्य व्याप्त्यग्रहे

तस्मादनुमितिः । सर्वधूमधीश्च न सामान्यलक्षणां विनेति टीकाकृन्मते किं सर्वधूमेषु व्याप्तिग्रहेण यावता सन्निकृष्ट-धूमव्यक्तावेव धूमो वह्निव्याप्य इति धूमत्वेन प्रकारेण व्याप्तिर्गृह्यतां ततः पक्षधर्मताज्ञानानन्तरं तथैव स्मर्यतां ततः पर्वतवृत्तिर्धूमो वह्निव्याप्य इत्यस्तु त्वन्मतनृतीय-परामर्शो मन्मतानुमितिर्वाऽस्तु कृतं सामान्यलक्षणया न हि पर्वतीयधूमनिष्ठतया तदीयाया व्याप्तेः प्राग्ग्रहणं तृती-यपरामर्शाय गौरवात् किं तु तस्या व्याप्तेः कुत्रापि ज्ञानं तच्च वृत्तमेव महानसीयधूमे एकैव हि सर्वधूमव्याप्तिस्तत एव ज्ञानान्तरे ज्ञानत्वग्रहात्तदुत्तरज्ञाने ज्ञानत्वविशिष्टज्ञानमि-त्याचार्या अप्याहुरित्याशङ्क्य यदि सामान्यलक्षणा नास्ति तदाऽनुकूलतर्कं विना धूमादौ व्यभिचारसंशयो न स्यात् । प्रसिद्धधूमे तद्धूमत्वेन तद्वह्निव्याप्तेरवगमात् धूमान्तरस्य सामान्यलक्षणां विना चाग्रहात् । सामान्येन तु सकलधू-मोपस्थितौ धूमान्तरे शङ्का युज्यते विशेषादर्शनात् तथा च तर्कादिना तच्छङ्कायां निरस्तायां प्रसिद्धधूममात्र एव यद्यपि धूमो वह्निव्याप्य इति व्याप्तिग्रहोऽप्युचित एव तथाप्युक्तयुक्त्या सामान्यलक्षणायां सिद्धायां सर्वधूम-व्यक्तिषु व्याप्तिग्रहः सम्भवति प्रत्यासत्तिसौकर्यादिति । तथैवोक्तं तात्पर्याचार्यैः । ननु सामान्यलक्षणां विना न सर्वधूमोपस्थितिस्तां च विना न धूमत्वेन व्याप्यतावच्छे-दकेन प्रकारेण ग्रह इति सामान्यलक्षणा व्याप्तिग्रह एवो-पयुज्यत इति चेत् । न सर्वव्यक्त्युपस्थितिमात्रेणैवाव-च्छेदकत्वग्रहः किं तु सम्बन्धान्यूनानतिरिक्तवृत्तित्वग्रहेण स च धूमस्य व्यभिचारशङ्कानिरासेनेति तद्द्वारेणैव व्या-प्तिग्रहे सामान्यलक्षणोपयुज्यत इति युक्तिमत् । ननु सा-

मान्यलक्षणप्रत्यासत्त्या तदाश्रयसकलव्यक्तिज्ञाने प्रमेयं वाच्यमिति व्याप्तिबुद्धौ सार्वज्ञ्यं स्यात् । बाढं महाशय-स्तवैवं निश्चयः स्यात् । बाढं घटत्वादिना तु विशेषेण निश्चयोऽस्य न भवति स्वसामग्रीविरहात् । कासौ स्वसामग्री घटत्वनिर्विकल्पकं तदुत्तरधारावाहिकानि घटत्वप्रकारकाणि न स्युः पूर्वधारावाहिकानां घटत्वनिर्विकल्पत्वाभावादिति चेत् । तान्यपि हि घटत्वांशे निर्विकल्पकान्येव । तद्विषयतयैव च तेषामुत्तरविशिष्टधीजनकता विशिष्टावगाहित्वं तु तेषां कारणसाम्यतायाम् । हन्तैवमपि विशेषणधीप्रयुक्ता विशिष्टधीः स्यादेव प्रमेयत्वादिनापि रूपेण घटत्वादेर्विशेषणस्य ग्रहात् । इयं हि सामान्यसामग्री विशेषसामग्री तु विशेषणनिर्विकल्पकम् अविशिष्टबुद्धौ विशेषणतावच्छेदकप्रकारकं तु ज्ञानं विशिष्टवैशिष्ट्यबुद्धौ तच्च नात्रेति आचार्या अप्येवम् । नापि व्याप्तिबुद्धौव पर्वतस्यापि वह्निमत्त्वालिङ्गनादनुमितिर्गतार्था तत्र धूमवत्त्वपुरस्कारेणात्र च पर्वतत्वपुरस्कारेण वह्निमत्त्वासिद्धेः । ननु सामान्यलक्षणया पुरा पर्वतस्यापि धूमवत्त्वपुरस्कारेण वह्निमत्त्वग्रहणादिदानीं तत्स्मरणसहितेन पर्वतेन्द्रियसन्निकर्षेण सोऽयं वह्निमान् पर्वत इति प्रत्यभिज्ञैवास्तु कृतमनुमानेनेति चेत् । एवं हि सोऽयमिति स्यान्न तु पर्वतोऽयं वह्निमानिति । किञ्च पुरा विशिष्य ज्ञात एव प्रत्यभिज्ञा तथैवान्यत्र दर्शनात् । अथ यथा सामान्यतो गृहीता स्मृता व्याप्तिरिन्द्रियसन्निकृष्टे धूमेऽनुभूयते तेनायं धूमो वह्निव्याप्य इति तृतीयलिङ्गपरामर्श उदेति तथा सामान्यतो गृहीतस्य स्मृतस्य वह्निमत्त्वस्य वैशिष्ट्यमिन्द्रियसन्निकृष्टे पर्वतेऽपि भासताम् । तेन पर्वतोऽयं वह्निमानिति साक्षा-

धीरेव भवत्विति ब्रूम इति चेत् । न । तस्यां दशायां साधकबाधकमानाभावेन वह्निसंशयस्यैव सम्भवात् । धूमरूपविशेषदर्शनसहाया प्रत्यक्षसामग्री प्रत्यक्षं जनयत्विति चेत् । विशेषदर्शनं हि विशेषत्वेन दर्शनं न तु वस्तुतः अन्यथा शिरःपाण्यादेः प्रमेयत्वादिनापि निश्चयात् पुमवधारणं स्यात् । तथा च सन्दिग्धवह्नौ पर्वते तद्वृत्तितया वह्निव्याप्यतया च यद्धूमज्ञानं स एव लिङ्गपरामर्श इति निमीलितेऽपि चक्षुषि ततो भवन्ती वह्निमत्पर्वतधीरनुमितिरेव स्यादिन्द्रियव्यापारविरहात् । चक्षुषि व्याप्रियमाण एव भवन्ती वह्निमत्पर्वतधीस्तु साक्षाद्धीरिति चेत् । अस्तु । अनुमितिस्तु सावकाशीकृतैव निमीलिते चक्षुष्युपनीतपर्वतविशेष्यका लिङ्गपरामर्शसहितमनःकरणिका वह्निमत्पर्वतधीरस्तु । साक्षाद्धीरेवेति चेत् । सिद्धं तर्हि लिङ्गपरामर्शो मानान्तरं मनसो बहिः प्रमितौ च साधारणसहकारित्वादिन्द्रियवत् । किञ्च चक्षुर्व्यापारस्थलेपि नासौ साक्षाद्धीः साक्षात्कारिप्रमाहेतुभूतविशेषणेन्द्रियसन्निकर्षविरहात् । संस्कारः स्मृतिर्वह्निना समम् इन्द्रियस्य संनिकर्षस्तत्राप्यस्ति प्रत्यभिज्ञा तत्तयैवेति चेत् । न द्रव्यविशेषणकसाक्षात्प्रमायास्तदजन्यत्वात् । अन्यथा स्मृतव्यवहितदण्डेऽपि पुंसि दण्डीति साक्षात्प्रमा स्यात् । तन्नान्तरीयकतया ज्ञातपुंसि भवत्येव सेति चेत् । भवतीत्यद्धा किं तु सा साक्षाद्धीरेवेत्यसिद्धं लिङ्गपरामर्शयोनित्वात् । विशेषदर्शनजपुंप्रत्यक्षादियमपि साक्षाद्धीरेव स्यादिति चेत् । न पुंप्रत्यक्षमपि हि ज्ञानद्वयजन्यं तथा । तृतीयपरामर्शजन्यं तु तदनुमितिरेव । प्रपञ्चितं चेदमस्माभिरनुमाननिर्णये ॥

ननु निरुपाधिः सम्बन्धो व्याप्तिरित्युक्तं तत्र क उपाधिः साध्यव्यापकत्वे सति साधनाव्यापकः तथाहि यद्यसौ साध्यं न व्याप्नुयात् तदा तद्व्यतिरेकेण साध्यव्यतिरेको न सिद्ध्येत् । तथा च तदव्याप्यतया हेतोः साध्यव्यभिचारोऽपि न स्यात् । तथा च तदव्याप्यतया हेतोः साध्यव्याप्यता न स्यादिति व्यर्थ उपाधिः स्यात् । एतद्द्वयस्य उपाधेः साध्यव्यापकतामूलकत्वात् । एवं यदि साधनं व्याप्नुयात्तदा साधनवति पक्षे स स्यादेवेति न तद्व्यतिरेकेण पक्षे साध्यव्यतिरेकः स्यात् । तथा साधनस्य साध्यव्यभिचारः साध्याव्याप्तिश्च न स्तां तयोः साधनवृत्तिनोपाधिव्यभिचारेण उपाध्यव्याप्यत्वेन च निर्वाहणात् । न च बाधोन्नीतपक्षेतरेऽतिव्याप्तिः तस्य स्वव्याघातकत्वेन साध्यव्यापकत्वाभावात् । धूमस्य च साध्यत्वं सिद्धिकर्मत्वं तथा वह्नेः साधनत्व सिद्धिकरणत्वं यद्यपि नास्ति सोपाधौ सिद्ध्यनुदयात् तथापि तथाभिमनन्त्वमस्ति अनुमातुस्तथाभिमानात् । एवं व्यापकत्वमपि न व्याप्तिनिरूपकत्वं येनान्योन्याश्रयः स्यात् । किं तु तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वं प्रतियोगित्वमपि न विरोधित्वं सहानवस्थाननियमलक्षणं येन चक्रकं स्यात् । तथा घटतदन्योन्याभावयोः कपाले सहावस्थानेन तत्प्रतियोगिन्यव्यापकं च लक्षणं स्यात् । किन्त्वभावविरहात्मत्वमिति विस्तरस्त्वनुमाननिर्णये । अयं च निश्चितवत्सन्दिग्धोऽप्यनुमानखण्डनाय व्यभिचारसंशयाधायकत्वात् । पर्वतेतरादिस्तु नैवं स्वव्याघातकत्वात् । किन्तु स श्यामो मित्रातनयत्वादित्यत्र गर्भस्थे मित्राभ्रूणे ज्योतिःशास्त्रादिना प्रतीते पक्षीकृते शाकाहारपरिणतिजन्यत्वमुपाधिः स हि आयुर्वेदेन मातुः शाकाहारपरिणतेस्त-

दोषश्यामरजोऽर्जनद्वारा भ्रूणश्यामत्वहेतुत्वेन सिद्ध इति साध्यव्यापकतया तावन्निश्चितः साधनव्यापकतया तु सन्दिग्धः पक्षे तत्तदभावयोर्निश्चायकत्वात् । अथ मित्रातनयत्वेनेतरश्यामसामग्र्यपि साध्या धूमेनेव वह्निसामग्री न च तत्साधने श्यामत्वमुपाधिः द्वयोरेकदैव साधनात् । अत एव सामग्री च क्वचिन्नोपाधिरित्याचार्या अप्याहुरिति चेत् । धूमे लिङ्गे वह्निसामग्री नोपाधिरिति । सत्यम् धूमस्य तज्जन्यवह्निजन्यतया वह्निसामग्र्याः साधनीभूतधूमव्यापकत्वावधारणात् । प्रकृते तु नैवं न ह्यौत्पत्तिकनरश्यामत्वसामग्री मित्रातनयत्वं व्याप्नुयादेवेत्यत्र किञ्चित्प्रमाणमस्ति । सहचारदर्शनव्यभिचारदर्शने तावन्मित्रातनयत्वस्य श्यामत्वेन सह व्याप्तौ प्रमाणं तद्द्वारा च श्यामत्वसामग्र्यापि समं हेतोर्व्याप्तिः व्याप्यव्याप्यस्य सुतरां व्याप्यत्वात् । तथा च नायमुपाधिः साधनव्यापकत्वनिश्चयादिति चेत् । न ते हि व्यापकत्वसंशायके न तु निश्चायके अन्यथा जन्यत्वस्य शरीरिजन्यत्वेनापि सह व्याप्तिः स्यात् न चेष्टापत्तिः लाघवात् कर्तृजन्यत्वेनैव सह तस्य व्याप्तेः । अथ श्यामत्वे शाकाहारो न प्रयोजकः जठरश्यामत्वस्य तेन विनापि भावात् । नाप्यौत्पत्तिकश्यामत्वे इन्द्रनीलादौ व्यभिचारात् । औत्पत्तिकनरश्यामत्वे तु शाकाहारः प्रयोजक इति स तत्रोपाधीकर्तुमर्हति किं तु तदिह न साध्यते पक्षधर्मताबललभ्यत्वात् । न हि स्वस्यात्मा पर्वते पर्वतीयवह्निं साधयति । पर्वतीयत्वस्य पक्षधर्मतालभ्यतया व्यापककोटावप्रवेशनीयत्वादिति चेत् । सत्यम् । अयमपि साधनेन मित्रातनयत्वेनावच्छिन्नं साध्यमौत्पत्तिकश्यामत्वं व्याप्नुवानो भवत्येवोपाधिः पर्यवसितसाध्य-

व्यापकत्वात् साध्यसाधनसम्बन्धव्यापकत्वाद्वेति। तथा च मित्रातनयान्तरे दृष्टान्तीभूते मित्रातनयत्वावच्छिन्नमौत्पत्तिकश्यामत्वं व्याप्नुवानोऽयं भवत्युपाधिः। ननु निश्चितोपाधिरप्यप्रत्यक्षे पक्षे साधनवति साधनाव्यापकत्वसिद्ध्यर्थमसत्तयानुमेया हेतुना च स एव सत्तयानुमेय इति सत्प्रतिपक्षग्रासात् साधनाव्यापकत्वसंशयात् सन्दिग्धोपाधिरेव पर्यवस्येत्। दृष्टान्ते साध्यव्यापकत्वं पक्षे च साधनाव्यापकत्वं गृह्यत इति तत्सिद्धान्तादिति चेत्। तर्कादिना हि साध्यव्यापकतासाधनाव्यापकताभ्यां पुरैव निश्चितोपाधिरुच्यते। यथाग्निना तप्तायःपिण्डे धूमे साध्यमान आर्द्रेन्धनवत्त्वादिः स हि महानसादौ दृष्टान्ते साध्यव्यापकतया गृहीतस्तप्तायःपिण्डे तु पक्षे ऽपक्षे वा साधनाव्यापकतया निश्चित एव तावतैव हेतोर्व्यभिचारमसिद्धिं वा निश्चाययितुमीष्टे तत्कथं वह्निना पक्षे परोक्षेपि साध्यमुपाधिर्वानुमीयतां प्रागेव साधनस्योपाधिसाध्योभयाव्याप्यत्वनिश्चयात्। यदा तु साधनांश एव तर्कावतारस्तदा न सन्दिग्धोपाधिरपि यदा तूपाधिसाधनयोस्तुल्यैव साध्यव्याप्तिग्राहिका सामग्री तदा सन्दिग्धोपाधिप्रभेदस्तुल्ययोगक्षेम इति गीयते। ननु जीवच्छरीरं पृथिव्याद्यष्टद्रव्यभिन्नानेकद्रव्यवत् प्राणादिमत्त्वादिति व्यतिरेकिणि साध्ये ऽनेकपदं विशेषणं तच्च व्यर्थम् एकेनैव तादृशेन सात्मकत्वसिद्धेः व्यर्थविशेषणे च व्याप्यत्वासिद्धिरावश्यकी व्याप्यत्वासिद्धौ च व्यभिचार आवश्यकोपाधिरिन्यतोऽत्रोपाधिरवश्यं वाच्यम् तदुक्तं च लक्षणं तं न व्याप्नोति यथोक्तसाध्यस्याप्रसिद्ध्या उपाधिकृतधर्मस्य साध्यव्याप्यकत्वासिद्धेरिति चेत्। न साध्याप्रसिद्धौ हि

न व्यभिचारस्तदत्यन्ताभावाप्रसिद्धा तद्धर्मितत्वरूपव्यभिचारासिद्धेः । तथा च न तत्रोपाधिः व्यभिचार एव तदुपगमात् । व्याप्यत्वासिद्धिस्तु नीलधूमवदिति । एतेन व्यतिरेकेऽत्रोपाधिरित्यपास्तं साध्याप्रसिद्धौ तदभावे सिद्धे तत्र साधनाभावप्रतियोगिके व्यभिचारित्वे सिद्धे तत्रोपाधेरसम्भवादिति ॥

सा चेयं व्याप्तिः शङ्कोदये सति तदपनोदनद्वारा तर्कगम्या । हन्तैवमनवस्था स्यात्तर्कस्यापि व्याप्तिग्रहमूलकत्वादिति चेन्न यावच्छङ्कं तर्कानुसरणात् । व्याघातेन तु शङ्कानुत्थाने विश्रामात् । ननु धूमो वह्निं विना भवत्विति शङ्कां यदि निर्वह्निः स्यात्तदा निर्धूमः स्यादिति तर्को वारयिष्यतीति ब्रूषे तच्च न अन्वयव्याप्त्यज्ञाने व्यतिरेकव्याप्तेरप्यबोधेन मूलशैथिल्येन प्रकृततर्कस्याप्याभासकत्वात् । अन्वयव्याप्तेस्तु ग्रहे सति तर्कानुसरणस्यैवायोगादिति चेत् । मैवम् । अयं हि विषयपरिशोधकतर्क इति नास्तीदानीमस्यावसरः तां तु शङ्कां व्याघातो वारयति न तु तर्क इति मदुपगमात् । तथाहि कारणं विना कार्यं भवत्विति वा सामान्यमुखो शङ्का स्यात् वह्निं विना धूमो भवत्विति वह्निं विनैव धूमो भवत्विति विशेषमुखी वा सर्वत्र व्याघातः । नन्वेवं शङ्कने सति व्याघात इतिशङ्कालम्बनतया प्रतीयमानो व्याघातः शङ्कां वारयिष्यतीति इति ब्रूषे तथा चोक्तप्रतीत्या व्याघातालम्बनत्वेन प्रतीताशङ्काप्रमितत्वान्नात्र निषेद्धुं शक्यते। अथ व्याघातो न प्रतीतस्तदा व्याघातधीविरहेण शङ्कास्त्येव विरोधिविरहादित्युभयथापि शङ्कास्ति । किं च आशङ्कापि व्याघातस्यावधिः पूर्वावधिः तामालम्ब्य व्याघातस्योत्थानात् । तथा च कथं तर्कः शङ्काया अव-

धिः उत्तरसीमा भविष्यति तथाहि एवं सति व्याघातः स्यादित्येवं प्रतीत्या व्याघातः स्वालम्बनभूतां शङ्कां तावद्वारयिष्यति व्याघातप्रतीतिश्च विपर्ययपर्यवसिततर्काधीना तद्यथा यदि कारणमन्तरेण कार्यं स्यात्तदा स्यादेव वा न स्यादेव वा न तु कदाचित् स्यादिति तथा चैतत्तर्कमूलभूतव्याप्तावपि शङ्कोदये कुतस्तर्कः शङ्काया अवधिः शङ्काप्रवाहस्यानिवृत्तेरित्यर्थकम्

व्याघातो यदि शङ्कास्ति न चेच्छङ्का ततस्तराम् ।

व्याघातावधिराशङ्का तर्कः शङ्कावधिः कुत इति ॥

नैवम् विरुद्धस्वक्रियैव हि व्याघातपदार्थः सैव शङ्कोदयप्रतिबन्धिकेति मदुपगमात् । न हि परबोधरूपकार्यार्थशब्दप्रयोगादिकं कारणमुपाददानस्य कारणं विना कार्यं भवत्विति शङ्कोदेति नापि धूमार्थं नियमतो वह्निं तृप्त्यर्थं वा भोजनमुपाददानस्य विशेषमुखं शङ्काद्वयमुदेतीति । ननु स्वक्रिया कथं शङ्कां प्रतिरुणद्धु विषयविरोधाद्यभावात् । यदि च शङ्कां विरुद्धत्वेन ज्ञाता स्वक्रिया प्रतिरुणद्धि तदा शङ्काविरुद्धत्वस्य शङ्काविरहव्याप्यत्वरूपस्य ज्ञानाय तर्कानुसरणे पुनरनवस्थेति । नैवम् विरुद्धस्वक्रियामूलभूतं शङ्काविरुद्धकोट्यालम्बनं विशेषदर्शनमेव शङ्कां प्रतिरुणद्धीति मदुपगमात् । ननु भवतु व्याप्तिस्तथापि तस्याश्चानुमितेश्च व्याप्तिरेषृव्या न हि व्याप्तिं विनानुमितिरुदेति तथा चात्माश्रयः व्याप्तावेव व्याप्तेर्वृत्त्युपगमात् । अथ व्याप्तेर्व्याप्तिः प्रथमव्याप्तितो भिन्ना तदाननुगमः विलक्षणयोर्द्वयोरेकाकारानुमितिजनकत्वात् का प्रथमा चरमा चेत्यविनिगमश्चेति । तन्न । न हि व्याप्तिरनुमितिव्याप्या तां विनापि सत्त्वात् किं त्वनुमितिरेव व्याप्तिधीव्याप्या तज्जन्यत्वात् ।

तथा चानुमितौ व्याप्तिधीर्व्याप्यत्वमस्तीति नात्माश्रयग-न्धोऽपि । अथेदमनुमितिजनकं व्याप्तिमत्त्वादित्यत्र व्याप्तिमत्त्वं तावदनुमितिजनकतया स्वरूपयोग्यतारूपया व्याप्तं व्याप्तिमत्त्वं च व्याप्तिरेव तथा च व्याप्तिर्व्याप्तिमतीति स्यादात्माश्रय इति चेत् । न । भेदात् धूमानलादिव्याप्तिविरहलिङ्गं तस्यास्त्वनुमितिजनकता व्याप्तिस्तदङ्गं सा च ततो भिन्ना सम्बन्धिभेदेन तस्या अपि भेदात् । न चैवमननुगमः अन्योन्याभावगर्भाया एव व्याप्तेरनुमितिजनकत्वात् । अस्त्वेवं तथाप्यविनाभावादिषु बहुषु व्याप्तिप्रस्थानेषु कामचारेण प्रतीयमानेषु अनुमितिरुदेतीत्यविवादं तत्र कीदृशं व्याप्तेर्ज्ञानमनुमितेरङ्गं न तावत् सर्वाकारमननुगमात् नापि नियतैकाकारं तदन्वयेप्यन्याकारव्याप्तिज्ञानादनुमितिसम्भवादिति । मैवम् । कारणत्वव्याप्यत्वादीनां लघुगुरुविषयत्वसम्भवेन लघोरेवार्थे प्रमाणस्य कारणवाच्यत्वादिग्राहकत्वमिति तद्ग्राहकप्रमाणानां स्वभाव इति सवतन्त्रसिद्धान्तात् । तथा च यत्रात्यन्ताभावादिगर्भं व्याप्तिशरीरं गुरुतरमादौ स्फुरति तत्राप्यनुमितेः प्रागन्योन्याभावगर्भव्याप्तिशरीरस्फुरणं कल्प्यं प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपीति भट्टवचनात् । अत एव वीचीतरङ्गादिकल्पनापि युक्ता । का चेयं पक्षधर्मतापि पक्षनिष्ठतेति यदि तदा प्रमेयस्याप्यसंग्रहः । प्रमेयत्वं प्रमाविषयत्वं तच्च प्रमातो न भिन्नमपसिद्धान्तात् । किन्तु भिन्नं प्रकाशस्य सतस्तदीयतामात्रनिबन्धनः स्वभावविशेषो विषयविषयिभाव इत्याचार्यवचनात् । तच्च न घटादिनिष्ठमात्मवृत्तित्वादिति । मैवम् । घटादौ प्रमा मा वर्तिष्ट स्वरूपतो घटादिकं विशिषन्ती तन्निष्ठेत्यु-

च्यते अभाववत्। न चायमपि बाध्यः भूतले घटाभाव इत्यस्य सार्वलौकिकत्वेन बाधासम्भवात्। स्वरूपसम्बन्धेन धर्मधर्मिभावो न दृष्ट इति चेत्। तत्किं सम्बन्धान्तरेण दृष्टः नेति चेत्। नूनमन्धोऽसि यत्त्वमपि ब्राह्मणमुपवीतिनं च न पश्यसि। धर्मधर्मिभावो न सम्भवति भेदे चाभेदे च विरोधादिति चेत्। तर्हि प्रत्यक्षादिपरिकलितं जगदेवापह्नुषे ओमिति चेत्। तर्ह्यनेनैव प्रणवेन मध्यमागमानधीष्व तेन सर्वापह्नोतापि भ्राजसे। अस्ति वस्तुभूतं ब्रह्मास्माकमिति चेत्। तर्हि कुतोऽज्ञासीः। न तावदुपनिषत्तत्र प्रमाणं तत्र मूकत्वात् विश्वमेव निषेधन्ती ब्रह्मणि मूकीभवन्ती सा ब्रह्मानुजानातीति चेत्। न तर्हि तत्रोपनिषत् प्रमाणं किन्तु मूकीभावान्यथानुपपत्तिः तथा च ब्रह्मानुमेयं प्राग्व्यवहारदशायां श्रुतिरेव तदवगमयति शेषे तु स्वप्रकाशं तत् सिध्यति इति चेत् तर्हि तत् सर्वथा प्रमेयतां नातिवर्तते मेयमातृमितिमानरूपेण तन्निर्वक्तुं न शक्यते सर्वत्र दोषग्रहादिति चेत् धिगज्ञ यच्चक्षुष्पथे मनःपथे च न प्रतिबिम्बते तन्मनुषे यत्तूभयत्र जागर्ति तदपह्नुषे किमत्र ब्रूमः। अस्तु तावदिदं तथापि का पक्षता सिषाधयिषाघटितेति चेत् कासौ सिषाधयिषा प्रतिपिपादयिषा वा प्रतिपित्सा वा नाद्यः स्वार्थानुमितौ तदभावात् नान्त्यः अनिष्टानुमितौ तद्विरहादिति। मैवम्। सिषाधयिषायोग्यता हि पक्षता सा च प्रपञ्चितानुमाननिर्णये॥

उपमानमपि सादृश्यमानं यथोक्तं गोसदृशो गवयः प्रायः कानने महति दृश्यते इति श्रुतवाक्यस्य काननपदाविदितसङ्गतेर्गवयपदविदितसङ्गतेश्च काननपदसङ्गतिप्रति-

पत्तिः फलमित्यतिव्यापकत्वमिति । तदसत् । इह प्रभिन्नकमलोदरे मधूनि मधुकरः पिवतीत्यत्र पुरोवर्त्तिप्रभिन्नकमलोदराधिकरणकमधुपानकर्तृकत्वस्येव गोसादृश्यविशिष्टगवयदर्शनविषयाधारत्वे सति सहृत्वस्य वैधर्म्यस्योपमानीभावेनैव काननपदसङ्गतिबोधकत्वात् । न च पदान्तरसमभिव्याहारोत्थाया अन्यथानुपपत्तेरेवायं प्रभाव इति युक्तं कीदृग्गवय इति प्रश्ने यथा गौस्तथा गवय इति श्रुतोत्तरवाक्यस्य तादृशे पिण्डे दृष्टे अतिदेशवाक्यार्थानुपसन्धाने गोसदृशोयं पिण्ड इत्येवं रूपे ज्ञाते गवयशब्दवाच्योऽयं पिण्ड इति तावदनुभूतिरुदेति सा च न वाक्यमात्रात् अप्रत्यक्षीकृतपिण्डस्यापि प्रसङ्गात् नापि प्रत्यक्षमात्रात् अश्रुतवाक्यस्यापि प्रसङ्गात् नापि तयोः समाहारात् भिन्नकालयोस्तयोः स्वरूपसमाहारासम्भवात् । अथ वाक्यतदर्थयोः स्मृतिद्वारोपनये गवयपिण्डसम्बद्धेनेन्द्रियेणास्तु समयपरिच्छित्तिरित्यपि न तदापीन्द्रियेण सादृश्याग्रहे समयपरिच्छेदासिद्धेः । अथेन्द्रियगवयपिण्डसम्बन्धं तन्निष्ठं गोसादृश्यविषयं व्यापारीकृत्य समयं परिच्छिनत्त्विति चेत् । हन्तैवं तृतीयलिङ्गपरामर्शं व्यापारीकृत्य वह्निमपि परिच्छिनत्त्विति गतमनुमानमपि । अथ चक्षुषि निमीलितेपि तत्फलं तृतीयलिङ्गपरामर्शो व्याप्रियमाणो भिन्नं प्रमाणमिति यदि हन्त तदा निमीलितेपि चक्षुषि सादृश्यधीर्व्याप्रियमाणा भिन्नं किं न स्यात् एवं धिक्करभकमित्यादौ पश्वन्तरवैसादृश्यधीरपीति तथा च सादृश्यं तद्धीर्वा भिन्नं प्रमाणं गवयत्वेन निमित्तेन गवयपदवाच्योयमित्यनुभूतिर्भिन्नं फलं परिशेषात् प्रश्नस्य प्रवृत्ति-

निवृत्तिविषयतयोत्तरस्यापि तत्पर्यवसायित्वात्। इयं चानुभूतिस्तिसृषु प्रमितिषु चानिविशमाना चतुर्थी सेयमुपमितिरित्युच्यते एवमेतस्याः करणं चतुर्थं प्रमाणमुपमानमिति चोच्यते एवं धिक्करभकमित्यादावपि निन्दापरे वाक्ये स्वरूपाख्यानपरे च द्रष्टव्यं तत्रापि हि वैधर्म्येण समयपरिच्छित्तेः। न च तद्भिन्नमेव मानं। नियतधर्मसामानाधिकरण्येन प्रवृत्तिनिवृत्तितत्परिच्छित्तेरुभयोरप्युपमानत्वादिति। अत्र च सादृश्यादिविशिष्टे पिण्डे न शक्तिगौरवात्। अप्रतीतगूनामपि वनेचराणां गवयव्यवहारापत्तेश्च। किन्तु सादृश्यवैसादृश्योपलम्भितं गवयत्वं करभत्वं च प्रवृत्तिं निमित्तीकृत्य गवये करभे च गवयपदस्य करभपदस्य शक्तिरिति। किमर्थं तर्हि सादृश्यवैसादृश्यं कथयति उपलक्षणार्थं न हि तदा गवयत्वं करभत्वं चोपस्थापयितुं शक्यते तत्पदयोरगृहीतशक्तिकत्वेन मूकत्वात् तत्पिण्डयोश्चानुपस्थित्येन्द्रियेणापि तयोरनुपस्थितेः। अत एव तदा न शक्तिग्रहः। तदुक्तम्।

सादृश्यस्यानिमित्तत्वान्निमित्तस्याप्रतीतितः।
समयो दुर्ग्रहः पूर्वं शब्देनानुमयापि वेति॥

नन्वतिदेशवाक्यं तावत्समयपरिच्छेदं नाजीजनत् गोसादृश्यस्य प्रवृत्तिनिमित्ततोपलक्षणतयोः सन्देहात्। अथ पश्चात्पिण्डे दृष्टे लाघवाद्गवयत्वं निमित्तीकृत्य समयं परिच्छेत्स्यतीति चेत्। न। उक्तसंशयेपि यो गोसदृशः स गवयशब्दवाच्य इति समानाधिकरणान्वयबोधेन गन्धवती पृथिवीति मद्वाक्यस्य प्रागेव पर्यवसिततया निराकाङ्क्षत्वात् अयं तु विशेषो यद्गन्धवतीत्यादि तदैव शक्तिमग्राहयत् पृथिवीत्वस्य निमित्तस्य यदैवोपस्थितेः

इदं तु न तथेति जनितान्वयधियोपि वाक्यस्य पुनरनुसन्धाने गवयत्वेन निमित्तेन गवयपदवाच्यताग्राहकत्वे वाक्यभेदापत्तेः । न चातिदेशवाक्यं शक्तिग्रहतात्पर्यकमिति गोसदृशपदं गवयत्वलक्षकमिति वाच्यं । प्रवृत्तिनिमित्ततात्पर्याभावेपि स्वरूपाख्यानपरादप्यतिदेशवाक्यादुक्तरीत्या समयपरिच्छेदसिद्धौ मानान्तरसिद्धे चावश्यकत्वात् । अपि च धिक्करभकमित्यादेः करभनिन्दातात्पर्यकादपि वाक्यात् समयपरिच्छेदसिद्धौ मानान्तरसिद्धेरावश्यकत्वात् तस्मात् पिण्डे दृष्टे गवयत्व उपस्थिते सादृश्यं गुरु गवयत्वं च जातित्वाल्लघ्विति विमर्शे तथायं पिण्ड इत्यनुसन्धानमेव समयं गवयत्वेन निमित्तेन गवयपदवाच्योयं पिण्ड इत्येवं रूपं परिच्छिनत्तीति । सादृश्यं च समानबहुधर्मवत्त्वं वैसादृश्यं त्वसमानबहुधर्मवत्त्वं अत एव विसदृशयोरपि गोवराहयोरुक्तं सादृश्यमस्तीत्यतो वराहं गावोनुधावन्तीत्यत्र गोसादृश्यं वराहेप्युक्तं शक्तिनिर्णयाय काकापेक्षया शूकरस्यैव गोवृत्तिबहुधर्मवत्त्वात् । अत्र सादृश्यधीकरणिकैव समयपरिच्छित्तिरूपमितिरिति जरन्तो जयन्तादयः[1] । सादृश्यधीकरणिकापि करभादौ सोदेति तथाहि यथा गवयपदशक्तिग्राहकः सादृश्यविशेषो गवय एव न तु महिषादौ एवं करभपदशक्तिग्राहकोपि वैसादृश्यविशेषः करभ एव न तु पश्वन्तरे तेनेमे सादृश्यवैसादृश्ये गवयकरभनियत एव । इह सहकारतरावित्यादौ तु न तथा एतत्सहकाराधिकरण-

---

(१) तत्त्वचिन्तामणौ गङ्गेशोपाध्यायेनाप्युक्तं जरन्नैयायिका जयन्तप्रभृतयः इति जयन्तश्च न्यायसूत्रवृत्तिकारः न्यायसूत्रवृत्तिश्च न्यायमञ्जरीनामिका विजयनगरसंस्कृतसीरीज इति प्रसिद्धायां पुस्तकावल्यां मुद्रितास्ति ।

कमधुरध्वनिकर्तृत्वस्य शुकादावपि सम्भवात् । तस्मान्नियतधर्मसामानाधिकरण्येन शब्दप्रवृत्तिनिमित्तपरिच्छित्तिरुपमितिस्तत्करणमुपमानं तेन सादृश्यवैसादृश्ये एवोपमानं इह सहकारेत्यादौ तु प्रसिद्धपदसामानाधिकरण्यान्यथानुपपत्त्या शक्तिग्रहसम्प्रदायः । एकदेशी तु इदमपि वैधर्म्योपमानान्तर्गतमेव एतत्प्रभिन्नकमलोदराधिकरणकमधुपानकर्तृत्वस्य तथैतत्सहकारवृत्त्याधिकरणकमधुरध्वनिकर्तृत्वस्यान्यवैधर्म्यस्यैवात्र शक्तिग्राहकत्वात् सर्वसंग्राहकं तु लक्षणमनवगतसङ्गतिसंज्ञासमभिव्याहृतवाक्यार्थस्य संज्ञिन्यनुसन्धानमुपमानमिति। न चादौ सङ्गतिमवेत्य पश्चाद्दैवात्प्रस्मृत्य पश्चादुक्तसामग्र्या यत्र समग्रं परिच्छिनत्ति तत्रोपमितावव्याप्तिः सा हि संज्ञावगतसङ्गतिरेवेति चेत् । नाबोधात् । न हि यदा कदाचिदपि सङ्गतेरवगमनिषेधोऽत्रोच्यते । अन्यथानादौ संसारे प्राक् तदवगमस्य सम्भवेनासम्भवदोषः स्यात् । किं त्वनवगता अवगम्यमानेत्यर्थः । एतच्चावगतप्रस्मृतसङ्गतावप्यस्ति । एतच्चावगम्यमानत्वं प्रकृतफलकरणीभूतानुसन्धानवता न तु येन केनापि यस्यैव करणान्वयस्तस्यैवोपकरणान्वयोपीत्यस्यार्थस्य सकलजनसाक्षिकत्वान्नात्र विकल्पावसरः साहश्यवैसादृश्ययोस्त्वप्रवृत्तिनिमित्ततया तयोः प्रवृत्तिनिमित्तानुभावकं समयपरिच्छेदकमेव न भवतीति तथा परिच्छेदके उपमानाभासे नोपमानलक्षणातिव्याप्तिः प्रवृत्तिनिमित्तं पुरस्कृत्य संज्ञासंज्ञिसम्बन्धं परिच्छिन्दत एव प्रमाणस्योपमानत्वात् । ननु गोसादृश्यं विहाय गवयत्वजातौ गवयशब्दार्थताप्रतीतिः कल्पनालाघवाख्यतर्कमपास्य न स्यादिति तदुपन्यासस्थितौ किमानुमानिक्येव तत्र

गवयत्वस्य गवयपदवाच्यताप्रमितिरियं नेष्यते सम्भवति च प्रयोगः विमतिपदं गवयत्वं गवयपदप्रवृत्तिनिमित्तं तथात्वे तर्केण विषयीक्रियमाणविपर्ययकत्वात् । न यदेवं न तदेवं यथा गोत्वं तथा चेदं ततस्तथेति न ह्यस्ति सम्भवो मूलशैथिल्यादिदोषरहितनिवेदितविपर्ययवांश्चार्थो न च तथेति । अथवा गवयपदमसम्भवत्प्रवृत्तिनिमित्तान्तरमनुपपद्यमाना सोक्तगोसादृश्यसामानाधिकरण्यमर्थाद्गवयत्वप्रवृत्तिनिमित्तकतामाक्षिपतीत्यर्थापत्तिरेवात्र प्रमाणमस्तु सा च त्वया व्यतिरेकीकृत्य परेण पृथगेवावश्यं प्रमाणनीयेति । मैवम् । न हि लाघवगौरवे तर्कौ नापि मूलशैथिल्यादिरहिते नापि विपर्ययपर्यवसायिनी नापि प्रमाणसहकारिणी किन्तु लघौ गुरौ चार्थे युगपदुपस्थिते प्रमाणं लघुमर्थं कारणत्वादिनालिङ्गति न तु गुरुमिति प्रमाणस्य स्वभाव इत्येव तत्त्वम् । अत एव लाघवगौरवोत्सर्गाविनिगमप्रतिबन्ध्यनौचित्यानि तु षडपि न तर्का इति न्यायविदां परिसंख्यानमपि । हन्त तथापि गोसादृश्यं तावन्न गवयपदप्रवृत्तिनिमित्तं अप्रतीतगूनामारण्यकानां गोसादृश्यापरिचयाद्गवयपदप्रयोगादिलक्षणव्यवहारानुपपत्तेः । एवं चानेन तर्केण विपर्ययपर्यवसिते गोसादृश्यस्य प्रवृत्तिनिमित्तत्वे निरस्ते ऽन्यस्य प्रवृत्तिनिमित्तत्वेऽसम्भविनि प्रवृत्तिनिमित्तवत्त्वे च पदत्वेनैव सिद्धे गवयपदं गवयत्वप्रवृत्तिनिमित्तकं इतराप्रवृत्तिनिमित्तकत्वे सति प्रवृत्तिनिमित्तवत्त्वादिति व्यतिरेकिणैव क्लृप्तेनोपमानं प्रमुमुषिषुविषयमिति चेत् । मैवम् । श्रुतातिदेशवाक्यस्य गवयपिण्डदर्शनान्तरं गवयत्वगोसादृश्ययोरवगताविदं लघिवदं गुर्विति तावद्धीरुदेति सा च प्रतिसन्धानसहकारितामापाद्योपमा-

पयतु अप्रतीतगूनामव्यवहारप्रसङ्गस्य तु तदानीमवतारे प्रमाणाभावः अस्तु वा तत्र प्रमाणं तथापि स हि प्रसङ्गो विपर्ययपर्यवसितीभूय सामान्यतो दृष्टावतारमपेक्ष्य यथोक्तं परिशेषनामकं व्यतिरेकिणमवतारयिष्यति स चावतीर्णः समयं परिच्छेत्स्यतीति क्लृप्तमप्यनुमानं चरमोपस्थितत्वेन लाघवसहितप्रतिसन्धानस्य(१) न मात्रजनुषः प्रथमोपस्थितस्य समयग्राहकतां न प्रत्यादिशति युगपदुपस्थित्यभावेन क्लृप्तकल्प्यविरोधे हीत्यस्यानवकाशात् । नन्वतिदेशवाक्यं समयग्रहतात्पर्यनिर्वाहकमुत्थाप्य समयनिष्पत्तिवह्निजिज्ञास्यं प्रति दृश्यते धूम इति वह्न्यनुमितिद्वारेति तावद्ब्रूषे तथा च तव स्ववचनविरोधः । धिक्करभमित्यादौ समयग्रहतात्पर्याभावे ऽपि उपमानेन समयपरिच्छेद इति त्वयैव बहुधोक्तत्वादिति । अथ तत्र मानान्तरं तदा चतुःप्रमाणीभङ्ग इति चेत् । भ्रान्तोसि तथेति प्रतिसन्धानं लाघवाद्गवयत्वकरभत्वपुरस्कारेण गवयपदकरभपदवाच्यतां तावत्परिच्छिनत्ति तत्र च का तात्पर्यापेक्षेति दिक् ॥

आप्तोपदेशः प्रमाणशब्दः आप्तिश्च वाक्यार्थयथार्थज्ञानं तादृशशब्दबुबोधयिषा यत्नश्च करणपाटवं च तद्वानाप्तः तस्योपदेशस्तद्वक्तृकं वाक्यं प्रमाजननं प्रति स्वरूपयोग्यं स चाकाङ्क्षादित्रिकधिया सहकारिण्योपहितः प्रमापयति चक्षुरिवोन्मीलनोपहितं कीरवालभ्रान्तप्रतारकस्थले तु भगवानीदृशो वक्तेति प्राञ्चः । नव्यास्त्वाप्त उपदेश आकाङ्क्षादित्रितयवानुपदेशः तत्त्रितयधीमात्रोपदेशः प्रमाणशब्दः एतज्जनिता च प्रमा बोद्धुरेवाकाङ्क्षादि-

(१) अत्रादर्शपुस्तकत्रयेपि कश्चिदंशो निपतितः ।

प्रमेया गुणेन जन्यते न तु वक्तुर्वाक्यार्थप्रमेया तथा च श्रोतुर्वेदार्थप्रमया न वेदवक्तुर्वाक्यार्थप्रमारूपो गुणोपेक्ष्यते अतो न वेदार्थप्रमाबलादीश्वरसिद्धिः । वक्तुस्तात्पर्यं च शाब्दप्रमायामतन्त्रमेवेति न तद्धेतुभूततात्पर्याधारतयापि तत्सिद्धिः । यद्समवधानावच्छिन्नं यस्यान्वयानुभवासम्बन्धित्वं तस्य तदेव तत्साकाङ्क्षत्वं तच्च यावन्तं कालं तावन्तमेवाकाङ्क्षा योग्यता च बाधकमानाभावः आसत्तिश्चोपस्थित्योर्नैरन्तर्यं वाक्यं चैकार्थावच्छिन्नः पदसमूहः पदत्वं च सङ्केतवद्वर्णत्वमिति तेन प्रकृतिप्रत्ययौ पदे न तु पदमिति ॥

नन्वन्यथानुपपत्तिरनवगता तावन्न बहिःसत्त्वकल्पिका ज्ञानान्वयव्यतिरेकित्वात् किं तु ज्ञाता तस्याश्च ज्ञानं कल्पनीयज्ञानाधीनं न हि तदज्ञाने तदन्येन वर्त्मना नेदमुपपद्यत इति ज्ञातुं शक्यते अभावस्य प्रतियोगिनिरूपणाधीननिरुपणत्वात् तथा च फलीभविष्यच्चैत्रबहिःसत्त्वादिसत्त्वादिज्ञाने किमर्थापत्त्या तत्फलस्य तां विनैव सिद्धेः । तदज्ञाने चान्यथानुपपत्तिरज्ञातैवेति कथं प्रभवतु तदुक्तं । यतोन्यत्वं तत्सिद्धेरग्रे तदसिद्धेरिति मैवम् । बहिःसत्त्वेन विना जीविनो गेहासत्त्वमनुपपन्नं वह्निना विना धूम इव एवं चेदमनुपपद्यमानं यत्रास्ति तत्र फलं प्रसभत इति चैत्रे बहिःसत्त्वं सिध्यति पक्षधर्मताबलात्पर्वतीयवह्निवत् न तु विशेषयोरेव व्याप्तिग्रहोत्राङ्गं येन चैत्रबहिःसत्त्वस्यापि प्रसिद्धिरादौ मृग्येत गौरवात् पक्षधर्मताज्ञानस्यानङ्गत्वापत्तेस्त्वदुक्तदोषाच्च । इयमेव दृष्टार्थापत्तिरिति गीयते एवं पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्रापि रोगाद्यजन्यं पीनत्वं भोजनमात्रेण विनानुपपन्नं भोजन-

मात्रमेव यद्यपि व्याप्तिबलादानेतुमर्हति तथापि दिवा अभोजिनः पक्षत्वेन दिवाभोजनमादाय साध्योपसंहारस्य बाधेनासम्भवादबाधेन भोजनत्वेनैव रूपेण रात्रिभोजनमायाति पक्षताधर्मताबलात् वह्नित्वेन पर्वतीयवह्निवत् न हि रात्रिभोजनेन विना पीनत्वानुपपत्तेर्ज्ञानं कारणं किं तु भोजनेन विना पीनत्वस्य भोजनमात्रसाध्यत्वात्। अतो यतोऽन्यत्वमित्यादिकमज्ञप्रलपितम्। अथ तथापि जीवी देवदत्तो गृहे नेत्यत्र देवदत्ते पक्षे जीविगेहासत्त्वेन बहिःसत्त्वं प्रतीयते तत्र तावद्गेहासत्त्वेऽस्य गेहवृत्तेर्बहिःसत्त्वेन चैत्रवृत्तिना समं न व्याप्तिः वैयधिकरण्यनियमात् वैयधिकरण्येऽपि व्याप्त्यभ्युपगमे पक्षधर्मता सर्वथा न सम्भवतीति नेहानुमानवार्तापीति चेत्। न गृहनिष्ठाभावप्रतियोगित्वस्यैव देवदत्तवृत्तेरिह लिङ्गत्वात्। तस्य चाव्यवहितस्मृतदेवदत्तविशेषणकस्य गृहे देवदत्ताभाव इति चाक्षुषं ज्ञानं अभावे देवदत्तस्य प्रतियोगित्वमवगाहमानं जनयता चक्षुषैव ग्रहणसम्भवात् अयं तु विशेषो यदन्यत्र व्याप्तिलिङ्गवत्त्वं पक्षे गृह्यते अत्र तु व्याप्तिपक्षधर्मते लिङ्ग एव प्राधान्येन गृह्यते तृतीयलिङ्गपरामर्शानुमित्योस्तु नैकविशेष्यकतानियम इति दिक्। ननु तथापि जीवी देवदत्तो गृहे नास्तीत्यत्र जीवित्वेन तावद्देवदत्तस्य क्वचित् सत्त्वमाक्षिप्तं जीवता क्वापि स्थातव्यमिति व्याप्तेः तच्च गृहबहिरुभयस्पर्शि तदानीं विनिगमकानुपस्थितेः अथ पश्चाद्गृहे नास्तीत्यनेन विशेषमुखप्रवृत्तेन प्रमाणेन गृहे देवदत्तस्याभावे ग्राहिते तत् क्वचित्सत्त्वं बहिर्मात्रे व्यवस्थाप्यते तथा च विशेषमुखप्रवृत्तेन प्रमाणेन सामान्यमुखप्रवृत्तस्य प्रमाणस्य स्वालिङ्गितविशेषातिरिक्तविशेषविषयत्वव्यव-

स्थापनं प्रमाणयोरापाततः प्रतीताद्विरोधान्निर्वहतीति विरोध (१)केयमर्थापत्तिरित्युच्यते। मैवम्। न हि जीवी देवदत्त इत्येकं वाक्यं गृहे देवदत्तो नास्तीत्यपरं येन सामान्यविशेषन्यायच्छायापि स्यात्। किन्तु जीविनं देवदत्तं स्मरतो योग्यानुपलब्ध्या च गेहे तदभावं पश्यतः प्रत्यक्षमिदमभिलप्यते जीवी देवदत्तो गृहे नास्तीत्यतो न त्वदुक्तमनुस्पर्शि। अथ यदीदृशं वाक्यं स्यात्तदा किं स्यात् अनेन हि वाक्येन देवदत्तस्य जीवित्वगेहासत्त्वे प्रत्याख्येते योग्यतादिमत्त्वात् तथा च तेन बहिःसत्त्वमर्थाप्यतेनुमाप्यते वेति सर्वसमञ्जसम्। ननु पीनो देवदत्तो दिवा न भुङ्क्त इति तावच्छ्रुतार्थापत्तेरुदाहरणमात्थ तच्च वाक्यार्थधियं विना न घटते सा च पीनत्वान्वयप्रयोजकं रात्रिभोजनं विना नेह तच्च रात्रौ भुङ्क्तइति शब्दं विना न शाब्दी त्वाकाङ्क्षा शब्देनैव पूर्यत इति नियमात् तथा च रात्रौ भुङ्क्ते इति शब्द एवात्र कल्प्यत इति नात्रानुमानगन्धोपीति। मैवम्। यद्यपि श्रोत्रा रात्रिभोजनं प्रतीतमस्ति तथापि दिवेतिविशेषणमर्यादया तेन तावद् दिवाभोजनमपि सम्भावितमपि तत्संशयेन योग्यतासंशयात् शब्दार्थयोरध्याहारमन्तरेणैव वाक्यार्थधियः सम्भवे तन्मूलाया अर्थापत्तेरनुमितेर्वा सम्भवादिति। गुरवस्तु ज्योतिस्तन्त्रेण देवदत्तस्य शतवर्षजीवित्वे ज्ञाते पश्चाद्भूयसा प्रत्यक्षेण तस्य गृहसत्त्वनियमेवासिते शेषे योग्यानुपलब्ध्या तस्य गृहासत्त्वे निश्चिते ज्योतिःशास्त्रस्य नियममप्रत्यक्षेण समं योग्यानुपलब्धिघटितेन विरोधेनोभयोः प्रामाण्यसंशयात्

(१) अत्रादर्शपुस्तकत्रयेपि कश्चिदंशो निपतितः।

जीवति न वेति संशये जाते तेन जीवनसंशयेन बहिःसत्त्वं कल्प्यते । एवं च जीवनसंशयः करणं तच्च नानुमानं अनुमितेः संशयकरणत्वसम्भवाद्व्याप्तिविरहाच्चेति पञ्चमं प्रमाणमर्थापत्तिः । अथ जीवनग्राहकगृहनियमग्राहकयोर्यदि तुल्यबलत्वं न तर्हि बहिःसत्त्वकल्पना विशेषादर्शनात् अतुल्यबलत्वे चैकेनापरस्य बाध एवेति जीवित्वसंशये न बहिःसत्त्वधीः किं तु जीवित्वनिश्चये सा चानुमानादेव न त्वर्थापत्तेरिति । उच्यते यथोक्तसंशयवान् खल्वेवं विमृशति यद्योग्यानुपलब्धिनिश्चितं गृहासत्त्वं तावत्सुदृढं तथा च गृहनियमग्राहकस्य प्रामाण्ये स नास्ति शास्त्रस्य तु प्रामाण्ये स बहिरस्ति तथा च स बहिरस्तीति कल्प्यते भावत्वेन लाघवात् न तु नास्तीति कल्प्यतेऽभावत्वेन गुरुत्वादिति । यत्त्वस्यां दशायामनयोर्विरुद्धार्थग्राहित्वेऽवगते जीवनग्राहकं गृहनियमग्राहकञ्च बाधितैकतरं परस्परविरुद्धत्वादिति सामान्यतो दृष्टेन लाघवाद् गृहनियमग्राहकस्यैव बाध्यता तु जीवनग्राहकस्य प्रमाणद्वयबाधालिङ्गने गौरवात् तद्बाधे हि शतवर्षावच्छिन्नजीवित्वतावत्कालीनगृहसत्त्वयोर्द्वयोरपि बाधा स्यात् विशेषणबाधे विशिष्टबाधस्यावश्यकत्वात् तथाहि शतवर्षावच्छिन्नजीवित्ववत्तयोपस्थिते देवदत्ते गृहनियमग्राहकेण प्रत्यक्षेण शतवर्षावच्छिन्नजीविगृहसत्त्वस्यैवालिङ्गनात् प्रत्यक्षोपनीतपर्वतत्वविशिष्टे धर्मिणि लिङ्गेन पर्वतो वह्निमानितिवदिति मैवम् । विशेष्यवति विशिष्टबाधो हि विशेषणबाधमात्रं सविशेषणे हीति न्यायात् न तु विशेषणबाधाधीनस्तत्र सतो विशेष्यस्यापि बाधः क्षणभङ्गापत्तेः नियमप्रत्यक्षं च शतवर्षं जीवित्वं ज्योतिः-

शास्त्रोच्छिष्टमनुवदति न तु विधत्ते वन्ह्यनुमानमिव पर्व-तत्वं तेन तद्बाधे तद्विधायकस्यैव बाधो न तु तदनुवाद-कस्य देवदत्तगृहनियमे प्रत्यक्षं प्रमाणमन्यास्पृष्टत्वादिति किं च बाध्यत्वज्ञानाय विरोधित्वज्ञानमात्रमपेक्ष्यते न तु संशय एव कल्पके लाघवस्य सहकारिता कल्प्यत इति यदपि देवदत्तो जीवनमरणान्यतरधर्मा प्राणित्वादिति तदपि न जीवनमरणसन्देहेन तस्य तदा तदन्यतरधर्मवत्त्वं ज्ञातमेवास्ति ततस्तत्कथमनुमीयतां वैयर्थ्यादिति तस्मा-त्संशयेनैव लाघवसहकाराद्बहिःसत्त्वमर्थाप्यत इति । अत्रोच्यते सम्बन्धं विनार्थापनेतिप्रसङ्गात्स इह वाच्यः स च व्याप्तिलक्षणः स च नान्वयेन न वा व्यतिरेकेणेहास्तीति यत्किञ्चिदेतत् ॥

योग्यानुपलब्धिरभावग्राहिका सा च द्वेधा ज्ञाता च स्वरूपसती च तत्राद्यानुमानमेव अन्त्या तु प्रत्य-क्षसहकारिणी। नन्वियं योग्यस्यानुपलब्धिर्योग्ये वानुप-लब्धिः नाद्यः स्तम्भे पिशाचान्योन्याभावाप्रत्यक्षापत्तेः न हि पिशाचो योग्यः न द्वितीयः महति वायावुद्भूतरूपा-भावस्य सत्यालोकेप्यचाक्षुषत्वापत्तेः न हि वायुश्चक्षुर्योग्यः नान्त्यः न्यायमते सर्वस्यैवानुपलम्भस्य योग्यत्वात् भट्ट-मते तु सर्वस्यैवायोग्यत्वादिति। अथ प्रतियोगिनो यावदुप-लम्भकसाकल्ये सत्यनुपलब्धिर्योग्यानुपलब्धिरिति तन्ना-सम्भवात्। न हि प्रत्यक्षार्हस्य तत्र सतो यावदुपलम्भक-साकल्ये सत्यनुपलब्धिः सम्भवति सामग्र्याः कार्यनिय-मात् नाप्युपलम्भके प्रतियोगीतरेति विशेषणं असम्भवा-देव न हि प्रतियोग्यसत्त्वे प्रतियोगीतरस्य प्रतियोगिग्रा-हकस्य सर्वस्य सत्त्वं भवति प्रतियोग्यसत्त्वे प्रतियोगिसन्नि-

कर्षस्याप्यसत्त्वनियमात् । अथ प्रतियोगितद्व्याप्येतरयावत्तदुपलम्भकसाकल्ये सत्यनुपलब्धिर्योग्यानुपलब्धिरिति ब्रूम इति चेन्न एकाश्रयनाशजन्यस्य संयोगध्वंसस्य पारोक्ष्यापत्तेः । प्रतियोगितद्व्याप्यभिन्नो यः संयोगस्याश्रयो ध्वस्तः सोपि संयोगस्योपलम्भक एव संयोगस्य संयोगिद्वयव्यङ्ग्यत्वात् । तथा च तत्र प्रतियोगितद्व्याप्येतरयावत्तदुपलम्भकसाकल्यं नास्ति नष्टाया आश्रयव्यक्तेरसत्त्वादिति । अथ प्रतियोगिसत्त्वविरोधिनी योग्यानुपलब्धिः न हि प्रतियोगिग्राहकसत्त्वे प्रतियोगिनि च योग्ये सत्यनुपलब्धिः सम्भवति न हि महत्यालोके महान् घटश्चक्षुष्मता चक्षुःसन्निकृष्टो व्यासङ्गाभावे सति न गृह्यत इति सम्भवति सामग्र्याः कार्यनियतत्वात् । एकाश्रयनाशे तु या संयोगानुपलब्धिः सा संयोगसत्त्वे न सम्भवति योग्यो हि संयोगो यदि तत्र स्यात्तदा गृह्येतैवेति । मैवम् । यदि घटे पटतादात्म्यं स्यात् तदोपलभ्येतैव न चोपलभ्यते तस्माद्घटे पटतादात्म्यं नास्तीत्यवगम्यते अयं तु घटे पटतादात्म्यस्य संसर्गाभावग्रहः न तु घटे पटान्योन्याभावग्रहः तत्र पटः प्रतियोगी तादात्म्यमवच्छेदकं तथा चायं तादात्म्यसंसर्गाभावो यथोक्तसामग्र्या गृह्यताम् अन्योन्याभावस्तु समानाधिकरणनिषेधरूपो घटादिधर्मिप्रतियोगिकः तादात्म्यावच्छिन्नप्रतियोगिताकः स कथमेवं ग्राह्यः । अथ य एव तादात्म्यसंसर्गाभावः स एव तादात्म्यान्योन्याभाव इति चेत् तर्हि तादात्म्यसंसर्गाभावे प्रविष्टस्यान्योन्याभावस्य लक्षितैवलक्षणलक्षितत्वादित्यत्र सूत्रे चतुर्थाभावत्वं व्यवस्थापयतोऽक्षपादस्य महामुनेः प्रमत्तत्वमापद्येत अस्त्वेवमिति चेत् धिङ्मूर्ख विरुद्धानां हि भेदव्यवस्थाप

नायान्योन्याभावमङ्गीकुरुषे विरुद्धयोरेव च समानाधिकरणव्यधिकरणनिषेधयोरन्योन्याभावतादात्म्यसंसर्गाभावयोर्भेदमपह्नुषे चेति विरुद्धयोरप्यभेदमातिष्ठमानो न्यायमतत्यागं वेदान्तमतप्रवेशं च न बुध्यस इति दूरमपसर । अत्राहुः प्रतियोगीत्यनेन निरूपकमुक्तं तच्च संसर्गाभावे प्रतियोगिरूपमेव अन्योन्याभावे तु तदवच्छेदकं तेन तादात्म्यवत्तयाधिकरणस्यानुपलब्धिः सैवान्योन्याभावग्राहिका न हि तदभिन्ने तत्तादात्म्यवत्तयानुपलब्धिसम्भवति यदि हि स्तम्भः पिशाचतादात्म्यवान् स्यात् तदा तद्वत्तयोपलभ्येत स्तम्भः स च पिशाचतादात्म्यस्याधिकरणयोग्यतयैव योग्यत्वसम्भवात् । ननु घटः पटो नेत्यत्र नञा घटे पटान्योन्याभावः प्रत्याय्यते आरोप्यते तु घटपटतादात्म्यं कथमन्यथा घटः पट इत्यारोपशरीरं स्यात् । तथा च तादात्म्यमारोप्यते धर्मी निषिध्यत इति चित्रमिति चेत् । किं चित्रं तादात्म्यावच्छिन्नो धर्मी आरोप्यः किन्त्वारोपे तादात्म्यस्य प्राधान्यं निषेधबुद्धौ तु धर्मिणः प्राधान्यमिति विशेषः कथमेवं संविदं पृच्छ संविदेव हि भगवती वस्तूपगमे नः शरणमिति । ननु भेदोन्योन्याभावः स च धर्मिप्रतियोगिको अभेदस्तु तादात्म्यं तत्कथं भेदाभेदयोः परस्परविरहात्मत्वं न कथञ्चित् परस्परविरुद्धौ हि तौ । नन्वनुपलब्धिरनुयोगिनः प्रतियोगिमत्तयोपलम्भस्याभाव इति तावन्न सम्भवति आहार्यारोपरूपस्य तदुपलम्भस्य तत्रावश्यकत्वात् तत्प्रमाविरहस्तथेति चेत् । न । प्रमाणान्तरेण प्राचीत्ववत्त्वप्रमितावपि दोषात्तत्र तदभावभ्रमदर्शनात् अभावप्रमायां प्रतियोगिमत्त्वप्रमाविरहो हेतुरिति चेन्न । प्रतियोगिमत्त्वे प्रमीयमाण एव प्राङ्नासीदि

दमत्रेति प्रतीतेः यत्कालीनत्वेन तत्राभावः प्रतीयते तत्कालीनायाः प्रतियोगिमत्तायास्तत्रापि प्रमितिविरह एव न हि प्राङ्नास्तितास्थलेपि तत्कालीनप्रतियोगिमत्तया इदानीमपि प्रमितिः प्राङ्नास्तिताविरोधादिति चेत्। हन्तैवमभावकालीनप्रतियोगिमत्तायाः प्रतीतिः क्वापि न सिद्धेति कथं तदभावलक्षणानुपलब्धिः सिध्यतु प्रतियोग्यसिद्धेरिति मैवम्। अभावसमये अधिकरणे प्रतियोगिमत्त्वप्रकारकप्रमाविषयत्वाभावस्यानुपलब्धित्वात् प्रमा चेह यथार्थधीमात्रं अतः प्राङ्नास्तिताधीस्थले तादृशस्मरणाभावकत्वमनुपलब्धिरेव तादृशानुभवाभावस्मरणाभावयोर्द्वयोरपि प्रतियोगिसत्त्वविरोधित्वाविशेषात्। ननु यदि स्यादुपलभ्येत न चोपलभ्यते तस्मान्नास्तीति तावदनुपलब्धेः शरीरमेवं चानुभवाभावरूपैव सति सिध्यति तत्कथं प्राङ्नास्तितायां स्मरणाभावरूपां तामात्थेति चेत्। सत्यम्। वस्त्वभावव्याप्योनुभवाभावः तद्व्याप्यश्च स्मरणाभावोत्रेति व्याप्यव्याप्यस्य सुतरां व्याप्यतयानुमानस्य जघन्यतया साक्षादेव स्मरणाभावेन वस्त्वभावानुमितिरुक्ता। अस्त्वेवं तथापि स्मरणाभावो नानुपलब्धिः सत्यं तत्स्थानाभिषिक्ततया सोप्यनुपलब्धिरुक्त इति एवं च खण्डनकृता द्विजिह्वेन प्रमाणानि विदश्य षोडशपदार्थी कदर्थिता सेयं मया गुरुचरणसेवाचरणेन जाङ्गलिकप्रवरेण जगदहङ्कारेण निरामयीकृतेति ॥

अथ प्रमाणखण्डनानन्तरं तदाभासखण्डनं प्रस्तौति कश्चायमसिद्धो नाम व्याप्तिपक्षधर्मताभ्यामप्रमितोऽसिद्ध इति चेन्न। हेत्वाभासान्तराणामप्येवमसिद्ध एव प्रवेशापत्तेः व्याप्तिं पक्षधर्मतां तत्प्रमितिं चाविरुद्धतां विना हेतुदो

षत्वासम्भवात् । अथ व्याप्तिपक्षधर्मतया प्रमाविरहो नासिद्धो येन सर्वत्रासिद्धसङ्करः स्यात् किञ्च तादृशधीविरहो न हेत्वाभासो ऽज्ञायमानत्वात् आत्ममनःसंयोगाद्यभाववत् किन्तु व्याप्तिपक्षधर्मतावैशिष्ट्यविरह एव ज्ञायमानदोषत्वात् ज्ञायमानकरणे उत्सर्गतो ज्ञायमानस्यैव विरोधिनोऽसाधारणदोषत्वात् तथा च यत्र व्यभिचारविरोधावद्वारीकृत्य व्याप्त्यभावः प्रतीयते तत्रैव व्याप्यत्वासिद्धिः यथा नीलधूमशरीराजन्यत्वयोः यत्र तु पक्षासिद्धिस्तत्राश्रयासिद्धिः यत्र च सत्यपि पक्षे हेतोस्तद्धर्मताविरहस्तत्र स्वरूपासिद्धिः एते च दोषा असिद्धमध्यमध्यासते यत्र तु व्यभिचारेण विरुद्धतया वा व्याप्तिभङ्गावगमस्तत्र यथायथं सव्यभिचारविरुद्धौ दोषानुपजीव्यत्वात् ताभ्यामेव प्रथमावगताभ्यामनुमानस्यासाधकीकरणात् न हि साध्यव्यभिचारी साध्याभावाव्यभिचारी वा साध्यसाधक इति सम्भवतीति सत्प्रतिपक्षे तु नासिद्धिगन्धोपि किन्तु परस्परप्रतिबन्धेनानुमित्यजनकत्वं बाधेपि न सामान्यसम्बन्धस्य प्रथमगृहीतस्य बाधेन भङ्गः समानविषयत्वाभावात् किन्तु पक्षे बाधेन तद्व्यतिरिक्तविषयता प्रथमगृहीतसम्बन्धस्य व्यवस्थाप्यते तद्व्यवस्थापनाय च मध्ये पक्षेतरत्वमुपाधिः कल्प्यते अत एवाह बाधेन परोपाधिमुन्नीयतामन्यथा वेति न कश्चिद्विशेष इति । यद्वा सत्प्रतिपक्षबाधौ साक्षात्प्रतिबन्धकतयैव दोषाविति तथा च यत्र व्याप्तिपक्षधर्मताप्रमितेर्विरहस्य विरोधिधियं विना धीस्तत्रासिद्धो हेत्वाभासः यत्र तु व्याप्तिविरहस्य व्यभिचारादिधिया धीस्तत्र यथाकथं सव्यभिचारविरुद्धौ यत्र तु प्रतिपक्षस्य धीस्तत्र बाधप्रतिरोधौ । नन्वेवमपि व्याप्तिपक्षधर्मताधीसाध्यानुमितिरिति तद्विरह एको दोषोस्तु तथा बाधप्रतिरोधावपि

साम्याद्दोषौ प्रतिबन्धकत्वादिति सन्तु त्रयोमी हेत्वाभासाः व्यभिचारविरोधौ तु कथं तौ हि व्याप्तिविरहं गमयन्तावुपाधिवद्भवितुमर्हत इति नैतद्व्याप्तिविरहोन्नायकावपि तौ प्रथमोपस्थितत्वे सति स्वतो दूषणात्क्षमत्वात् पृथगिति खण्डने न्यायमतसङ्क्षेपः ॥

अत्र खण्डनं इदमसिद्धलक्षणं सव्यभिचारादावस्ति न वा आद्ये सोप्यसिद्धभेद इति पञ्चसंख्याविरोधः । अथैतल्लक्षणसत्त्वेपि न तेऽसिद्धभेदास्तदा लक्षणमतिव्यापकं अन्त्ये विरुद्धादीनां व्याप्तिपक्षधर्मताभ्यां प्रमितत्वं स्यात् व्याप्तिपक्षधर्मताप्रमितत्वतदभावौ विहाय तृतीयकोटेरसम्भवादिति । अत्रोच्यते । असिद्धत्वादीनां हेत्वाभासत्वसाम्याद्व्याप्यानां उपाधीनां विभजनान्न विभागभङ्गः ते ह्यसङ्कीर्णा एव न वा धर्मिसङ्करो दोषः तेषामविभजनात् । नन्वस्त्वेवं तथाप्यसिद्धिः कथमेको दोषोऽसिद्ध एव च कथमेको हेत्वाभासः तथा हि व्याप्तिविरहे व्याप्तिधीविरहे च व्याप्यत्वासिद्धिः पक्षविरहे तद्धीविरहे तद्विशेषणसिषाधयिषाविरहे चाश्रयासिद्धिः पक्षधर्मताविरहे तद्धीविरहे च स्वरूपासिद्धिरिति वहव्योऽसिद्धयः व्याप्यत्वासिद्धोयमाश्रयासिद्धोयं स्वरूपासिद्धोयमित्येवमवगता तद्भाविताश्च स्वपरानुमितिप्रतिवन्धकाश्च त्रयो भवन्ति । अथासिद्धोयमितिज्ञानादनुमितिप्रतिबन्धस्य दर्शनादसिद्धेरेकदोषत्वं तर्हि व्याप्यत्वासिद्धोयमाश्रयासिद्धोयं स्वरूपासिद्धोयमित्यादिबुद्धौ प्रत्येकमनुमितिप्रतिबन्धदर्शनादसिद्धिश्च तद्विशेषाश्च सन्तु चत्वारो दोषाः । अथासिद्धिः सामग्रीविरहरूपो दोषः व्याप्त्या पक्षधर्मतया च प्रमितेरनुमितिसामग्रीत्वादिति विशिष्टधीविरह एवायं दोषो न तु प्रत्येकधीविरहः तस्य विशिष्टधीविरहत्वाभावात् किन्तु प्रत्ये-

कधीविरहविशिष्टधीविरहमुत्थापयन्त उपाधिवदन्यथा-सिद्धा इति हन्तैवं सव्यभिचारविरुद्धावपि व्याप्यत्वा-सिद्धिमुत्थापयन्तौ स्तामन्यथासिद्धाविति पञ्चहेत्वा-भासी पुनर्व्याकुप्येत अथ सव्यभिचारविरुद्धयोस्तदुत्थाप-कत्वेपि स्वतोऽदूषकत्वात् पृथगेवाभासत्वमस्तु अथैवम-पि व्याप्यत्वासिद्धादयस्तिस्रोऽसिद्धिश्चैकेति चत्वारो दो-षाः चतसृणामपि ज्ञानस्य प्रत्येकमनुमितिप्रतिबन्धकत्वद-र्शनादिति। मैवम्। एवं हि विशेषवत्सामान्यस्यापि दोषत्वे हेत्वाभासविशेषवत्तत्सामान्यस्यापि दोषतायां हेत्वाभा-सनामा षष्ठोपि हेत्वाभासस्तवापि स्यात् अथ न निर्विशेषं सामान्यं भवेच्छशविषाणवदिति न्यायाद्धेत्वाभासोयमि-तिधीर्थं कञ्चन हेत्वाभासविशेषमालम्बते स एव तत्र दोषः तर्ह्यसिद्धोयमित्यत्रापि तथात्वे व्याप्यत्वासिद्ध्यादिरूपो विशेष एव दोषोस्तु अथ व्याप्यत्वासिद्धोयमित्यादिधीर्यत्र तत्र विशेषो दोषः यत्र त्वसिद्धोयमितिधीस्तत्र सामान्यं दोषः अत एवासिद्धत्वविरुद्धत्वादिधियां पञ्चानां दोषत्वे पञ्च हेत्वाभासीमात्थेति। मैवम्। सव्यभिचारत्वधीर्विरुद्ध-त्वधीर्वा न व्याप्यत्वासिद्धिमालम्बते तेन तौ भिन्नावेव असिद्धत्वधीस्तु व्याप्यत्वासिद्धिमाश्रयासिद्धिं स्वरूपासि-द्धिं वावश्यमेवावलम्बते सामान्यधियो विशेषविषयकत्व-नियमात् अत इमास्तिस्रः तथापि सामान्यप्रकारकं ज्ञानं विशेषप्रकारकज्ञानतो भिन्नमिति पुनश्चतस्रस्ता इति चेत्। किमतः विशेषविषयकमित्येतावतैव विशेषस्य दोषत्वं ब्रूमो न तु विशेषप्रकारकत्वेन। ननु व्याप्यत्वासिद्ध्यादिज्ञा-नमसिद्धिज्ञानत्वेन वा दोषोस्तु असिद्धिज्ञानं वा व्याप्य-त्वासिद्ध्यादिज्ञानत्वेनेति किं विनिगमकम्। उच्यते। सामा-न्यज्ञानस्य विशेषविषयतानियमवत् विशेषज्ञानस्य सामा-

न्यविषयतानियमो नास्तीति विशेषज्ञानात्प्रतिबन्धदर्शना-त्तस्य दोषत्वे क्लृप्ते सामान्यज्ञानस्थलेपि विशेषालम्बनतयैव तज्ज्ञानस्य दोषत्वमिति तस्मात्तिस्रोऽसिद्धयस्त्रयोऽसिद्धा इति कथं पञ्च हेत्वाभासी अनेनैवाशयेन खण्डनकारोपि प्रथमे तावदसिद्धभेदमध्यमध्यासते इत्यसिद्धानां बहुत्वमेव व्याजहारेति विभागभङ्ग इति । अत्राहुः । आश्रयासिद्धिः स्वरूपासिद्धिर्व्याप्यत्वासिद्धिश्च पृथगेव दोष इति सत्यं किन्तु तिसृणां यथान्यस्तमेकं रूपं पुरस्कृत्य विभागकरणान्न विभागभङ्गः न च मुनिरेव पर्यनुयोज्यः स्वतन्त्राभिप्रायत्वात् अत एव हानौ हेत्वादिहानिं प्रतिज्ञाहानित्वेन संगृह्णतः प्रतिज्ञान्तरात्तु हेत्वन्तरं विभज्य निर्दिशतो मुनेः पर्यनुयोगो निरस्तः यच्च न्यायतन्त्रमतन्त्र-न्यस्यता खण्डनकृता व्याप्यत्वासिद्धिरुपाधिरिति लपितं तत् प्रलपितं उपाधिव्याप्त्योरन्येन विरहत्वासम्भवात् न हि प्रकृतोपाध्यभावो व्याप्तिः प्रतियोग्यप्रसिद्धेः नापि यत्किञ्चिदुपाध्यभावः सा व्याप्यत्वासिद्धेपि सत्त्वात् नाप्युपाधिसामान्याभावः सामान्याभावस्य भावत्वासम्भवात् न हि सर्वव्यक्तिप्रतियोगिक उपाधित्वावच्छिन्नप्रतियोगिताक एकः तदभावश्च सर्व एवोपाधय इति व्याप्तेरेकस्या एव विरहः सर्वे उपाधयः स्युः किन्तु व्याप्तिमनौपाधिकसम्बन्धरूपामपि वदन्तो यावत्स्वव्यभिचारिव्यभिचारिसाध्यसामानाधिकरण्यरूपामाहुः स च नोपाध्यभावः । वस्तुतस्तु अव्यभिचरितःसम्बन्धो व्याप्तिरनौपाधिकत्वं तु तल्लक्षणमतो यत्किञ्चिदेतत् व्यभिचारविरोधिनः सामानाधिकरण्यस्य तादृशसम्बन्धमात्रस्य वा व्याप्तित्वात् न चैवं लाघवादावश्यकत्वाच्च व्यभिचाराभाव एवास्तु व्याप्तिः तथापि व्यभिचारोप्यसिद्धिरस्त्वति-

वाच्यं व्यभिचारो हि साध्यवदन्यवृत्तित्वं तदभावश्च नाव्यभिचारोऽवृत्तिसाधारण्यात् वृत्तिमत्त्वे सति सोऽव्यभिचार इति चेत् । न । केवलान्वयिन्यसम्भवात् तत्र हि साध्यवदन्याप्रसिद्धिः किञ्च प्रकृतहेतोः प्रकृतसाध्येन समं व्यभिचारस्याभावो न व्याप्तिः प्रतियोग्यप्रसिद्धेः नापि यत्किञ्चित्प्रतियोगिकव्यभिचाराभावः सा अतिप्रसङ्गात् किन्तु यत्समानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिः द्रव्यत्वसमानाधिकरणान्योन्याभावप्रतियोगिता संयोगेन नावच्छिद्यते द्रव्यं संयोगि नेत्यप्रतीतेः वह्निसमानाधिकरणान्योन्याभावप्रतियोगिता तु धूमेनावच्छिद्यते वह्निमान्धूमवान्नेति प्रतीतेः अतो द्रव्यत्वं संयोगव्याप्यं वह्निस्तु न धूमव्याप्य इति स्थितम् । यद्यपि सर्वत्र वह्निमति धूमवदन्योन्याभावो नास्ति महानसादौ धूमवद्भेदस्यापि सम्भवात् तथापि क्वचिदस्ति धूमवति तु क्वापि न वह्निमद्भेदः किन्तु सर्वत्रैव तदभेदः यद्यपि सर्वेषु हेत्वाभासेषु सिद्धिप्लवस्तेन सैव दोषो भवितुमर्हति तथापि त्रयाणामप्यनैकान्तिकानां संशायकत्वेनासाधकतेति त एव त्रयो दोषाः प्राथम्यात् न तु तेषु सत्स्वपि व्याप्यत्वासिद्धिः चरमोपस्थितत्वात् तथाहि सा साधारणेऽन्वयेनासाधारणे व्यतिरेकेणोभयसहचारादनुपसंहारिणि तु पक्ष एवोभयान्वयात्साध्यसंशयार्जनादसाधकता अथ तेषु व्याप्तिधीरेव नोदेति त्वन्निर्दिष्टोभयसहचारादिति व्याप्यत्वासिद्धिरेवास्तु क्लृप्तत्वादसाधकताबीजमिति सैवामीषु त्रिषु दोष इति चेत् । तर्हि मास्तु संशयद्वारतापि किन्तु साधारणे विपक्षगामितयाऽसाधारणे सपक्षागामितयानुपसंहारिणि पक्षमात्रगामितयैव प्रथमप्रतीतया

तेषामसाधकत्वानुमितिसम्भवात् किन्तु ते त्रयोप्य- सिद्धात् पृथक् एवञ्च दूषकतायां प्रस्थानभेदात्तेषां त्रित्व- स्यादिति न च वाच्यं इष्टत्वात् विरुद्धे तु विरुद्धत्वज्ञाना देवासाधकता सत्प्रतिपक्षे तु लिङ्गयोर्व्याप्तिपक्षधर्मताविशिष्टधीसत्त्वेपि परस्परप्रतिबन्धादेवासाधकता बाधे तु बल- वता साध्याभावज्ञानेन प्रतिबन्धादेवासाधकतेति बाधे च तृतीयलिङ्गपरामर्शोदयं वक्ष्यामः तस्मात्साधारणानुपसं- हारिविरुद्धा व्याप्यत्वासिद्ध्युन्नयनक्षमतया तदुपजीव्याः प्रथमोपजातेन साधारणत्वादिज्ञानेनासाधकतां हेतोः साधयन्तो भवन्त्यसिद्धात् पृथक् हेत्वाभासाः सिद्धसाध- नस्थले साध्यसिद्धिः सोपाधावुपाधिराश्रयासिद्धिव्याप्य- त्वासिद्ध्योरुपजीव्यावप्येतौ न पृथक् हेत्वाभासौ स्वतो दूषकत्वाभावात् किन्तु सिद्धिः सिषाधयिषां विघटयन्ती धर्मिविशेषणविघटनेनाश्रयासिद्धिं निर्मिमाणा एवमुपा- धिरपि हेतोः स्वव्याप्यतया स्वव्याप्यसाध्यव्याप्यत्वधि- यमुत्पादयन्ननर्थोत्थानबीजमात्रमिति तथाहि तर्केणोपाधौ स्वरूपेण निश्चिते अयं हेतुः साध्याव्याप्यः साध्यव्यापको पाध्यव्याप्यत्वात् प्रमेयत्वादिवदिति व्याप्यत्वासिद्धि- मुत्थापयति सा त्वनुमानं दूषयतीति ॥

अथ विरुद्धत्वादीनां प्रकृतहेत्वसाधकतासाधकत्वेन- हेत्वाभासत्वमुक्तं तत्र कोऽसौ विरुद्ध इति । साध्याभाव व्याप्तो विरुद्ध इति चेत् । तदा हि इदमसाधकं साध्याभा- वव्याप्यत्वादित्यस्य साध्याभावनियतसमानाधिकरण- त्वादित्यर्थे नियमांशो व्यर्थः साध्याभावसामानाधिकरण्य- मात्रस्यैव साधारणानैकान्तिकवदसाधकत्वे तन्त्रत्वात् अपि च नियमांशे व्यर्थतया निरस्ते विरुद्धस्य साधारणानुप्रवेशो विरुद्ध एव लुप्यते किञ्च साध्याभावनियतसामानाधिकर-

ण्यग्रहे भवति साध्याभावसामानाधिकरण्यग्रह आवश्यक इति स एव क्लृप्तत्वादावश्यकत्वाल्लाघवाच्च दोषः स्यान्न तु विरुद्ध इति खण्डनं। अत्रोच्यते इयं हि विरुद्धस्य स्वरूपनिरुक्तिरिति सत्यं न हि साध्यतदभावोभयगामिनि परीक्षकाणां विरुद्धव्यवहारः किन्तु साध्याभावमात्रस्पृशि असाधकतायां तु नेदं लिङ्गं येन विशेषणवैयर्थ्यं स्यात् किन्तु साध्यविपरीतप्रमितिजनकत्वं तदेव कुत इत्याकाङ्क्षायां साध्यविपरीतव्याप्यत्वादिति । हन्तैवमसाधकतासाधकत्वं साध्यविपरीतप्रमितिजनकत्वस्य तद्बीजत्वं च साध्याभावतद्व्याप्यत्वस्य तथा च विरुद्धो न हेत्वाभासः स्यादुपाधिवदिति चेन्न। साध्याभावप्रमितिजनकत्वमेव विरुद्धत्वमित्यभ्युपगमात्। तदुक्तं तेनैव लिङ्गेन साध्याभावप्रमाविरोध इति। अन्ये तु अदृष्टसाध्यसहचारत्वं अदृष्टसाध्याभावव्यभिचारित्वं वा तल्लिङ्गं सर्वादृष्टिः सन्दिग्धा स्वादृष्टिस्तु व्यभिचारिणीति यदि तदा साध्यासहचरितत्वं साध्यव्यापकाभावप्रतियोगित्वं वा लिङ्गमस्तु। ननु हेत्वाभासशरीरमेवासाधकतालिङ्गं तथा चोक्तचतुष्टयमपि विरुद्धस्य शरीरं स्यात् असाधकतालिङ्गत्वात् तच्चायुक्तमवृत्तिसाधारण्यात् इदं हि चतुष्टयमाकाशादेरप्यस्तीति किमतः अवृत्तावपि विरुद्धव्यवहारः स्यादिति चेत्तत्र साध्याभावप्रमितिजनकत्वमात्रस्य तन्त्रत्वमिति मदुपगमात् एवं चासाधकतानुमाने कर्तव्ये नियमांशो व्यर्थ इति विरुद्धज्ञाने चासाधकतानुमितिबीजे भवति साध्याभावसामानाधिकरण्यज्ञानमेवावश्यकत्वादिनाऽसाधकतानुमापकमस्तु कृतमनावश्यकेन गुरुणा जघन्यप्रतिपत्तिकेन विरोधेनेति खण्डनमपास्तं असाधकतानुमितौ साध्यव्यापकाभावप्रतियोगित्वस्य मया हेतुत्वेनोपगमात् यदा तु विरुद्धे साध्याभावव-

ङ्गामितामात्रमेव प्रतीयते तदा साधारणतयैवायं दोषः यदा तु साध्यवदवृत्तिताधीः तदा त्वसिद्धतयोपधेयसङ्करस्य मयोपगमात्। नन्वयं साध्यवदवृत्तितया प्रतीयमानश्चेद्दूष- येत्तदाऽसिद्धे प्रविशेत् यदि तु साध्याभावव्याप्यतया तदा गौरवेण नियमांशे त्यक्ते सति साधारणतया दूषयेत्तदुभय- थापि पृथग् हेत्वाभासो न स्यादिति चेत्। सत्यं साध्यव्याप- काभावप्रतियोगितया प्रतीयमानोऽयं दूषयन् पृथगिति ब्रूमः इदं तु रूपमसिद्धेऽप्यस्ति न त्वसिद्ध एवास्ति येनासिद्धमेवा- सौ प्रविशेत्। वस्तुतस्तु स्वसमानाधिकरणान्योन्याभाव- प्रतियोगिसाध्यवत्कत्वं विरुद्धत्वं सद्धेतुस्तु नैवं धूमवान्व- ह्निमान्नेत्यप्रतीतेः इदं च रूपं नावृत्तौ नवा व्यभिचारिणी- ति नास्य धर्मिसङ्करोपीति। यच्चानैकान्तिकः सव्यभिचार इति सूत्रमखण्डि तदप्यबोधात् साध्यस्येव तदभावस्या- प्युपस्थापनसमर्थत्वं ह्यनैकान्तिकत्वं तथाहि साधारणो- न्वयेनासाधारणो व्यतिरेकेणानुपसंहारी पक्ष एवोभयस- हचारेण साध्यतदभावावुपस्थापयितुं क्षमः तेन साध्यतद- भावोभयोपस्थापनसमर्थत्वं साध्यवन्मात्रवृत्त्यन्यत्वे सति साध्याभाववन्मात्रवृत्त्यन्यत्वं वा न चैवं सर्वमभिधेयं प्रमेय- त्वादित्यनुपसंहारिणो न संग्रहः तत्र साध्याभावाप्रसि- द्धेरिति वाच्यं तस्यानुपसंहारित्वाभावात् किन्तु सद्धेतु- रेव केवलान्वयिनि साध्ये तत्समानाधिकरणमात्रस्यैव गम- कत्वात्। नन्वस्त्वेवं तथापि नायमेको हेत्वाभासः तथाहि उक्तरीत्यास्य संशायकत्वेन दूषकतायामेकहेत्वाभासता भवेत् सा चायुक्ता विपक्षगामितामात्रेणैव लघुनावश्यकेन प्रथमप्रतीतेन साधारणस्य तद्वत्सपक्षास्पर्शितामात्रेणैवा- साधारणस्यैकधर्म्युपसंहाराभावेनैवानुपसंहारिणो दूषक- त्वसम्भवादिति बाढं अयोमी साधारणानुपसंहारि-

भेदात् न चैवं विभागासम्यक्त्वं उक्तरूपपुरस्कारेणैव विभागकरणात् तत्र च विपक्षवृत्तित्वं साधारणत्वं तन्मात्रस्यैव दूषकत्वात् विरुद्धस्यापि तत्त्वाज्ञाने विपक्षवृत्तिताज्ञानदशायां साधारणत्वं अन्यथा तदा तस्य हेत्वाभासान्तरता स्यात् उपाधेरसङ्कर एव सर्वमनित्यं मेयत्वादित्यनुपसंहारो शब्दो नित्यः शब्दत्वात् भूर्नित्या गन्धवत्त्वादित्यसाधारणश्च वस्तुगत्या साध्याभाववद्वृत्तित्वेन साधारणोपि पक्षतादशायां तथात्वेन न बोद्धुं न वा बोधयितुं शक्य इत्युभयोर्भेदेनोपन्यासः अनित्यः शब्दः शब्दत्वादित्यसाधारणश्च वस्तुतस्सद्धेतुरपि पक्षतादशायामसाधारण एव पक्षमात्रवृत्तित्वात् । ननु पक्षतादशायामसाधारणतया साध्यनिश्चयदशायामाश्रयासिद्धतया सर्वदैवायमाभास इति न कदापि सद्धेतुरिति चेन्न । साध्यसन्देहे प्रमाणान्तरेणानुपनुन्ने सिषाधयिषया पक्षतासम्भवेनाश्रयासिद्धेरसम्भवात् । ननु संशयाभावात्सिषाधयिषापि नोदेष्यतीति चेत् । तथापि सिद्धान्तरस्येष्टसाधनताज्ञानेनात्मनीव तत्सम्भवात् तत्र हि श्रोतव्यो मन्तव्य इति श्रुत्या श्रुतिनिश्चितस्याप्यात्मनो मननमिष्टसाधनतयावसितमिति तत्र तदधीना सिषाधयिषोदेतु प्रकृते तु तद्वद्द्वितीयसिद्धेरिष्टसाधनताग्राहकं किमपि न पश्यामो येन तत्र तदधीना निश्चितेपि सिषाधयिषोत्पद्येतेति चेत् । अत्रापि यद्यप्यस्य प्रातिभेनेष्टसाधनताज्ञानेन द्वितीयसिद्धाविच्छोदयेत्तदा कस्तां वारयेत् अयं तु विशेषो यदसाधारणो दशाविशेषे दोषः विशेषदर्शने सति संशयसत्प्रतिपक्षयोर्द्वारयोरनुदयात् सत्प्रतिपक्षवत् साधारणानुपसंहारिणौ तु नित्यदोषाविति । प्राञ्चस्तु असिद्धानैकान्तिकौ त्वदुक्तरीत्या यद्यपि प्रत्येकं त्रिविधौ तथापि सामग्रीविरह-

त्वेन संशायकत्वेन च दूषयन्तौ द्वावेवेति मुनेराशयः ॥

अथ सत्प्रतिपक्षः । अत्र केचित् । तुल्यबलबोधितसाध्यविपर्ययः सत्प्रतिपक्षितः तद्यथा तुल्यबलेन समानव्याप्तिपक्षधर्मताकत्वेन रूपेणानुमितिभागित्वाभिमतेन वादिना ज्ञायमानेन लिङ्गत्वाभिमतेन प्रतिहेतुना यदीयः साध्यविपर्ययो बोधितो बोधयितुमारब्धः स सत्प्रतिपक्षित इति ईदृशौ चात्र द्वावपि हेतू इति द्वावपि सत्प्रतिपक्षितौ । बाधितस्त्वधिकबलबोधितसाध्यविपर्यय इति ततोऽस्य भेदः इदं तु स्वार्थपरार्थयोः साधारणमस्य रूपं एवं च बलं व्याप्तिपक्षधर्मते उभयलिङ्गगतयोस्तयोस्तौल्यं वैज्ञानिकं तथात्वेन ज्ञातो वानुमितिभागित्वाभिमत इत्येवं वर्णने बहुषु दूषणेषु निरस्तेष्वपि सत्प्रतिपक्षहेत्वोरबोधकत्वप्रयुक्तानि खण्डनान्यवशिष्यन्ते । तत्र ब्रूमः । मिथः प्रत्यनीकव्याप्यतयावगतयोरेकधर्मिणि प्रतिसन्धीयमानयोस्तद्व्यापकीभूतगोचराया अनुमितेर्नोत्पत्तिः अन्यथा तत्सत्त्वे तद्व्यापकयोरुभयोरपि व्यवहारः स्याद्विनिगमनाविरहात् द्वयोरपि याथार्थ्ये वस्तुनो विरुद्धद्वैरूप्यं च स्यात् तस्माद्व्याप्तिपक्षधर्मताधीसद्भावेप्यनुमितिरसम्भवन्ती कमपि स्वप्रतिबन्धकमाक्षिपति तच्च प्रतिबन्धकं न तावदुभयलिङ्गव्याप्तिपक्षधर्मतावगाहितृतीयलिङ्गपरामर्शविषयीभूतव्याप्तिपक्षधर्मतासंशयः विरोधिसन्धानमन्तरेण तस्यैवानुदयात् तस्मात्प्राथम्यादन्तरङ्गत्वादुपजीव्यत्वाच्च मिथः प्रत्यनीकव्याप्यतयावगम्यमानयोः धर्मयोरेकत्र धर्मिणि प्रतिसन्धीयमानत्वमेव विरोधिकोटिग्रहणजन्यतया प्रतिबन्धकं एवं च सति तुल्यबलबोधितसाध्यविपर्ययत्वं सत्प्रतिपक्षत्वमिति यदाशङ्क्य दूषितं तदयुक्तं न हि तत्रै-

कमपि साधनं स्वसाध्यं बोधयत्यपरेण प्रतिबन्धादिति न चाविनिगमादुभयोः साध्ययोरेकैवानुमितिरुदेति सा च परस्परविरुद्धार्थावगाहित्वेनार्थात्संशयाकारेति संशायकत्वेनास्याभासत्वमिति वाच्यं तर्हि द्वयं मिलितं संशायकं प्रत्येकं च हेत्वाभास इति यो हेत्वाभासः स न संशाययति यस्तु संशाययति स न हेत्वाभासः इति महद्वैशसं अथ द्वयोर्मिथो विरुद्धव्याप्ययोरेकत्रदर्शनाज्जिज्ञासोदेति अनयोः साध्ययोरनयोश्च हेत्वोः किं तत्त्वमिति तेनेदृशजिज्ञासाजनकत्वमेव सत्प्रतिपक्षितत्वमिति तन्न । जिज्ञासाजननेप्येकस्मिन्धर्मिणि विरोधिसाधनद्वयप्रतिसन्धानमेव तन्त्रमिति प्राथम्यादावश्यकत्वाच्च तदेव दोषः तेन गमकतौपयिकव्याप्तिपक्षधर्मताधीविषयेण यत्साध्यधीप्रतिबन्धनं तदेव सत्प्रतिपक्षितलक्षणं नन्वेवं कार्यं प्रतिबन्धन्प्रतिहेतुः सत्प्रतिपक्षयिता तेन च प्रतिरुद्धकार्यः सत्प्रतिपक्षित इति त्वद्वाक्यार्थः तथा च सत्प्रतिपक्षितत्वस्य ज्ञातस्य दोषतया तज्ज्ञाने सति कार्यप्रतिबन्धः कार्यप्रतिबन्धे च सति तद्धटितसत्प्रतिपक्षत्वसिद्धौ तज्ज्ञानमित्यन्योन्याश्रयः स्यात् न स्यात् कार्यप्रतिबन्धो हि सत्प्रतिपक्षस्य फलं सत्प्रतिपक्षस्तु विरुद्धानुमितिहेतुभूतव्याप्तिपक्षधर्मतोपपन्नलिङ्गोपस्थितिः सा चावश्यं विपरीतानुमितिं प्रतिबध्नातीति द्वयोरप्यनुमित्योः प्रतिबन्धः बाधस्तु नैवम् । ननु बाधे बलवता प्रमाणेन प्रकृतानुमितेः प्रतिबन्ध इह तु समानबलेनेति ततोस्य भेदः स्यात् तदुक्तं विरोधिबोधकान्यगमकतौपयिकरूपसम्पत्तिमत्तया ज्ञायमानेन प्रतिरुद्धकार्यलिङ्गत्वं तत्त्वं अत्र चोपजीव्येनानुमानेन बाधेतिव्याप्तिवारणाय विरोधिबोधकान्येति गमकतौपयिकरूपसम्पत्तिमत्ताया विशेषणं । हन्तैवं बाधे बलवता प्रतिबन्धः सत्प्रतिपक्षे तु

समानबलेनेति प्रतिबन्धाविशेषादुभयोरैक्यं स्यात् मैवम्। एवं हि पञ्चानामप्यैक्यं स्यात् अनुमितिप्रतिबन्धलक्षणफलाविशेषात्। किं नश्छिन्नमिति चेत् नहि फलैक्ये हेत्वैक्यं सम्भवति फलस्य ततो भेदात् किन्तु शरीरैक्ये तच्च न पञ्चानां न वानयोरपीति। ननु समानत्वाभिमता विरुद्धव्याप्तिपक्षधर्मतोपपन्नलिङ्गोपस्थितिः सत्प्रतिपक्षः तत्कवलितः सत्प्रतिपक्षित इति त्वन्मतं तथा च सत्प्रतिपक्षस्य हेतुदोषस्य हेत्वाभासान्तरज्ञानावश्यकत्वे उपस्थितेरपि ज्ञानं वाच्यं तथा च समानबलत्वेन ज्ञायमानस्य ज्ञानमपीह वाच्यं तच्चायुक्तं समानबलोपस्थितिरेव प्रतिबन्धिका न तु तद्धीरपि तत्सत्त्वे तद्विलम्बेन प्रतिबन्धविलम्बादर्शनादिति चेत्। अत्राहुः येन ज्ञानेन हेत्वाभासशरीरं निर्मीयते तस्य ज्ञानमवश्यं वाच्यं यथा व्यभिचारे निश्चितसाध्याभाववद्गामित्वलक्षणे निश्चयस्यापि ज्ञानं वाढं सत्प्रतिपक्षस्थलेप्युपस्थितेर्ज्ञानमवश्यमेवैषृव्यमिति हेत्वाभासानां ज्ञाननियम इत्यप्याहुः॥

ननु बाधो दोषो न तु बाधकं बाधश्च साध्याभावप्रमेति फलं दोषो न तु करणं तथा सत्प्रतिपक्षे विरुद्धं करणं बाधे तु विरुद्धं फलं दोषः अत एव साध्याभावप्रमायाः प्रामाण्यग्रहः प्रतिबन्धक इति तवैव सिद्धान्तोद्धार इति चेत्। अत्र केचित् बाधे प्राथम्यात्करणस्यैव दोषत्वं वस्तुतस्तु करणमपि स्वफलीभविष्यद्विरुद्धावगतिं विना न दूषयितुमलमिति तस्य तदुपधानमवश्यं वाच्यं तथा च चरमोत्पन्नापि साध्याभावधीर्बाधकस्य दूषकत्वे प्रथमोपस्थिता चोपजीव्या चेति विवक्षितविवेकेन सैव बाधो दोषः तथा च सत्प्रतिपक्षे विपरीतं करणं प्रतिबन्धकं तत्र फलोदयस्यासम्भवात् बाधे तु विपरीतं फलमेव

प्रतिबन्धकमिति क्वानयोः सङ्करसम्भावनापि एवं व्यव। स्थापिते एतत्प्रणालीमजानानं प्रति विरोधिबोधकान्ये-त्युपलक्षणविधयोक्तमिति सर्वं सुस्थम्। यत्तु द्वे अप्यनुमाने सत्प्रतिपक्षिते सती जाती इति गुरुमतमवेत्य स्वव्याघात-कत्वं त्वन्मते न सदुत्तरे सत्प्रतिपक्षे तिव्याप्तं तथाहि स्थाप-नाहेतुरसाधकः समबलप्रतिपक्षप्रतिहतत्वादितिवत् सत्प्र-तिपक्षत्वं अनेनैव हेतुना स्वस्याप्यसाधकत्वं साधयितुं क्षममुभयोरपि सत्प्रतिपक्षत्वाविशेषादिति खण्डनं। तन्न। अबोधात् जातौ हि साधर्म्यमात्रं बलं तच्च स्थापनाजात्योः समानमेवेति जातिवाद्याशयः। समीकरणाभिसन्धिनैव जात्युत्थानात् स्वप्रयोगस्य बलवत्त्वाभिमाने च समीकर-णाभिसन्धिना तदुत्थानमेव न स्यात् तथा च जातिवत्स्था-पनापि स्वसाध्यं साधयेत् तथा साधर्म्यान्तरमपि जाति-साध्यविपरीतं साधयेत् साधर्म्यत्वेन तस्यापि स्थापना-जात्युभयतुल्यत्वात् तस्माद्यथा जातिवादी समबलयानु-मानप्रतिहतत्वेन स्थापनाया असाधकतां मन्यते स्थापय-ति च तथा तत एवाविशेषात् स्वानुमानस्यापि तथा मन्येत साधयेच्चेति भवति जातेः स्वव्याघातकत्वं सत्प्रतिपक्षे तु नैवं न हि तत्रोच्चारयिता स्थापको वा द्वयोः समबलत्वं मन्यते किन्तु स्वानुमानस्य बलवत्त्वमपरस्य तु विशेषादर्श-नदशायां बलभ्रममात्रमिति हि तस्याभिमानात् तथा च परानुमानस्यासाधकतामयं बलवत्प्रतिबन्धत्वेन साधयति न तु स्वानुमानस्य तथा साधयितुं क्षमते तेन परानुमानस्य बलवत्त्वानङ्गीकारेण स्वानुमानस्य बलवत्प्रतिबन्धत्वान-भ्युपगमात् किन्तु बलवत्त्वाभिमतमपरानुमानं प्रतिबन्धकं मन्यते तेन च रूपेण न परस्यासाधकतां साधयति मदनु-मानं बलवत्त्वेनावगतं किन्तु बलवन्न भवतीति तेनानङ्गी-

कारात् तथा च बलवत्प्रतिबन्धत्वेन परस्यासाधकतां साधयति न तु स्वस्यापि तेन रूपेणेति न सत्प्रतिपक्षः स्वव्याघातक इति। ननु सत्प्रतिपक्षत्वेनासाधकतासाधनन्तस्यैव हेतुदोषत्वात्तच्च द्वयोः समानमेवेति चेत् । सत्यम् । एकेन ह्यपरानुमानस्यासाधकता साध्यते सा च बलवत्प्रतिबन्धत्वलक्षणेन सत्प्रतिपक्षत्वेन न तु स्वस्यापि तथा साधयितुं शक्नोति बलवत्प्रतिबन्धत्वलक्षणस्य हेतोः स्वयमेवानभ्युपगमात् । ननु तथापि स्थैर्यादिः सत्प्रतिपक्षितत्वेन द्वयोरप्यसाधकतां साधयितुं शक्नोत्येवेति भवत्येव सत्प्रतिपक्षत्वं व्याघातकमिति चेत्। सत्यम्। तथापि सत्प्रतिपक्षयिता यद्बलवत्प्रतिबन्धत्वमाद्रियते तन्नोभयसाधारणत्वेन मन्यत इति स्वाशयानुसारेण सदुत्तरयन्न तेन व्याहन्यते जातिवादी तु तथेतिविशेषः अत एव सत्प्रतिपक्षः सदुत्तरं जातिरसदुत्तरमिति सर्वतन्त्रसिद्धान्तः । एतद्विरुद्धाभिधायी तु गुरुरपि लघुरेवेति एवमपि रत्नप्रकाशतद्बाधावपि नेयावितिसंक्षेपः । निरालम्बनाद्यनुमानमपि व्याप्त्याद्युपुरस्कारप्रयुक्तं सदुत्तरमेव तदपुरस्कारप्रयुक्तं तु जातिरिति विवेकः ॥

अथ बाधो निरूप्यते। तत्र तावत्साध्याभावप्रमा बाधः प्रमिताभावप्रतियोगिसाध्यको बाधितः यद्यप्यकेवलान्वयिनः सर्वस्यैव साध्याभावप्रमा सम्भवतीति व्यतिरेकिसाध्यकाशेषसद्धेतुव्याप्तिः तथापि पक्षे सा विवक्षिता बाधे च पक्षतास्तीत्युक्तं तेन पक्षे साध्याभावप्रमा बाधः न च कपिसंयोगसाध्यक सद्धेतावतिव्याप्तिः प्रतियोगिव्यधिकरणेति साध्याभावविशेषणात् । ननु साध्याभावप्रमा गृहीतप्रामाण्या वा प्रतिबध्नीयादगृहीतप्रामाण्या वा नाद्यः तस्या बुद्ध्यन्तरमात्रविनाश्यत्वेन तावन्तं कालमनव-

स्थितेः । नापरः तस्याः संशयोपस्थितसाध्याभावधीवदधिकबलत्वानवगमेन प्रतिबन्धकत्वायोगात् । साध्याभावधियः प्रामाण्यग्रहः प्रतिबन्धक इति चेत् । न तर्हि बाधो दोषः प्रामाण्यस्य ततो भिन्नत्वात् साध्याभावधियः प्रामाण्यग्रहानन्तरं पुनर्जाता साध्याभावधीः सा च विशेषदर्शनोदीच्यत्वेन शङ्कानास्कन्दितेति सैवानुमितिप्रतिबन्धिकेति चेत् सा हि तृतीयलिङ्गपरामर्शादर्वाक् पश्चाद्वा आद्ये परामर्शेनैव तर्हि सा ध्वंसितेत्यसत्त्वान्न प्रतिबन्धुमीष्टे अन्त्ये किं तया लिङ्गपरामर्शस्य चरमकारणत्वेनानुमितिः स्यादेव सत्प्रतिपक्षवदसावपि प्रतिबध्यत इति चेत् । तर्हि तृतीयलिङ्गपरामर्शस्य व्याप्तिपक्षधर्मतासम्पन्नद्वयग्राहिणः समसमयतया भागशः प्रतिबध्यप्रतिबन्धकभावो युज्यते प्रकृते तु निष्परिपन्थिना तृतीयलिङ्गपरामर्शेनादावनुमितौ जनितायां बाधैव नोदेष्यति अनुमित्यैव प्रतिबन्धात् । उदिता बाधनानुमितिं प्रतिबध्नीयात् । तदुक्तं गृहीत्वार्थं गताश्चौराः कस्तानाच्छेत्तुमर्हतीति । अथ प्रागुत्पन्नैव बाधा ऽदूरविप्रकृष्टा तृतीयलिङ्गपरामर्शं प्रतिरोत्स्यति यथा सिषाधयिषा पक्षतां घटयतीति चेत् । निरन्वयध्वस्तापि सा मतिरेतस्य व्यामोहः । अथ बाधेन हेतुमति पक्षे व्यभिचारो निर्वाह्यत इति तद्वारैव बाधो विरोधीति तर्हि क्लृप्तत्वाद्व्यभिचार एव दोषः स्यात् हेत्वसत्त्वे त्वसिद्धिरिति नोभयथापि बाधः । तदुक्तं बाधायामपक्षधर्मो हेतुरनैकान्तिको वेति । अथ पक्षे हेतोः साध्याभाववद्वामितासन्देहो न दोषाय अनुमानमात्रोच्छेदापत्तेः किन्तु तन्निश्चयः न च साध्याभावप्रमायाः प्रामाण्यनिश्चयादेव तथा च गृहीतप्रामाण्या साध्याभावप्रमा पक्षे व्यभिचारनिश्चयमप्यापादयन्ती स्वतो दोषः प्राथम्यादा-

वश्यकत्वादुपजीव्यत्वात्स्वतो दूषकत्वाच्चेति। एवं क्लृप्तत्वाद्व्यभिचारो दोषोस्तु दूषणक्षमत्वे सति प्राथम्याद्बाधा वेति विवादसीमा। अत्र च व्यभिचारव्याप्यत्वासिद्धयोः सङ्करे यथा प्रथमोपस्थितः स्वतो दूषणक्षमस्तत्र व्यभिचारो दोषस्तथात्र बाध इति त्वद्वचनार्थः अस्तु तावदेवं तथापि व्यभिचारान्न बाधः पृथक् असङ्कीर्णाभावादिति। अत्राहुः। प्रथमे क्षणे घटे पृथ्वीत्वसम्बन्धः जातेः सम्बन्धश्चेति वैशेषिकवचनात् द्वितीये च क्षणे तत्र गन्धोदयः तस्य घटत्वात्। अत एवाहुः। क्षणमगुणो भाव इति तथा च प्रथमे क्षणे पृथिवीत्वेन घटे यद्गन्धानुमानं तत्तावन्न सम्भवति तत्र तदा गन्धासत्त्वात् नाप्यसत् व्यभिचाराद्यभावात् अथ तत्र गन्धसम्बन्ध एवानुमीयते स च समवायलक्षणस्तत्रास्त्येव गन्धयोग्यता वा सापि तत्रास्तीति मैवम्। यदि तत्राशयस्वातन्त्र्यात्कश्चिद्गन्धमनुमिनोति तदा किं वाच्यं बाधादन्यत् साध्यसंसर्गाभाववति सद्धेतुर्व्यभिचरित एव तेन गन्धप्रागभावावच्छिन्ने घटे तत्पृथिवीत्वं व्यभिचरितमेवेति चेन्मैवम्। साध्यवद्भिन्नसाध्यात्यन्ताभाववद्गामित्वस्य वा व्यभिचारपदार्थत्वात् प्रथमे क्षणे न गन्धोदयः सम्भवतीति तत्रापि गन्धात्यन्ताभाव एवेतिचेत्। धिङ्मूर्ख न हि यत्र यदवच्छेदेन यस्य प्रागभावस्तत्र तदवच्छेदेन तस्यात्यन्ताभाव इति कोप्याह नापि युज्यते प्रागभावस्य प्रतियोगिसादेश्यनियमात् अत्यन्ताभावस्य तद्वैदेश्यनियमादिति कथं तर्हि गन्धप्रागभावावच्छिन्नो घटो गन्धवानित्यत्र वाक्ये ऽयोग्यता एकपदार्थसंसर्गस्यापरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वे हि सा सा च नात्र आद्यक्षणावच्छिन्ने घटे गन्धस्य प्रागभावो न त्वत्यन्ताभाव इति। मैवम्। यत्र हि यन्न सम्भवति तत्र

तस्य बाधश्चायोग्यता च तेन गन्धप्रागभावावच्छिन्ने घटे न सम्भवतीति तत्र तदुभयमविकलम् अयन्तु विशेषोयः प्रागभावस्तल्लक्षणमात्रम् अत्यन्ताभावस्थले यावत्सत्त्वम् अत्र द्वितीयस्य स्फुटावभासत्वात्तत्रैव तदुभयमुदाहृतं प्राचीनैर्न तु प्रागभावस्थले दुर्बोधत्वादिति योग्यताल-क्षणे यदत्यन्ताभावग्रहणं तत्सम्पातायातमन्यमतावल-म्बेन वेति। न च जात्या व्यक्त्याक्षेपे प्रलये व्यभिचार इति यन्नैयायिकैरुक्तं तदेवं सति विरुध्येत न हि व्यक्ति-ध्वंसत्वद्गामितया जातेर्व्यक्तिव्यभिचारिता सम्भवतीति। मैवम्। तत्रत्यव्यभिचारिपदेनाव्यभिचारविरोधिनः का-त्स्न्र्येन सम्बन्धाभावस्य विवक्षितत्वात्। अन्यथा तादृशं पृथिवीत्वं मध्येपि गन्धं न गमयेदित्यस्योक्तप्रायत्वादिति साध्याभावधियो गृहीतप्रामाण्यायाः साध्यधीप्रतिब-न्धकतया तदभावस्तृतीयलिङ्गपरामर्शेनापेक्ष्यते तस्या अभ्युत्थानात्तु सह नास्तीति ॥

इति श्रीवाचस्पतिमिश्रकृते खण्डनोद्धारे प्रमाणतदाभा-सोद्धारो नाम प्रथमः परिच्छेदः ॥



हेत्वाभासखण्डनानन्तरं निग्रहस्थानत्वेन स्मृतान् प्रतिज्ञाहान्यादीन् खण्डयति स्वीकृतोक्तपरित्यागः प्रतिज्ञाहानिरित्यलक्षणं झटिति संवरणेतिव्याप्तेः। न हि झटिति संवृतं पतितमपि निग्रहस्थानं निगृह्णाति किञ्च स्वीकृतेति व्यर्थं स्वीकृत्यास्वीकारो हि त्याग इति स्वीकारस्य त्यागपदार्थान्तर्गतत्वेन तत एव प्राप्त्या पौनरुक्त्यात्। निग्रहस्थानसामान्यलक्षणानुवृत्त्या झटिति संवरणातिव्याप्तिनिरासात् न हि झटिति संवृतं कथाकारणीभूतसम्यग्ज्ञानविरहनिग्रहस्य स्थानमुन्नायकं भवति नापि स्वीकृतपदं पुनरुक्तं परिहारमात्रस्यैव त्यागपदार्थत्वात् परोक्तं दूषणं परिहरतीत्यादेर्दर्शनात् नापि रूपान्तरेण स्वीकृत्य रूपान्तरेण त्यागेतिव्याप्तिस्त्यागस्य प्रकाराकाङ्क्षायां स्वीकारप्रकारस्यैवोपस्थितत्वेनान्वयात् उपस्थितपरित्यागे गौरवात् आग्नेयीन्यायात्। न चापसिद्धान्तेतिव्याप्तिः तत्रापि नैयायिकोऽहमित्यादिना सङ्क्षिप्ताक्षरेण सर्वस्यैव न्यायसिद्धान्तस्योक्तौ पश्चात्तदेकदेशत्यागे उक्तलक्षणसत्त्वादिति वाच्यं स्वीकृतस्य विशिष्योक्तस्य संवरणावसरात्यये परित्यागः प्रतिज्ञाहानिरिति लक्षणात्। हन्तैवं संवरणावसरात्यये स्वीकृतपरित्याग इत्येवास्तु तावन्मात्रस्यैव निग्राहकत्वात् शेषं व्यर्थमिति चेत्। मैवं वोचः। विचित्राभिसन्धाना हि प्राञ्चः तथाहि विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानमिति सङ्क्षेपे पारमर्षं सूत्रं विस्तरे तु प्रतिज्ञाहानिरित्यादि एवमसाधनाङ्गवचनमदोषोद्भावनमिति प्रसज्यपर्युदासाभ्यां सङ्क्षेपे चतुर्धेति बौद्धाः विस्तरे तु चतुर्दशेति त एवाहुः। तथा चामीषां यावन्ति रूपाणि निग्रहे सम्भवन्ति तेषां मध्ये केनचित्कानिचित्परिगृहीतानि केनचित्कानिचिदभिप्रायस्वातन्त्र्यात् सम्भवन्ति तु सर्वाण्येव

रूपाणीति । अयन्तु विशेषो यत्स्वाश्रितशास्त्रानुक्तं रूपं निग्रहत्वममपि पुरस्कृत्य निगृह्णन्नपसिद्धान्तमासादयतीति । हन्तैवं चौरापराधेन माण्डव्यनिग्रहः कुरुभैनाहिसंतृप्रतोर्मुनेर्मताश्रयणे न सद्धर्मेनानिगृह्णतो वादिनोपसिद्धान्तः स्यादिति किमत्र क्रियतां दुर्लभा हि शास्त्रपरिपाटी तथाहि खाण्डनिक त्वमेव वेदान्तमाश्रयमाणो वेदानामपि प्रामाण्यमपजानानो व्याघातादप्यबिभ्यत् प्रमाणपथावतीर्णं सर्वं जहत् तदनवतीर्णं ब्रह्माद्वैतं दधत्स्वाश्रितशास्त्रश्रद्धालुतया परं जीवसीति । नन्वेकस्य परित्यागपरिग्रहौ विरुद्धाविति विरोध एवात्र दोषोऽस्त्विति चेत् । मैवम् । त्यागस्यानुद्भावने तद्घटितस्य विरोधस्योद्भावनाशक्यतया आवश्यकोद्भावनस्य त्यागस्यैवात्र दोषत्वात् सेयं प्रतिज्ञाहानिः पक्षहानिसाध्यहानिलिङ्गहानिदृष्टान्तहानितद्विशेषणहानिक्रमहानिभेदादनेकधा प्रतिज्ञापदं त्वत्र निर्वाह्यभागपरं तेन सर्वसङ्ग्रह इति स्थापकेनोक्तस्य दूषकेण दूषितस्य साध्यभागस्य पूर्वानुक्तविशेषणवतोऽभिधानं प्रतिज्ञान्तरं न च पूर्वपदार्थानिरुक्तिः यस्मिन् काले उक्तविशेष्यस्य समभिव्याहारः सम्भवति तत्कालस्य पूर्वपदार्थत्वात् तेन विशेष्यसमभिव्याहारौपयिककालेऽनुक्तस्य साध्यविशेषणस्य दूषणाभिधानानन्तरं यदभिधानं तत्प्रतिज्ञान्तरम् । नन्वीदृशः कालो विशेष्याभिधानादव्यवहितः पूर्वश्चोत्तरश्च भवति तथा चैतयोरेकस्मिन्नुक्तमपरस्मिन्ननुक्तत्वात्पूर्वमुक्तं भवत्येवेति चेन्न । सामान्याभावस्याश्रयणात् । न च प्रागुक्तस्य प्रकरणलभ्यस्य विशेषणस्यानुक्तभ्रान्त्या दूषितस्याभिधानेऽतिव्याप्तिरिति वाच्यम् अनुक्तपदेनाप्रतिपादितस्योक्तत्वात् तस्य तु प्रकरणेनैव प्रतिपा-

(१) आदर्शपुस्तकेष्वेवमेव पाठो दृश्यते ।

दितत्वात्। ननु तथापि परस्मिन्ननुत्पन्नप्रतिपत्तौ प्रतिपादितत्वस्याभावात्तत्रातिव्याप्तिरेवेति चेन्न। श्रोतृप्रतिपत्त्यनुकूलकारणाकात्स्न्र्यस्य प्रतिपादितपदार्थत्वात् तस्य चानुत्पन्नप्रतिपत्तिके सत्त्वात् न च प्रतिज्ञाहान्या हेतुहानेरिव प्रतिज्ञान्तरेण हेत्वन्तरस्यापि सङ्ग्रहोऽस्त्विति मणिकण्ठमतमादेयं स्वतन्त्राभिप्रायस्य नियोगपर्यनुयोगानर्हत्वादित्युक्तत्वात्। प्रतिज्ञाविरोध उक्तव्याघातः स च यस्य येन रूपेण यदनन्वयो येनाभ्युपगमस्तस्य तेनैव रूपेण तेन पुंसान्वयाभ्युपगमः स च पदादिभिरुन्नीयत इति पदादिव्याघात उच्यते। ननु यावज्जीवमहं मौनी अवाचकः शब्द इदं न जानामि ज्ञानमविषयमित्यादिषु विरोधप्रपञ्चेषु नाभ्युपगमान्तरं पश्यामो येन विरोधः स्यादिति। मैवम्। मौनं हि वचनोच्चारणसमर्थस्य तदनुच्चारणं तत्राहं मौनीति शब्दोच्चारयितृत्वं आत्मनोऽभ्युपगच्छति कथमन्यथा वाचा प्रतिपादयति एवं चाहं मौनीति व्यक्तमभ्युपगमान्तरं न चेत्प्रतिपादयति न तर्हि प्रतिपादकः एवमवाचकः शब्द इत्यादावपि शब्दस्य वाचकत्वमभ्युपैति कथमन्यथा तेन प्रतिपादयति तथा चावाचकः शब्द इति ब्रुवतो व्यक्तमभ्युपगमान्तरं एवमिदमिति प्रत्यक्षविषयमिदमा निर्दिशति न जानामीति तज्ज्ञानमपह्नुते एवं ज्ञानमविषयमित्यादिवदत एतद्वाक्यजमपि ज्ञानं ज्ञानाविषयत्वं न विषयीकरिष्यतीति गलेपादिकयापि ज्ञानस्य विषयत्वमङ्गीकारयितव्य एवञ्च ज्ञानस्याविषयत्वाभ्युपगमो विरुद्धः। यत्तु घटो नास्तीत्यादौ घटोऽस्तीत्यस्य घटसत्त्वविधायकतया नञश्च घटासत्त्वविधायकतयात्रापि प्रतिज्ञाविरोधः स्यादिति खण्डनम्। तदव्युत्पत्तिविजृम्भितम्। घटेन नञो नञा चास्त्यन्वयस्य सार्वलौकि-

कत्वात्। ननु घटनञोः कथमन्वयः उभयोरतादात्म्यात् नापि घटस्य नञर्थे प्रतियोगितयान्वयः घट इति प्रथमान्तात्सम्बन्धितया तस्योपस्थित्यसम्भवात् तत्सम्भवे वा घटस्य नेत्यनेन घटसम्बन्धिकः कश्चिन्निषेद्धव्यो न घट एवेति। मैवम्। घटो नेति शब्दाद्घटनिषेधस्तावत्प्रतीयत इति सार्वलौकिकं ईदृशञ्च प्रत्ययमपह्नुवानो माध्यमिकवदुपेक्षणीयः स्यात्। ननु प्रतीम एवं किं ततः। शब्दादीदृशः प्रत्ययः कथं स्यादिति पृच्छाम इति चेदनुभवं पृच्छ। अनुभवः कूटसाक्षीति चेत्। आत्मानमुपालभस्व येन तादृशमेव कूटमनुभवं पुष्यसि। अपसिद्धान्ते शास्त्राकाराभ्युपगमेनात्र तु स्वाभ्युपगमेन सह स्वाभ्युपगमान्तरस्य विरोध इत्यपसिद्धान्तादस्य भेदः। नित्यः शब्दः कृतकत्वादित्यादौ प्रतिज्ञाविरोधवत् विरुद्धहेत्वाभासत्वेपि प्रतिज्ञाविरोध एव निग्रहाय साध्याभावहेत्वोर्व्याप्त्युपजीवनेन प्रवर्तिष्णुं हेत्वाभासमपेक्ष्याभ्युपगमविरोधमात्रोपजीवनमात्रप्रवृत्ततयास्य प्रागेव सम्भृतसामग्रीकत्वादिति सह प्रतीतावप्रतीतौ च न विरोध इति खण्डने तवापि विरोधमन्तःसमानमिदमिति नैयायिकवचसि प्रतिवन्दिखण्डनं तद्यथा प्रतिवन्दी तावद्दूषणप्रतिवन्दी वा समाधिप्रतिवन्दी वा नाद्यः अप्रस्तुतत्वात् स्वपक्षे दोषे परेण दर्शिते तत्पक्षदोषोदीरणं न क्वापि घटते किञ्च परदत्तस्य दोषस्यानुद्धरणात् एकनिग्रहान्तत्वात्तस्याः। नापरः यः प्रतिवन्द्या द्योत्यते स एव तर्हि समाधिरभिधीयतां किमनया कुसृष्ट्या किञ्चावयोर्भिन्नमताश्रितयोः समानः समाधिरिति न नियमः एकस्मिन्मते यः समाधिस्तस्य परमते विमतेरपि सम्भवात् किञ्च परोद्भावितं दोषज्ञानादपोद्यत इति। अविनिगमस्तु

युगपदुपस्थितयोः प्रमाणाभावादन्यतराभावः अत्र च प्रमाणाभाव एव दोषो न त्वविनिगमः लाघवगौरवे तु प्रमाणस्य लघुगुरुविषयत्वसम्भवे लघुपरिच्छेदकत्वं गुर्वपरिच्छेदकत्वञ्च स्वभावभेदौ प्रमाणसहकारितामात्रेण तु तर्कव्यपदेशः प्रतिबन्दिस्त्वापाततोऽर्थान्तरं तथाहि यदि क्षितौ कर्ता स्यात् शशे शृङ्गमपि स्यात् शशशृङ्गवदसावपि प्रमाणबाधित इति चेत्। तर्हि स एव दोषो न तु प्रतिबन्दिरिति। तदुक्तं प्रतिबन्दिरदूषणं तथा च यदुन्नेयं तदेवेह दूषणं क्लृप्तत्वादिति सम्प्रदायः। अनौचित्यन्त्वौचित्यस्य प्रामाणिकत्वविरहः स च प्रमाणाभावान्तर्गत एव न चार्थान्तरमर्थान्तरेण परिहरतः को दोषो वाच्यो यद्यनौचित्यं न दोषः स्यात् तच्च प्रमाणाभावावधारणानन्तर्भावेण पृथगिति वाच्यं प्रथमार्थान्तरेणैव कथापर्यवसाने द्वितीयार्थान्तराभिधानस्यानवसरपराहतत्वादिति। यत्तु दोषसामान्योद्भावनं सा मतानुज्ञा। अत एव प्रतिषेधेपि समानो दोषः तथा प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद्दोष इति सूत्रद्वयस्य तथैवार्थ आकरे स्फुटीकृतः तथा प्रतिबन्दी पृथग्दोष इति न्यायमार्ग इति विद्धि। प्रतिबन्द्या दूषणत्वानभ्युपगमेऽपसिद्धान्तः सा हि सर्वतन्त्रसिद्धदूषणभावेत्युपक्रमापसिद्धान्तोपि दुर्वचः तथाहि सिद्धान्तविपरीताभ्युपगमोऽपसिद्धान्त इत्यलक्षणं मत्सिद्धान्तविपरीताभ्युपगन्तुस्तवापसिद्धान्तापत्तेः। अभ्युपतमानभ्युपगमयोः कर्त्रभेदोभिमत इति चेत। अङ्कुरस्य जन्यत्वं व्योम्नश्चाजन्यत्वमभ्युपगच्छतोऽपसिद्धान्तापत्तेः। विषयाभेदोप्यभिमत इति चेन्न। एकस्याङ्कथायामचेतनस्यापि कर्तृत्वमपरस्यान्तु चेतनस्यैवमभ्युपगच्छतोऽपसिद्धान्तापत्तेः। कथाया अभेदोप्यभिमत इति


चेत्तर्हि यस्यां कथायां येन वादिना यद्दर्शनमाश्रितं तस्यामेव कथायां तेनैव वादिना तद्विपरीताभ्युपगमोपसिद्धान्तः । यद्वा येन वादिना यस्यां कथायां योर्थः सामान्याकारेण यथाभ्युपगतः तेनैव वादिना तस्यामेव कथायां तद्वस्तुनस्तद्विपरीताभ्युपगमोपसिद्धान्तः तथा चानुगतलक्षणाश्रयणेऽतिव्याप्तिः अननुगततदाश्रयणे त्वव्याप्तिरिति खण्डनम् । तदयुक्तम् । उभयथाप्यदोषात् तथाहि निग्रहस्थानत्वे सति सिद्धान्तविपरीताभ्युपगमस्यापसिद्धान्तत्वात् तेन चोक्तसकलदोषपरिहारात् लक्ष्यानुगमे लक्षणाननुगमस्यादोषत्वाच्च न ह्यपसिद्धान्तत्वं घटत्वादिवत्साधारणं किन्तु कथायामाश्रिततत्तच्छास्त्रकाराभ्युपगमविरुद्धाभ्युपगमः स च कथारम्भे बौद्धोहमित्युक्त्वा परेण क्षणभङ्गादौ दोषदेशनायां मास्तु क्षणभङ्ग इत्यादिरभ्युपगमः । ननु न शास्त्राश्रय एव विवादः पर्वतस्य वह्निमत्त्वादावपि तत्सम्भवात् तदाह ।

रिक्तस्य जन्तोर्जातस्य गुणदोषमपश्यतः ।
विलब्धा बत केनामी सिद्धान्तविषयग्रहाः ॥

न हि शास्त्राश्रया वादा भवन्तीति तस्मान्नापसिद्धान्तो निग्रहस्थानमिति । मैवम् । बौद्धस्य क्षणभङ्गादिकं स्वशास्त्रोक्तं त्यजतोपसिद्धान्तोक्तयोपजीव्यविरोध एवोच्यते मीमांसकस्य श्रुतिविरोधवत् तथा चोपजीव्यविरोधोद्भावने न तदैव कथाविच्छित्तिः । न चायमुपजीव्यविरोधः शास्त्रविरोधप्रतिज्ञाविरोधव्याघातेषु मन्मतेषु त्रिष्वपि साधारण इति एवं वह्न्यनुमानेपि स्वाभ्युपेतप्रमाणविरुद्धाङ्गीकारेपसिद्धान्तापरनामोपजीव्यविरोध एवेति तस्मादेवमादीन्यसम्यञ्चि खण्डनानि प्रपञ्चयन् भवान्न

केवलमन्वीक्षायामनधीतीत्यवधार्यते किं तर्हि तन्त्रमात्र एवेति एवं निग्रहस्थानान्तरखण्डनान्यपि निराकरणीयानि ॥

इति श्रीवाचस्पतिमिश्रकृते खण्डनोद्धारे निग्रह-
स्थानखण्डनोद्धारो नाम द्वितीयः परिच्छेदः ॥



सर्वनाम्नः खण्डयिष्यता ईश्वरसद्भावे किं प्रमाणमिति तावत्तदवतारितम् अत्र च विकल्पकल्पना न युक्ता प्रकरणेन प्रश्नार्थताया एवावधारणात् किञ्चेदृशः प्रश्न एव न सम्भवतीतीश्वरमन्तुस्तदभिज्ञतया प्रश्नायोगात् तदमन्तुश्चेश्वरासत्त्वाभ्युपगमेन तद्विषयकप्रमाणप्रश्नानुपपत्तेः तस्मात्तत्त्वभुवनादेरुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वे किं प्रमाणमिति प्रष्टुर्महतीति अयमेव प्रश्नस्तत्परः तथा च प्रमाणपदं यद्विशेषपरमुत्तरेपि तथैव तद्विशेषपरमस्तु तथा च प्रमाणमित्येवोत्तरं घटतामेवं सर्वत्र प्रश्ने खण्डनमूहनीयमिति चेत् । धिङ्मूर्ख उक्तरीत्यापि किं पचतीत्यादेः प्रश्नस्याखण्डनात् न हि किं प्रमाणमितिवत् किं पचतीत्यत्रापि किञ्चिदुत्तरं त्वद्दिशा घटते विना कलायमित्यादेः किमः प्रश्नमात्रपरत्वेन प्रष्टृव्यानभिधायकत्वात् । भावनानवरुद्धप्रश्न एवायं मया खण्ड्यत इति चेत् । अनेन खण्डनकृता सुरा पीता न वेत्यत्र भावनानवरुद्धेपि प्रश्ने त्वदुक्तखण्डनाप्रवृत्तेः तिङ्त्वानुपसन्दाने यः सुबन्तानुप्रश्नस्तमेव खण्डयामीति चेन्न । दक्षदौहित्रमतानुसारेणासम्भवात् । यत्रान्यत्क्रियापदं नास्ति तत्रास्तिर्भवतीत्यपरः प्रयोक्तव्य इति तद्वचनात् न्यायतन्त्रानुसारेणैव सुबन्तानुप्रश्नखण्डने प्रवृत्ते अत्र च तन्त्रे वाक्ये न तिङन्तप्रयोगनियमः काञ्च्यामिदानीं त्रिभुवनतिलको राजेत्यादिवाक्यस्य न्यायप्रथमाध्याये दर्शनात् एवञ्च किं प्रमाणं केन प्रमाणेन कस्मै प्रमाणाय कस्मात्प्रमाणात् कस्य प्रमाणस्य कस्मिन्प्रमाणे इत्येवंरूपषड्विधविभक्त्यवरुद्धसुबन्तप्रश्नार्थ एव मया खण्ड्यते इति चेत् साधु वेदान्ताध्वा समन्वितः तथाहि किं स्विद्धिमस्य भेषजमिति प्रश्नोत्तप्रश्ने अग्निर्हिमस्य भेषजमिति श्रौतमुत्तरन्त्वन्मतेनालग्नकं

स्यात् भेषजमेवोत्तरन्त्वद्दिशा घटेत श्रुतयो विशृङ्खला एवेति चेत्। त्यज तर्हि श्रुतितात्पर्यमात्रसाक्षिके ब्रह्मणि विश्वासम् अधीष्व मध्यमागमं सेवस्व सत्त्वशून्यतावादमिति। नन्वस्त्वेतद्यथा तथा उत्तरवत्प्रश्नखण्डने य उद्धारस्तं प्रब्रूहीति चेत्। ब्रूमः। किं प्रमाणमिति प्रष्टा वैजात्येन प्रमाणमित्युत्तरे कृतेपि तावन्न निवृणोति यावत्प्रत्यक्षमनुमानं वेति न शृणोति तत्कस्य हेतोः प्रमाणमित्युत्तरमाकर्ण्यापि स्वजिज्ञासितममुं प्रमाणविशेषरूपं न प्रापेति गम्यते प्रश्नस्थेन प्रमाणपदेन प्रमाणत्वेन रूपेण यथा प्रमाणविशेष उपस्थाप्यते अन्यथा किमालम्बनः प्रश्नः स्यात् तथा उत्तरस्थेन तु तेन पदेन प्रमाणत्वेन रूपेण प्रमाण उपस्थाप्यते। अत्रैव सङ्ग्रहश्लोकौ।

यथाविधं यं विषयं निजस्य प्रश्नस्य निर्वक्ति परो यथोक्त्या।
वाच्यस्तथैवोत्तरवादिनापि तयैव वाचा स तथाविधोर्थः॥
प्रश्नस्य यः स्याद्विषयः स वाच्यो वाचानया चैष भवेन्निरुक्तः। इदं त्वयाप्यास्थितमेतयैव वाचा स्वपृच्छाविषयस्य वक्ता॥ इति।

अत्र ब्रूमः। सामान्येन प्रकारेण विशेषमतिरस्कुर्वन् विवेकी तावद्विवेकिनं पृच्छति विवेकी तु स्वविवेचितविशेषं प्रष्टुं प्रतिबिम्बयिष्यन्ननपेक्षितविशेषं तिरस्कुर्वन्नपेक्षितं पुरस्कुर्वन् शृङ्गग्राहितया तं विशेषमाह प्रत्यक्षमित्यनुमानमित्यादि। एवञ्च प्रश्नविषये समदृशः सामान्यप्रकारकोऽतिरस्कृतकिञ्चिद्विशेषः किं प्रमाणमित्यादिः प्रश्नो युज्यते उत्तरयितुस्तद्विशेषेषु विषमदृशो विवेकिनोभिमतविशेषमात्रप्रत्यापिपयिषोः शृङ्गग्राहिकानिर्देशमन्तरेण न निस्तारः प्रष्टुर्जिज्ञासापनोदिका हि विशेषप्रकारिका धीः सा नान्यथा सम्भवतीति। एवञ्च गाथाद्वयं विशेषादर्शन-

योनीति विघ्नः। अथ तनुभुवनादेरुपादानाभिज्ञजन्यत्वे किं प्रमाणमिति प्रमाणविशेषप्रश्नस्तज्जिज्ञासाविष्करण-रूपः तज्जिज्ञासा च तत्सामान्यज्ञानपूर्विका तच्च ज्ञानं यदि प्रमारूपं मन्यसे तदेश्वरप्रमा तद्विषयभूतश्चेश्वरस्त्वया प्रमित एव किं पृच्छसि अथाप्रमाभूतं ब्रूषे तदा किं पृच्छसि न ह्यप्रमालिङ्गितस्य स्वरूपं पृच्छयते तस्य निः-स्वरूपत्वात् अथ प्रमाप्रमौदास्येन तज्ज्ञात्वा तत्स्वरूपं पृच्छसि भवत्वेवं तदपि प्रत्येकं कोट्योर्दूषितत्वात् किम-धिकमस्ति अथ संशयानः पृच्छसि तदा शिष्योसि न तु वादी अथाचिक्षिप्सुः पृच्छसि तदा पूर्वोक्तं निश्चयपक्षं नातिवर्तसे इति। अत्रोच्यते। तनुभुवनादेः कर्तृजन्यत्व-विषयत्वे च प्रमात्वं तावन्मन्यस इति न्यायमतमनूद्य स्वयं तत्प्रामाण्याप्रामाण्यौदास्यमालम्ब्य तत्र किं कार-णमित्याचिक्षिप्सोः प्रश्नस्तत्तद्दोषग्रासात् किमपि करणं न भविष्यतीति प्रादुर्भावः एवं सर्वत्र प्रश्ने नेयम् ॥

इति श्रीवाचस्पतिमिश्रकृते खण्डनोद्धारे सर्वनामखण्डनोद्धारो नाम तृतीयः परिच्छेदः ॥



तदयं संक्षेपः। किमस्तावज्जिज्ञासाविष्करणमर्थः किंस्विदेकाकी चरतीत्यादौ क्वचित्स एवाक्षेपगर्भः क्षित्यादेः कर्तृजन्यत्वे किं प्रमाणमित्यादौ क्वचिदाक्षेपो यथा मयि विरोधिनि सति कस्ते शरणमित्यादौ क्वचिन्निन्दा यथा किं तेनाङ्घ्रियुगेन येन नगरी न प्रापि वाराणसीत्यादौ क्वचित् विकल्पः यथा हतात्मा किमयं दिवाकर इत्यादौ। यदादीनान्तु सप्तानां धर्मिण्येव शक्तिः प्रस्तुतत्वादिकन्तु पङ्कजसमुदाये पद्मत्वादिवत्प्रयोगोपाधिः धेनुपदे गोत्ववच्छक्त्युपाधिर्वेति तथाहि प्रस्तुतत्वं तटस्थीकृत्य यच्छब्दो धर्मिणि वर्तते एवं तच्छब्दोपीति। एवमिदमेतदादौ प्रत्यक्षज्ञानविषयत्वम् अदःशब्दे तु परोक्षज्ञानविषयत्वम् अत एवोभौ लौकौ सम्वरसि इमश्चामुष्य देवलकेति शाब्दिकाः। एवं युष्मच्छब्दः सम्बोध्यात्मनि अस्मच्छब्दः स्वतन्त्रवक्त्रात्मनि स्वातन्त्र्यग्रहणात् वाच्यस्त्वया मद्वचनात्स राजेत्यादौ कविरेव नास्मच्छब्दवाच्योनुवादकत्वेन स्वातन्त्र्याभावादिति। ननु विरमतु प्रश्नखण्डनं सिध्यतु चात्र भवान् उपनिषत्तात्पर्यमर्यादानिविष्टो भवान् तथापि तं भावभूतं मन्यसे तत्र किमिदं भावत्वं नाम। न तावद्द्रव्यादिषडन्यतमत्वम् अनुगताननतिप्रसक्तैकरूपाभावे आदिपदाप्रवृत्तेः तद्भावे च तस्यैव भावस्य वचनौचित्यात् किञ्च यत्किञ्चिद्भावत्वं ब्रूषे तद्भावत्वेस्ति न वा आद्ये स्वात्मनि वृत्तिविरोधः अन्त्ये भावत्वस्य धर्मभूतस्यान्यनिषेधमुखेनाप्रतीयमानस्यापि भावत्वराहित्ये घटादेर्भावत्वे का प्रत्याशा। भगवतो भावत्वं माभूदिति चेत्तर्ह्यभावत्वं प्राप्तम्। अस्त्वेवमिति चेत्। किमिदमभावत्वं नाम भावनिषेधत्वं कश्चिद्धि निषेधो भावस्य यथा घटो नेति आद्योऽभावः भावप्र-

तिक्षेपणात् द्वितीयस्तु भावः अभावप्रतिक्षेपणात्। तदुक्तं अभावस्य तु योऽभावो भाव एवावशिष्यत इति चेत्। निषेध इति कोर्थः अभावो वा विरोधी वा। अत्राद्ये एवं हि भावस्य निषेध इत्यस्य भावस्याभाव इति स्यात् तत्रा- प्यभावो भावनिषेध इति स्यात् अत्रापि निषेधपदस्या- भाव इति विवृतौ पुनर्भावप्रवेशे अभावनिरुक्तौ भावा- नन्त्यमापतेदिति नायं पन्थाः। अन्त्ये गोत्वमप्येवमश्वत्व- स्याभाव इति स्यात् तत्राप्येकेनापरस्य विरोधात्। अन- योर्भावयोर्व्विरोधेपि भावत्वेनोपस्थितस्य भावस्य विरो- धिता नास्ति अभाव इत्यस्य तु सास्ति स्वभाव इति भावनिषेधनादिति चेत्। तर्हि भावविरोधी भावत्वेनोप- स्थितस्य निषेध इति निर्गलितम् अत्राद्यकल्पोर्थग्रास इति। अत्राहुः। त्रिविधा हि पदार्थास्तत्र द्रव्यगुणकर्म्मणां सत्ता च तद्धीश्च सामान्यविशेषसमवायानां तद्धीरेव अभावाना- न्तु चतुर्णामभावत्वेन सत्तासम्बन्धभानविरोधिना प्रकारे- णोपस्थितानां तद्धीरपि नास्ति विशेषदर्शने अप्रमानुदयात्। एवञ्च सत्तासम्बन्धभानविरोधिप्रकारवत्ता अभावानां तच्छून्यता तु भावानामिति। यद्वा सत्तावत्त्वप्रतीतिविष- यत्वं भावत्वम् एवं भावाश्चाभावाश्चोभयेपि लक्षिताः। य- द्वानुपलब्धिकरणकप्रतीतिविषयत्वमभावत्वम् अतीन्द्रिय- स्याप्यभावस्य ज्ञातानुपलब्धिकरणकप्रतीतिविषयत्वात्। एवमनुपलब्धिकरणकप्रत्यक्षाविषयत्वं भावत्वं घटाभावा- भावत्वेनापि घटस्य या धीः सापि घटत्वेनैव घटाभावा- भावत्ववाक्येनापि घटत्वस्यैवोक्तेः वायुर्नीरूप इत्यत्र ज्ञातानुपलब्धिकरणिकायामनुमितौ यद्यपि वायुरपि चकास्ति तथाप्यनुमितिः सर्व्वैव पक्षेनुवादः साध्यमात्रे तु विधिरिति न वायोरप्यनुपलब्धत्वेनाभावत्वापत्तिः

भावत्वमुपदेशसहकृतेन्द्रियवेद्यत्वं रत्नेतरत्ववत् अभावत्वन्तु स्वरूपत एव योग्यं घटाभाव इत्यादिरूपेण चक्षुःपातेन प्रतीतेः ॥

ननु सर्वमिदं लक्षणजातं विशिष्टमिष्टं भवतः तत्र किं विशिष्टं नाम । न तावद्विशेषणविशेष्यतत्सम्बन्धेभ्यो भिन्नं तवापसिद्धान्तप्रसङ्गात् नापि तत्रितयात्मकं प्रत्येकं विशिष्टव्यवहारापत्तेः नापि समुदितं तत्त्रयं विशिष्टं तर्हि तेषु त्रिषु चतुर्थः समुदायः परं प्रवेशितो न तु विशिष्टोऽतिरेचितः तथा च प्रत्येकं प्रसङ्गस्तदवस्थ एव त्वया विशिष्टस्यानन्यत्वाभ्युपगमात् । चतुर्णामपि समुदायोपेक्षित इति चेत्तर्ह्यतिप्रसङ्गः पूर्ववदेव अनवस्था चाधिकेति । अत्राहुः । अनेन विशिष्टखण्डनेन स्वकर्तुर्ज्ञानाविशिष्टत्वमुदटङ्कीति स्तनन्धयैरपि निरटङ्कि । ननु विशिष्टं विशेषणविशेष्यसम्बन्ध इति सत्यं तच्च न विशिष्टव्यवहारहेतुकं व्यवहारस्य व्यवहर्तव्याजन्यत्वात् किन्तु तज्ज्ञानं तथा तदपि त्रितयग्राहितया समूहालम्बनाविशिष्टमिति समूहालम्बनादपि विशिष्टव्यवहार आपद्येतेति महेशानार्थ इति । चेत् । नूनं भ्रान्तोसि न त्रितयग्राहितामात्रेण समूहालम्बनमपि विशिष्टव्यवहारकमन्वये विशिष्टज्ञानं हि तथा तत्किं समूहालम्बनं विशिष्टस्य ज्ञानं न भवति भवति न तु विशिष्टं ज्ञानं तत्कस्य हेतोः सामग्रीभेदादिति ब्रूमः । समूहालम्बने हि दण्डपुरुषतत्तत्सम्बन्धैः सममिन्द्रियसन्निकर्षस्तथा दण्डत्वपुरुषत्वतत्सम्बन्धानां ज्ञानसंसर्गाग्रहश्चेति सामग्री विशिष्टज्ञाने तु दण्डात्मकविशेषणज्ञानं पुरुषदण्डसन्निकर्षाभ्यां सहेन्द्रियसन्निकर्षः सामग्री तथा चार्थभेदेन सामग्रीवैलक्षण्यात् विशिष्टज्ञानं विलक्षणमुदेति तदेव विशिष्टव्यव-

हारकरणं यथा भूतले घटाभावो घटाभाववद्भूतलमिति ईदृशश्च विशिष्टतद्धीव्यवहारव्यवस्थितौ यद्विशिष्टखण्डनं सोऽयमबोधस्य विवर्तः परिणामो वेति ॥

इयता प्रबन्धेन कथाङ्गत्वाभिमतानि निग्रहस्थानानि नैयायिकानुमतानि तथा सर्वव्यवहाराङ्गीभूतानि सर्वानुमतानि सर्वनामानि तथा सर्वाणि विशिष्टानि च स्वाभिमानेन दूषयित्वा सम्प्रति वैशेषिकमतं खण्डयितुमवतारयति गुणवद्द्रव्यमिति गुणवत्त्वं द्रव्यलक्षणमुक्तम्। तच्चायुक्तम्। गुणादीनां षण्णामपि संख्यारूपगुणप्रतीत्या बाधकाभावाच्च प्रमाभूतया गुणवत्त्वसिद्धावतिव्यापकत्वादिति। तदसत्। सामान्यादीनां सत्प्रत्ययवद्गुणानां रूपादीनां संख्यादिप्रत्ययस्यौपचारिकत्वात्। उभावपि प्रत्ययौ प्रमे एव बाधकाभावादिति चेत्। गुणस्यापि गुणवत्त्वे सामान्यस्य सामान्यवत्त्वे अनवस्थाया एव बाधकत्वात् उत्तरधारायाश्चाप्रामाणिकत्वेनानवस्थाया दोषत्वात्। रूपादीनां गुणवत्त्वे प्रमाणं नास्तीति चेत्तर्हि संख्यादावप्येवमस्तु। अस्तु का नो हानिरिति चेद्गुणवत्त्वे द्रव्यलक्षणे गुणादावतिव्याप्तिहानिरेव त्वद्धानिस्त्वद्दिशा तदुक्तम्। मम तु द्रव्यगुणादि किञ्चिदपि नानुमतमिति चेत्। तर्हि तन्मतेऽवस्थादिग्राहि[१] दौ गुणवत्त्वं नास्तीति गृहाण। एवञ्च सत्तासंख्ययोः प्रत्यये समेऽपि सत्ता सिध्यत्यबाधात्संख्या तु नास्ति बाधादिति। वस्तुतस्तु नवापि द्रव्याणि स्वसमवेतं कार्यमारभन्ते न त्वन्यानि तथा चामीषां समवायिकारणतावच्छेदकमेकमनुगतमनतिप्रसक्तमेष्टव्यं तदेव च द्रव्यत्वमतस्तदेव नवानां लक्षणं जातित्वादख-

(१) अत्रादर्शपुस्तकद्वयेऽपि कश्चिदंशो निपतितः।

ण्डत्वेन लाघवात् न तु गुणवत्त्वमुपाधित्वेन सखण्डतया गौरवात् किन्तु गुणवत्त्वं तस्य व्यञ्जकमात्रं गोत्वस्य सास्नावत्त्ववत् । ननु गुणवत्त्वं भवतु द्रव्यत्वव्यञ्जकं तथापि गुणत्वासिद्धौ तदप्यसिद्धमिति तदवश्यं वाच्यमिति चेत् । गुणत्वं जातिरेव । गुणत्वमसिद्धं गोत्वादिवदप्रतीतेरिति चेदत्राहुः । गुणकर्मणां तावद्द्रव्याश्रये तत्र कर्मापि गुण एव वैलक्षण्याभावादिति भूषणः । तदयुक्तम् । कर्मणां हि परस्परविरुद्धसंयोगविभागलक्षणकार्यद्वयकारित्वं न गुणानान्तथेति पञ्चानामपि कर्मणामेकं कर्मत्वं तदभिव्यङ्ग्यं गुणानां चतुर्विंशतेरप्यविरुद्धकार्यकारितया चतुर्विंशतेरपि गुणत्वमेकं तदेवाखण्डत्वेन लाघवाल्लक्षणं तद्व्यञ्जकन्तु सामान्यवान् चलनानात्मकः समवायिकारणताहीनो गुण इत्यादीति । द्रव्यकर्मणोस्तु विरुद्धकार्यकारित्वेप्यनपेक्षतत्कारिता कर्मणामिति तद्व्यवस्थापकं कर्मत्वमिति द्रष्टव्यम् ॥

सामान्यवानित्यत्र किं सामान्यम् । जातिरिति यदि केयं जातिः नित्यत्वे सत्यनेकसमवेतेति विद्धि अनेकसमवेतोऽप्यवयव्यादिर्न नित्यः नित्यश्च परमाणुस्नेहादिर्न त्वनेकसमवेतः । अथ महाप्रलये सर्वेषामनित्यानामभावात्तन्निष्ठा जातयो नित्यानेकसमवेतत्वं स्वलक्षणं त्यजन्तीति चेत् । किं नश्छिन्नं यावन्तं कालं लक्षणाधीनो व्यवहारस्तावन्तं कालं लक्ष्यात्यागादेव लक्षणं एवमनुगतधीकारणत्वम् । न च सामग्र्यामतिव्याप्तिः तस्या अकारणत्वात् नापि तदन्तर्गतेषु सा तेषां तत्राप्रधानत्वात तेनानुगतमतिप्रधानकारणत्वं जातिलक्षणं न च महाप्रलये लक्षणासिद्धिर्दोषाय तदेतरव्यवच्छित्तेरसाधनेन लक्षणसिद्धेर्निर्बीजत्वात् अत

एव गन्धशब्दाश्रयत्वाद्यपि लक्षणं घटते। यत्तु खण्डितं नित्यानेकसमवेतत्वं लक्षणं नित्यमनित्यं वा। आद्ये अंशत आत्माश्रयः नित्यत्वेपि लक्षणान्तर्गते नित्यत्वस्योपगमात्। अन्त्ये जातिव्यक्तिसमवायादीनामेकतमस्यानित्यत्वमावश्यकं तदन्तरेण विशिष्टाभावासम्भवात् घट दावनित्ये तदनित्यतया घटत्वादौ लक्षणस्यानित्यत्वं यद्यपि सम्भवति तथाप्यात्मत्वादौ तदसम्भवः आत्मनोऽपि व्यक्तेर्नित्यत्वात् एवञ्चैकमेव नित्यानेकसमवेतत्वं घटत्वादावनित्यम्। आत्मत्वादौ तु नित्यमिति प्राप्तम्। एवं प्राप्तेऽभिधीयते। नित्यानेकसमवेतत्वमुपाधित्वात्सखण्डं सखण्डत्वाच्चान्यघटितं तथा च यत्र घटादिव्यक्तिघटितं तत्र तदनित्यत्वेनानित्यं यत्र त्वात्मादिव्यक्तिभिर्घटितं तत्र तासामपि नित्यतया दैवान्नित्यमिति। नन्वेकमेव वस्तु नित्यमनित्यञ्च ध्वस्तञ्च सच्चेति महद्वैशसमिति चेत्। न अन्येनानेकेन घटितं घटत्वादेरनेकवृत्तित्वमन्यदिति नैकस्य विरुद्धधर्माध्यासः। तत्कथमिदमेकं लक्षणमनेकवृत्तित्वस्योभयत्राविशेषात् नित्यत्वस्य च नित्यत्वं प्रामाणिकं तदनित्यत्वस्याप्रामाणिकत्वादिति सम्प्रदायः। नव्यास्तु अभिधादीनां भङ्गुरत्वेप्यभिधेयत्वादिकं यथा ध्रुवं तथा व्यक्तीनां भङ्गेप्यनेकसमवेतत्वं स्यादेवेत्याहुः॥

सामान्यलक्षणादीनां विशेषणैर्विशेषादयो यथासम्भवं निरार्या इत्यात्थ। तत्र के ते विशेषाः। नित्येष्वेव द्रव्येष्वेव वर्तन्त एव ये ते विशेषा इति चेन्न आत्मत्वादावतिव्याप्तेः। आत्मत्वादिकं सर्वस्मिन्नित्यद्रव्ये न वर्तते एते तु वर्तन्त एवेति चेन्न तर्हि एकैकविशेषस्य सकलनित्यवृत्तित्वमिति सर्वाव्याप्तिरिति खण्डनम्।

तन्न । एकैकव्यक्तिरेकैकत्र नित्यद्रव्ये वर्तत इत्यनेन रूपेण ये नित्यद्रव्येष्वेव वर्तन्त एव ते विशेषा इत्यस्य लक्षणार्थत्वात् यद्यप्येकैका एव वर्तन इत्यव्याप्तिरेव । तथाप्येतज्जातीयाः सर्व एवेति सर्वव्याप्तिः एतज्जातीयत्वं तु लक्षणैक्यादिति काणादादयः । अत्र गौतमीयाः । अत्र सर्वत्र वृत्त्याव्याप्तिनिरासेन लक्षणसिद्धिः लक्षणसिद्धा तल्लक्षणवत्त्वपुरस्कारेण सर्वत्र वृत्तिः व्यक्तीनां हि गङ्गावालुकायमानानामेकैकद्रव्यव्यक्तिमात्रविश्रान्तानां स्वतः सार्वत्रिकत्वासम्भवादित्यन्योन्याश्रयः विलक्षणधीस्तु वैलक्षण्याज्जात्यादिवदिति ॥

ननु लक्षणानि लक्ष्येषु कुतो व्यवहारकाणि सम्बन्धादिति चेत् । किमिदं सम्बन्धत्वं विशिष्टधीनियामकत्वम् असम्बन्धेभ्यो हि व्यावर्तमाना हि विशिष्टप्रमा विशेषणवत्येव विश्राम्यति न हि केवले पुंसि दण्डीति कश्चित् प्रमिणोति । नीरूपे वायौ रूपसम्बन्धोस्त्येवेति चेत् । अस्तु रूपात्यन्ताभावसम्बन्धोप्यस्ति तथा च विरोध्यनुपहितो विशेषणसम्बन्धो विशिष्टव्यवहारकः स तादृशो वायौ नास्तीत्यतो न तत्र रूपविशिष्टव्यवहारः । एवं दण्डिव्यवहारे दण्डसम्बन्धः संयोगलक्षणो हेतुः स च दण्डसंयोगात्यन्ताभावेनाव्याप्यवृत्तिनोपहितोपि विरोध्यनुपहित एव तस्यात्यन्ताभावस्याव्याप्यवृत्तित्वावच्छिन्नस्य तदविरोधित्वात् सम्बन्धेन समं सम्बन्धिनः सम्बन्धः संयोगेन समं समवायः समवायेन समं कः स्वरूपमेव । अस्तु तर्हि स्वरूपत एव स्वरूपं सम्बन्ध इति चेत् । भवेदेवं यदि जातिगुणक्रियाविशिष्टधियां सम्बन्धजन्यत्वानुमितिर्लाघवादेकं नावगाहेत । हन्तैवमभावरूपादिविशिष्टधियामप्येकः सम्बन्धो विषयो निमित्तं वास्तु लाघवादिति

तदेव वैशिष्ट्यं स्यादिति चेत् । इदं हि प्रत्यक्षनिर्णयेऽस्माभिः प्रपञ्चितमिति तत्रैवानुसन्धेयम् । एवञ्च नियामकत्वमेव सम्बन्धत्वमित्युत्प्रेक्षाभावोपि त्वया नियामकोऽङ्गीक्रियते तथापि सोपि सम्बन्धः स्यादिति यत्खण्डनम् तच्छलम् । विशिष्टधीनियामकस्य मया सम्बन्धत्वमुपेयते न तु नियामकमात्रस्येति ॥

ननु नियामकत्वं नियमकारणत्वं कारणत्वञ्च नियतप्राक्सत्त्वमत्र च प्रागिति व्यर्थं सत्त्वमात्रमेवास्तु कारणत्वमिति धिङ्नियामकं न हि भविष्यदतीतं कर्तुं शक्नोति स्वरूपासिद्धेः प्राच्यन्तु भाविनं कुर्यात् व्यापारादियोगात् अत एव घटार्थी मृदमुपादत्ते न तु जलाहरणादिकमिति सार्वलौकिको व्यवहारः । ननु स्वभावस्य नियामकत्वे स्वयमेव स्वं नियमयतीति प्राप्तं तथा च स्वस्याप्रसक्तत्वे नियामकतानतिप्रसक्तत्वे च न नियम्यता । अयमेव सम्भाव्यत्वादिति सत्यम् । नियामकमन्तरेण यन्नियतत्वं तदेव स्वभावनियम्यत्वार्थः । यद्वा तेजःप्रभृतेरौष्ण्यादि स्वभावनियम्यं तेजस्त्वादिप्रयुक्तमित्यर्थः । ननु दण्डादिना कारणेन घटादिकार्यं नियम्यत इति ब्रूषे तस्य किं नियम्यते स्वरूपं वा कालविशेषयोगो वा उभयमप्यनियतं वा । आद्ये घटमिव पटमपि घटस्योत्तरकालसम्बन्धमिव पटस्याप्युत्तरकालसम्बन्धं नियमयेदविशेषात् अनियतत्वेनोभयोरपि नियतत्वात् तदाह ।

यदि कुर्यादसत्कालानियतं नियतं परः ।

तत्स्यादतिप्रसक्तत्वमन्यथा च नियन्तृता ॥ इति ।

अस्यार्थः । परो दण्डादिः यदि असत्कालानियतं वा घटादिः नियतं घटादिस्वरूपेण नियतं कालविशेष-

योगितया वा नियतं कुर्यात्तदातिप्रसक्तिः स्यात् न ह्युत्पत्तेः प्राक् पटस्यालब्धात्मकस्यात्मलाभे कोपि विशेषोस्ति अभ्युपेत्याह अन्यथा घटस्य तदीयकालविशेषयोगस्य वा नियतत्वे नियामकं न नियन्तृ तदन्तरेणैव घटस्य तत्कालविशेषयोगस्य वा नियतत्वादिति । तन्न । न ह्यसत्त्वकाले घटादेर्नियतत्वादिकं धर्मो भवितुमर्हति । धर्मिण एवासत्त्वात्तथा च प्रष्टा चोत्तरयिता च द्वावपि शून्यहृदयौ । ननु सुहृद्भावेन पृच्छामः घटकारणानि कुतो नियामकाद्घटमेव जनयन्ति । तत्समवायिकपालमिलनात् । कपालमेव कुतो घटमेवारभते न तु पटं स्वभावादिति ब्रूमः । कार्यमप्राप्तानि कारणानि जनयन्त्यतिप्रसङ्गात् तत्प्राप्तानि च न तज्जनयन्ति विशेषादिति ब्रूम इति चेत् । इमे हि प्राप्त्यप्राप्तिसमे हि जातीति स्वव्याघातमपि न वेत्सीति दूरमपसर । अस्तु व्याघातः किं नश्छिन्नम् न वयं किञ्चिदपीच्छामः किञ्चिदपि साधयामः किञ्चिदपि स्थापयामः किञ्चिदपि ब्रूम इति चेन्न । न हि लौकिको न परीक्षक इत्युन्मत्तवदुपेक्षणीयः स्या इति ॥

ननु नियामकं नियम्ये सन्नियम्यं नियमयेत् तत्र च कः सप्तम्यर्थः । आधारत्वमिति चेत् । किमाधारत्वम् देशे इहेति प्रत्ययविषयत्वम् गवादौ अत्रेति प्रत्ययविषयत्वम् अवसरे एतर्हीति प्रत्ययविषयत्वमिति चेत् । इहेत्यादयः शब्दपरा अर्थपरा वा । नाद्यः न हि देशानां नामाधारताबुद्धौ प्रात्यक्षिक्यादयः शब्दा अपि चकासति । नान्त्यः सर्वसाधारणस्य तस्यैव सप्तम्यर्थस्य निरूप्यमानत्वादिति खण्डनम् । अत्रोच्यते । अयमाधारत्वस्य लक्षणप्रश्नो वा स्वरूपे प्रश्नो वा आधारपदप्रवृत्तिनिमित्तप्रश्नो वा । नाद्यः

तस्य प्रमेयत्ववत् केवलान्वयित्वात् सर्वं किं वस्तु स्वीयलक्षणस्याधार एव। ननु कारकत्वगर्भमाधारत्वं पृच्छामीति चेत्। अत्रोच्यते। चरमध्वंसेतरत्वमिति गृहाण। चरमध्वंसः परमकारकः शेषास्तु धर्मित्वे सति कारका इति। द्वितीये स धर्मी इत्येवोत्तरम् यावान् धर्मी तावान् धर्मस्याधार एव। अन्त्ये धर्मित्वमित्येवोत्तरम् धर्मित्वमेव प्रतीत्याधारवाचिपदं प्रयुज्यते। कुण्डे वदरमित्यादि कुण्डादेर्द्धर्मिभूतस्य धर्मभूतं वदरादि। कुण्डस्य वदरं प्रति किमाधारत्वमिति चेत्। वदरपतनप्रतिबन्धकत्वम्। नन्वेवं ब्रह्माण्डधर्ता प्रयत्नवान् परमपुमान् ब्रह्माण्डस्याधारः स्यात्। तदुक्तं भगवतैव।

मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इवेति।

केचित्त्वेवमनिच्छन्तो मूर्तपदमत्रविशेषणमाहुः। वदरादिकं हि कुण्डाद्यपेक्षते न तु कुण्डेन वदरं स्वास्तितायै तदपेक्ष्यते सहैव कुण्डेन पतति वदरे नाधाराधेयभावः। एवं रूपादिना तदुत्पत्तिमता पटादिकं स्वोत्पत्त्यर्थमपेक्ष्यते न तु पटादिना रूपादि तदर्थमपेक्ष्यते एवं गोत्वादिना गवादि ज्ञप्तयेऽपेक्ष्यते न तु गवादिना तदर्थं गोत्वादिकमपेक्ष्यते। तदाहुः। उत्पत्तये स्थितये ज्ञप्तये च यद्येनापेक्ष्यते तत्तस्याधिकरणमिति। एवञ्च प्रतिबध्यपतनानाश्रयत्वे सति पतनप्रतिबन्धकसंयोगवन्मूर्तत्वं कुण्डादेर्वदरादिकं प्रत्याधारत्वम्। ननु किमिदं पतनं नाम अधःसंयोगफलककर्मत्वमिति चेत्। कोऽयमधःपदार्थः पतनभागी देश इति तावदयुक्तमन्योन्याश्रयात्। अन्यच्चाधःपदार्थभूतमनुगतं दुर्वचमिति। सत्यम्। न ह्यधस्त्वमप्रतियोगिकं गोत्वादिवदनुगतं मृगयसे किन्तु प्रति-

स्वभिन्नं तथाहि यद्यदपेक्षया गुरुत्वासमवायिकारणक-क्रियाजन्यफलाश्रयस्तत्तदपेक्षया अध इति। एवं सूर्यापेक्षया भूः तदपेक्षया पातालं तदपेक्षया नरकस्ततदपेक्षया गर्भोदकमित्यादि यथाक्रममधः एतत्प्रतिलोममूर्द्धम्। उभयरूपाश्रयो मध्यमित्यादि। गवि गोत्वसमवाय इत्यादौ स्वरूपसम्बन्धेनैव विशिष्टधीज्ञानघटयोरिव विषयविषयिभावः॥

ननु कोऽयं विषयविषयिभावः। प्रकाशस्य सतस्तदीयतामात्ररूपः स्वभावविशेषो विषयविषयिभाव इति तावदव्यापकम्। इच्छाया विषयिण्या अप्रकाशत्वात् किञ्च स्वस्य वा भावः स्वश्चासौ भावश्चेति वा स्वभावः। आद्योऽपि सकलसाधारणो वा घटज्ञानादिप्रत्येकविश्रान्तो वा। अत्राद्यो नास्य घटादिग्राहितज्ज्ञानमात्ररूपकासकलज्ञानसाधारण्यात् तद्धर्मतोपगमाच्च। द्वितीये तु ज्ञानकारकस्यैव प्रतिज्ञानव्यक्तिभेदादिति वचनभङ्ग्या साकारपक्षाद्वाकार एव। किञ्चायं धर्मश्चौपाधिकः स्वाभाविको वा। आद्ये कुङ्कुमारुणा तरुणीतिवदुपाधेरप्यवभासः स्यात्। विषयीभूतो घटादिरेव च तत्रोपाधिरिति चेत्। नासम्बन्धात्। न हि सोऽपि ज्ञानेन सम्बध्यते विषयविषयिभावस्यासिद्धत्वात् नापि स्वाभाविकः न हि घटज्ञानेष्वेकः पटज्ञानेषु पर इत्यभ्युपगमे समूहालम्बने सङ्कीर्येत। एकं ज्ञानं द्व्यालम्बनं नैव भवतीति चेत्। तर्हि विशिष्टज्ञानाभावे विशिष्टस्य व्यवहारो न स्यात्। न हि विशिष्टमेकं नापि द्वितीयः न हि ज्ञानमेव विषयविषयिभावः ज्ञानव्यक्तेः प्रतिस्वं भेदे ततोऽनुगतविषयविषयिभावस्य व्यवहारानापत्तेः। एतेन ज्ञानं स्वाकारालम्बन-

मित्याद्यपि सावद्यमिति । अत्र ब्रूमः । ज्ञानस्य निर्विषयतां साधयसि वा सविषयतां निरस्यसि वा अभिप्रैषि वा किञ्चिदपि वा न कुरुषे वा । नाद्यौ विपरीतापत्तेः । यथा यथा निर्विषयतायै यत्नस्तथातथा सविषयता प्रत्यापद्यते । न हि त्वदुक्तं निर्विषयतां नालम्बते निर्विषयता च सिध्यतीति सम्भवति । वयं शुद्धवैतण्डिका अतो न ज्ञानस्य निर्विषयतां साधयामो न वा तामभिप्रैम इति चेत् । तथापि सविषयतां निरस्यसि तदपि नेति चेत् । तर्हि शून्यहृदयपशुवदुपेक्षणीयोसि । मदर्थं मा यस्य तव तु विषयविषयिभावस्य निरुक्तिः कथं घटतामिति ब्रूहीति चेत् । उक्तं प्रकाशस्येत्यादि । तथाहि प्रकाशप्रकाश्ययोरतिरिक्तः सम्बन्धस्तावन्नानुभूयते तेनासम्बन्धो वा स्यादनतिरिक्तो वा सम्बन्धः तत्राद्यो व्याघातदूषित एवेति परिशेषादन्त्यः सिध्यति। ननु सम्बन्ध्येव कथं सम्बन्धोऽस्तु तथा सति वा समवायमपि त्यजेति चेत् । स ह्यनुभूयमानतया न त्यज्यते प्रवाहस्तु त्यज्यत एव सम्बन्धिनि तु सम्बन्धातिदेशः स च कार्यातिदेशः पर्यवस्यति न तु स्वरूपस्यातिदेशः सम्भवति तथा सत्युपदेश एव स्यात् । तेन सम्बन्ध्येव सम्बन्धकार्यं विशिष्टव्यवहारादिरूपं करोति । ननु विशिष्टव्यवहारो वैशिष्ट्यव्यवहाराधीनः तच्च वैशिष्ट्याधीनं वैशिष्ट्यञ्च सम्बन्धः स च सम्बन्धिनोर्भिन्नः न हि स एव तद्वांस्तेनैव भवतीति चेत् । उपदेशे तथैव अयन्तु कार्यातिदेश इत्युक्तम् । यत्तु यज्ज्ञानजनिता ज्ञातता यस्मिन् धर्मिण्युदेति तज्ज्ञानं तद्विषयकमिति । तन्न । ज्ञातताया नैयायिकैरनभ्युपगमात् । भट्टैरुपेयत एव सेति चेत् । उपेयताम् । यत्रेत्यत्र कः सप्तम्यर्थः न हि ज्ञातता धर्मिणि

समवेता नापि संयुक्ता किन्तु स्वभावसम्बद्धा तथा च ज्ञानमेव स्वभावसम्बद्धमस्तु किमन्तर्गडुना ज्ञाततया अतीतानागतयोश्चार्थयोस्तदुपादानमशक्यम् । तत्रापि घटत्वादौ नित्ये धर्मे ज्ञाततोदय इति चेत् । तर्हि घटे धर्मिणि ज्ञातव्यवहारो न स्यात् धर्मधर्मिणोर्भेदात् विरोधेन भेदाभेदपक्षस्य शङ्कितुमशक्यत्वात् । अतीतानागतयोर्ज्ञाततां विनैव ज्ञातव्यवहारश्चेत् । वर्तमानेऽप्येवमस्तु अन्यथा वर्तमाने ज्ञाततया तयोस्तु ज्ञाततां विनैव ज्ञानव्यवहारो भवन् भ्रान्तः स्यादिति । तत्प्रतिबन्धव्यवहारानुकूलशक्तिशालित्वं तद्विषयत्वमित्यपि न तत्प्रतिबन्धो हि तद्विषय इति विषयविषयिभावखण्डनं नातिवर्तते । अथ ज्ञानं स्वाभिन्नमेव स्वाकारं विषयीकरोति बाह्यघटादिसिद्धिस्तु ज्ञानस्य घटाकारत्वान्यथानुपपत्त्या न हि बाह्यघटमन्तरेणैव ज्ञानस्य घटाकारता सर्वज्ञानानां घटाकारतापत्तेः तथा च ज्ञानाकारत्वमेव ज्ञानविषयत्वमिति सौगताः । तन्न । प्रभावत्वानुपपन्नं ज्ञानं तदपि हि आकारमात्रग्राहि न तु बाह्यग्राहि न हि भेदे विषयविषयिभाव इति ब्रूषे तथा च न बाह्यसिद्धिः कोयं भेदः यं प्रातीतिकमप्यशक्यसमर्थनमनिर्वचनीयमाविद्यकमात्थ ॥

ननु कथमस्तु भेदस्तथाहि ब्रह्म तावदेकमेव प्रपञ्चस्तु न प्रमाणसिद्धः स न स्वप्रकाशः जड़त्वात् नापि परप्रकाशः प्रकाशजडयोः सदसतोः सम्बन्धाभावात् तस्माद्युक्त्यापि प्रपञ्चे निरस्त एकमेवाद्वितीयं नेह नानास्ति किञ्चन इन्द्रो मायाभिः पुरुरूप इत्यादिभिरुपनिष-

द्भिरेव हि ब्रह्मणैक्यं प्रपञ्चस्य विषय[1] फलभेदो भाविकः स्यादिति । उच्यते । अस्ति विस्वरूपोन्योन्याभावो वैधर्म्य-भेदालौकिकप्रत्ययो यद्घटोयं न पटो मृन्मयश्चेति कात्रापि कथन्ता स्वरूपभेदस्य लक्षणं तादूप्येणाप्रतीता प्रतीतिरिति अन्योन्याभावस्य तु लक्षणमबाधितः समानाधिकरणो निषेधप्रत्ययो वैधर्म्यस्य तु एकधर्म्यसमावेशलक्षणो विरोध इति । अत्र प्रतीतिरित्येतावत् कृते इदं रजतमिति भ्रमेपि शुक्तिकायां या धीस्तया शुक्तिकायां रजतरूपव्यवहारः स्यादिति तद्वारणाय तादूप्येणाप्रतीतेति । तथाहि यतो रजतादेर्भेदावधिभूतात् शुक्तिकाव्यवहारः स्यात्तद्रूपत-यैव शुक्तिकायाः प्रतीतिरभूदिति नेयं धीः शुक्तिकायां स्वरूपभेदतः । एवमपि द्विचन्द्रबुद्धेः स्वरूपचन्द्रस्य मायाचन्द्रतादूप्येणाप्रतीतौ प्रतीतिरस्तीति तत्रापि स्वरूपभेदः स्यादतो प्रतीतिरित्थं दोषात् तत्र तु स्वरूप-चन्द्रस्य मायाचन्द्ररूपत्वेनाप्रतीतिर्दोषादेव तत्त्वाप्रती-तावतत्त्वप्रतीतौ चोभयत्रापि मन्मते दोषानां हेतु-त्वोपगमात् । ननु तादूप्येणाप्रतीतौ प्रतीयमानस्य धर्मिणः स्वरूपभेदे प्रतीते कथमभेदारोप इति चेत् । दोषमाहात्म्यादिति गृहाण । न चाभेदो नारोप्यते किन्तु तादात्म्यमिति वाच्यम् । तर्हि संसर्गाभावोयं स्यात्तादा-त्म्यस्य धर्मिणि निषेधादिति । अपरौ तु भेदौ स्था-पयिष्यामः प्रपञ्चस्य चाबाध्यतां वक्ष्यामः । ननु भेदधी-कालेऽवध्यन्वयोपि नौ कीदृशौ भेदवन्तावेवेति गृहाण । अनुयोगिनि स एव भेदोस्तु अवधौ तु अनुयोगिप्रतियो-गिक इति शेषः । ननु किम्भेदविशिष्टं किं भेदवृत्तिः न

(१) अत्रादर्शपुस्तकेषु कश्चिदंशो निपतितोऽस्ति ।

जानीमः । वस्तुतो यावत्सत्त्वमन्योन्याभाववैधर्म्ये सहैव स्तः अन्योन्याभावस्य जातिरूपवैधर्म्यस्य वाद्यक्षण एव तत्रान्वयात् अन्त्यक्षणपर्यन्तञ्च तत्र स्थितेः । स्वरूपभेदस्तु धर्मिणि वर्तत एवाभेदात् । कथं तर्हि पृथिवीत्वादिना वैधर्म्येणाभावात् स्वरूपभेदः पृथिव्यादेरनुमीयते धर्मिज्ञाने सिद्धसाधनात् धर्म्यज्ञाने चाश्रयासिद्धेरिति चेत् । न । तोयत्वेन पिपासोपशमनशक्तेस्तदभिन्नाया अनुमितिवदत्राप्यनुमितिसम्भवात् । तत्रापि कथमनुमितिरुपाधिभेदस्यानुमेयत्वात् । तोयत्वेन जात्या पिपासोपशमनकारणतावच्छेदकरूपत्वेन तदेव तोयमनुमीयते यथा तया पृथिवीत्वेन जात्या पृथिव्याः स्वभावाद्विलक्षणशरीरमनुमीयते । ननु पृथिवीत्वस्वरूपभेदयोः सामानाधिकरण्याभावात् कथं व्याप्तिः निरूपाधिसम्बन्धादित्यवेहि । तथाहि चतुर्द्धा न हि व्याप्तिः यो धूमवान् सोऽग्निमानिति यत्र धूमस्तत्राग्निरिति यो धूमवान् तत्राग्निरिति यत्र धूमः सोऽग्निमानिति इदञ्च व्याप्तिखण्डनोद्धारे प्रपञ्चितमतस्तत्रानुसन्धेयम् । ननु स्वरूपं निरवधिभेदः समाधिः स्वरूपमन्यनिरूप्यं भेदान्यनिरूप्यं तत्कथं स्वरूपं भेदोऽस्त्विति चेत् । इत्थम् । यथा घटस्य घटत्वेन निरूप्यमानस्य न सप्रतियोगिता न वान्यनिरूप्यता घटाभावाभावत्वे तु प्रतीयमानस्योभयस्यापि तथा स्वरूपत्वेन प्रतीयमानस्य माभूद्भेदत्वेन प्रतीयमानस्यावधिमत्ता वान्यनिरूपिता च स्यादेव । ननु चाभावस्य स्वरूपं निषेधत्वात् सप्रतियोगिकत्वं भेदत्वात् सावधिकं तथा च प्रतियोग्यनुयोगिभावोऽवध्यवधिमद्भावश्च द्वयमप्यभावस्य स्वरूपं तथा भावस्यैकस्य

विरुद्धं द्वयं कथं स्वभावोऽस्तु एकस्य द्विस्वभावत्वात् सप्रतियोगिकोऽस्तु एकस्य द्विस्वभावत्वासम्भवादिति चेत्। न भेदस्यावध्यवधिमद्भावे प्रमाणाभावात्। घटोऽयं न पट इत्यादिधियावध्यवधिमद्भावस्यानुल्लेखात् प्रमाणान्तरस्य च तत्राभावात्। अन्योन्याभावस्तु भेदोऽभावत्वात् सप्रतियोगिकोऽस्तु न प्रतियोग्यनुयोगिभाव एव तयोः सम्बन्धः अन्यप्रत्येकविश्रान्तधर्मसमाहाररूपतया सम्बन्धत्वायोगात् तथाहि प्रतियोगित्वमभावविरहात्मत्वं सत्प्रतियोगिमात्रधर्मश्चानुयोगित्वं तन्निषेधत्वं तदुपमर्दत्वम् स च निषेधमात्रधर्मः॥

एतेन कार्यकारणभावक्रियाकर्मभावज्ञाप्यज्ञापकभावव्याप्यव्यापकभावावध्यवधिमद्भावप्रभृतयोऽप्यधिका निरस्ता वेदितव्याः। तदयं सङ्क्षेपः। घटः पटो नेत्यादिप्रतीतेः स्वरूपवैधर्म्यै तु न सप्रतियोगिके सावधिकास्तु नात्र केपि अभावोपि न सावधिकः अभावबुद्धाववधेरस्फुरणात्। अत एवाभावधीकारणीभूतायामपि बुद्धाववधेर्भानमित्यपास्तम्। घटः पटो नेति बुद्धेरव्यवहितप्राक्प्यवधेरभानात्। तस्यैव स्वभावस्य भेदत्वेन ज्ञानेऽवधिज्ञानापेक्षा घटाभावाभावत्वेन घटज्ञाने घटाभावज्ञानापेक्षावत्। अमुकादमुको भिन्न इत्यादिकं पृथक्त्वादित्यप्याहुः। घटः पटो नेति प्रयोगे घटो धर्मी पटप्रतियोगिकान्योन्याभाववाननुभूयतेऽत्र चाभावे नञर्थैकदेशे प्रतियोगितया पटोऽन्वीयत इति। न च भेदेषु भेदाकारानुगतमतेर्भेदत्वं तत्र च विलक्षणधीसाक्षिका भेद इति परस्पराश्रयाश्रयिभाव इति वाच्यम्। प्रामाणिकेनास्यादोषत्वात्। न च विजातीयस्य त्रयस्यैकं भेदत्वमयुक्तम् अभेदव्यवहारविरोधित्व-

स्योपाधेस्त्रिष्वपि सम्भवात् घटत्वादयश्च पदप्रवृत्तितया प्रतीयन्ते ततः स्वाश्रयं भिन्दन्तीति नान्योन्याश्रयादि। नन्वननुगतैर्भेदैरनुगतो व्यवहारः कथम् अननुगतैरालोकधूमादियाथार्थ्यगता वह्न्यनुमितिः सापि कथं वह्निव्याप्यत्वेन भासते न आलोकादीनामनुगतिमत्त्वादिति यदि तर्ह्यभेदविरोधित्वेन भासिता भेदा अप्यनुगता एवेति। ननु भेदः कुत्र वर्तते यत्र प्रमीयते तत्र वर्तते कुत्र तर्हि प्रमितिव्यक्तिर्यत्र वृत्तिप्रमितिः अस्तु इयं रूढितोक्तिप्रत्युक्तिः सुहृद्भावेन पृच्छामः भेदो भिन्ने वर्ततेऽभिन्ने वा। नान्त्यो विरोधात् आद्येपि तेनैव भेदेन भिन्ने भेदान्तरेण वा। अत्राद्य आत्माश्रयः एकस्य क्रमिकवृत्तिद्वयासम्भवाच्च न ह्येक एव एकस्मिन्नेव धर्मिण्यादौ प्रविश्य पुनः प्रविशतीति सम्भवति। बहिःस्थस्यैव प्रवेशसम्भवात्। अन्त्येऽनवस्थाए (१) भिन्नादभेदभिन्नाद्वा अत्राद्यकल्पस्य एतद्भिन्नीभूतादयं भिन्नो भविष्यतीति भिदा एतस्मिन् भिन्नीभूतत्वेन ज्ञातादयं तद्भिन्नत्वेन ज्ञातव्यमिति वा अर्थः। अत्र नाद्य उभययोरपीति भेदयोरन्योन्याभावत्वेन तुल्यस्थित्या क्रमिकत्वायोगात्। नापरोन्योन्याश्रयात्। नान्त्यो बाधात्। न ह्यभिन्नात् भेदो भवतीति। किञ्च भेदः स्वप्रतियोगिनः स्वाश्रयतः स्वधर्मतश्च भिद्यते न वा आद्ये बहुमुखोऽनवस्था अन्त्ये स तेष्वेव लीयेतेति क्व भेदवार्तापीति। यद्यपि भेदं प्रतिभासमानं नापह्नोतुं शक्यमतस्तथाप्युक्तदूषणगणग्रस्ततया पत्रनिर्भरमभ्युपेयः। अत्रोच्यते। भेदो भिन्ने वर्तेताभिन्ने वा इति पृच्छतः सकलधर्मधर्मिभावखण्डनमभिप्रेतः किं गवि गोत्वमुतागवि गोत्वमिति धर्मकीर्तिपुरस्कृ-

(१) अत्रादर्शपुस्तकत्रयेऽपि कश्चिदंशो निपतितः।

तेन कापथेन संचरमाणस्य तव शून्योऽभिसन्धिः तथा हि न हि रूपवति रूपं वर्तते नापि रूपे रूपं वर्तते आत्माश्रयात् नापि नीरूपे रूपं वर्तते विरोधात् किन्तु रूपवानित्यत्र यो विशेषस्तत्र विशेषं वर्तत इति क्वात्रापि कथन्ता कोऽयं विशेष्यः पृथिव्यप्तेजोऽन्यतमः। स विशेष्यो रूपवृत्तेः प्राक्कीदृगिति चेत्। जन्यरूपस्थले रूपप्रागभाववानित्युत्तरम् अजन्यरूपस्थले तु रूपवृत्तिप्राक्कालो नास्त्येव क्व प्रश्नः। एवञ्च भेदो धर्मिणि निविशते नापि भिन्ने नापि भेदे। न च भेदवृत्तेः प्राक् स धर्मी कीदृशः नास्त्येवेति ब्रूमः यदैव हि धर्मी लब्धात्मकस्तदैव तत्र जातिरूपवैधर्म्यनामा भेदः समवेतो जातः सम्बन्धश्चेति मदुपगमात्। अन्योन्याभावस्वरूपभेदावपि तदैव न हि स तदानीमारभ्य तदात्मासीत्पश्चात्तदन्य इति सम्भवतीति। भिन्नभावप्रतियोगिकोऽन्योन्याभावलक्षणभेद इति सत्यम्। न तु भेदप्रतियोगिनि पिशाचादौ स्मृते स्तम्भे ऽनुभूयमाने योग्यानुपलब्ध्या स्तम्भः पिशाचो न भवतीति अन्योन्याभावप्रतियोगितः स्वाश्रया [१]धर्मतः भिद्यत इत्यत्रानुज्ञया वर्तितव्यम्। न चानवस्था तत्र मया स्वरूपभेदस्यैवोपगमात्। ननु स्वरूपं भेदो न सम्भवति अभेदे धर्मधर्मिभावाभावात्। न हि स एव तद्वान् तेनैव भवतीति चेत्। सत्यम्। ताद्रूप्येणाप्रतीयमानत्वे सति प्रतीयमानत्वं यत् धर्मिणः तदेव तस्मिन् तस्माद्विलक्षणं व्यवहारमर्जयतीति। न हि सम्भवति व्यवहीर्षुणा प्रतीयमानोऽपि धर्मी न व्यवह्रियते। नापि च सम्भवति अन्यतदात्मतया अप्रतीयमानोऽन्यतदात्मतयैव व्यवह्रियते तस्मात्ताद्रूप्येणाप्रतीतौ

(१) अत्रादर्शपुस्तकत्रये ऽपि कश्चिदंशो निपतितः।

धर्मिणः प्रतीतिर्भवन्ती तद्विलक्षणतयैव धर्मिणि व्यवहारयतीति स एव धर्मी तादृश्या बुद्ध्यालिङ्ग्यमानः स्वस्मिन् नेतरविलक्षणव्यवहारं जनयन् भेदकार्यकारितया भेद इत्युच्यते। अत एव कर्मव्युत्पत्त्या स्वस्वरूपं करणव्युत्पत्त्या वैधर्म्यं ईषद्व्युत्पत्त्यान्योन्याभावं भेदं वर्द्धमानोपाध्याया आहुः। अन्याय्यश्चानेकार्थत्वमिति जैमिनिसूत्रस्वरसेनात्र नानार्थत्वे निरस्ते लाघवाद्भावार्थत्वस्यैव युक्तत्वे तस्य व्युत्पत्तिमात्रप्रदर्शनपरत्वात्। परस्परस्पर्द्धया यत्र नानार्थाधिगतिस्तस्यैव नानार्थत्वात् भावार्थधीनियतत्वात् परद्वयप्रतीतेः वैधर्म्ये स्वरूपान्योभावो द्रव्यादिषु त्रयमिति। किञ्च वेदान्तिनोपि मद्वचीनपि भेदानबुध्यमाना धर्मकीर्तनेन किं गवि गोत्वमित्यादिना भ्रमितान्तःकरणा भेदान् व्यवस्थापयितुमशक्नुवन् अनिर्वचनतानगरं प्रविश्य सुखं शेरते। नैयायिकास्तु तर्ककान्तारसञ्चारधुरीणा उक्तिप्रत्युक्तिप्रवीणास्त्र्यक्षकणभक्षपक्षिण उपनिषद्विरुद्धपञ्चनकीकुण्डमतय एकत्वविरुद्धमपि शङ्कितमर्थं करतलानलकरतलमुपन्यस्यन्तः कीर्तिप्रभृतिव्याहृतीस्तृणवदस्यन्तःस्वमतमुन्नतं कुर्वते अत एवान्यत्र टीकाकृताप्युक्तं न हि मृगाः सन्तीति शालयो नोप्यन्ते भिक्षवः प्रचरन्तीति स्थाल्यो वा नाधिश्रियन्त इति। तत्र चानिष्टनिर्णेजनेन स्वेष्टं रक्षणीयमिति तेषां भाव उन्नीयत इत्यलमतिविस्तरेणेति॥

नन्वेकधर्म्यसमावेश इति वैधर्म्यलक्षणमुक्तम्। तदयुक्तम्। प्रमाणत्वप्रमेयत्वयोरेकधर्मिसमाविष्टयोरपि परस्परवैधर्म्यरूपत्वात्। प्रमाकरणत्वं हि प्रमाणत्वं प्रमाविषयत्वं च प्रमेयत्वमिति। अथैवमपि एतावुपाधी भिन्नावि-

त्युक्तं भवतीति न तु विरुद्धौ एकधर्मिसमावेशादेव अन्यथा घटत्वकम्बुग्रीवाद्युत्वेऽपि परस्परविरुद्धे किं न स्तां तस्मात् क्वचिदर्थैक्येऽप्यक्षरमात्रभेदो यथा कारकत्वं व्यापारवत्कारणत्वं चेति क्वचिद्विरोधेपि भेदः यथा गन्धवत्त्वपृथिवीत्वादीनां समसमावेशवतां क्वचित्तु समावेशो व्याप्यस्य स्वव्यापकधर्म्यधिष्ठितस्वानधिष्ठितधर्मिभेदकत्वेन ततो वैधर्म्यरूपत्वं यथा पृथिवीत्वस्य द्रव्यत्ववद्बाद्यवृत्तित्वेन ततो भेदकतया तद्वैधर्म्यत्वं तथेह प्रमेयत्वाक्रान्तहेत्वाभासाद्यवृत्तितया प्रमाणत्वमस्तु हेत्वाभासादिभ्यो वैधर्म्यं प्रमेयत्वं तु न स्यात् केवलान्वयित्वेन सर्वीयत्वादितिघटपटत्वादि तु परस्परवैधर्म्यमिति सुप्रसिद्धमेवेति । एवं बाधिताभेदसाक्षाद्धीरर्थकारणिकेत्यतोपि भेदसिद्धिः॥

ननु किमिदं कारणत्वं न तावत्प्राक्सत्त्वम् चिरध्वस्तस्यापि कारणत्वापत्तेः । ननु स्वाङ्गस्याव्यवधायकव्यापारेण व्यापारी न व्यवधीयत इति चेत् । न व्यापारानिरुक्तेः तज्जन्यत्वे सति तज्जन्यजनकस्तद्व्यापार इति चेत् । कुम्भकारस्यापि स्वपितृव्यापारतापत्तेः तज्जन्यकुम्भस्तत्पितृजन्यो न भवतीति चेत् । न । स्वर्गे यागवत्तस्यापि तज्जन्यजनकत्वाविरोधात् व्यवहितयोः कार्यकारणभावे गृहीते तन्निर्वाहाय यत्र मध्यम आक्षिप्यते तत्र स व्यापारो यथा यागस्वर्गयोः यत्र तु न तथा तत्र प्रथमस्य मध्यमेऽन्यथासिद्धिर्यथा कुम्भकारपितुः कुम्भकारेणेति चेत् । तर्ह्यनन्यथासिद्धपूर्ववर्तित्वं तदित्यायाति तथा च भक्षितं विनष्टबीजमङ्कुरे कारणं न स्यात् तदङ्कुरपूर्ववर्तित्वाभावात् । अनन्यथासिद्धनियतपूर्ववर्तिजातीयत्वं तदिति चेत् । तर्हि रासभोप्यङ्कुरकारणं स्यात् द्रव्यत्वेन तस्यापि बीजसजाती-

यत्वात् । येन रूपेणाङ्कुरवत्तान्विष्यते तेन रूपेण साजात्यं विवक्षितमिति चेत् । कारणावच्छेदकरूपेण साजात्यकारणत्वविवक्षायामात्माश्रयापत्तेः । तर्हि बीजत्वमपि न तथा न ह्यङ्कुरवत्ता बीजत्वेनावच्छिद्यते भक्षितविनष्टे बीजे अङ्कुरासम्बन्धिनि गतत्वात् । अङ्कुरवत्ता येन रूपेणावच्छिद्यते तेन रूपेण साजात्यं विवक्षितमिति चेत् । न । कारणावच्छेदकरूपेण साजात्यकारणत्वविवक्षायामात्माश्रयापत्तेः ॥

अनन्यथासिद्धिस्त्वन्यथासिद्धिविरहः सा च दुर्वचेति खण्डनम् । तन्न । अनन्यथासिद्धञ्च तन्नियतपूर्ववर्तित्वञ्चेति कार्योपहितं कारणशरीरं तज्जातीयं सदेव बीजत्वाद्यवच्छिन्नं व्यक्त्यन्तरञ्चेति । अन्यथासिद्धमपि दण्डत्वादिकं घटादिपूर्वसमये नियमतो ऽस्त्येवेति तद्वारणायानन्यथासिद्धं चेति । अन्यथासिद्धिस्त्रेधा येन सहैव यस्यान्वयव्यतिरेकौ गृह्येते तस्य तेन सा यथा घटं प्रति दण्डेन दण्डरूपस्य यागापूर्वयोस्तन्नैवं तत्र हि यागस्य पूर्ववर्तित्वे ऽवगते ऽपूर्वस्य तथात्वमवगम्यते । न त्ववगम्यमाने एवं दण्डेन दण्डत्वमप्यन्यथासिद्धं तस्याप्यन्वयव्यतिरेकौ दण्डेनैव सह गृह्येते तथा च स्वतन्त्रान्वयव्यतिरेकयोः कारणताबीजस्याभावात् न दण्डरूपं दण्डत्वं वा घटस्य कारणमुद्भूतरूपन्तु विषयेऽनुगततया प्रत्यक्षावच्छेदकमपि सत् स्वतन्त्रान्वयव्यतिरेकित्वात् घटादिप्रत्यक्षं प्रति कारणमेवेत्युभयरूपं तथा अन्यं प्रति पूर्ववर्तित्वे ज्ञात एव यत् प्रति यस्य पूर्ववर्तित्वं ज्ञायते यथा शब्दं प्रति पूर्ववर्तित्वे ज्ञात एव घटादिकं प्रत्याकाशस्य तथात्वं ज्ञायत इति शब्देन घटादिकं प्रति व्योमान्यथासिद्धं धर्मिग्राहक-

मानेन शब्दकारणतयैव तत्सिद्धौ व्योम्नस्तदन्यकारणत्वकल्पनायां मानाभावात्। अत एव पुत्रं प्रति पूर्ववर्तित्वे ज्ञाते पितुस्तज्जन्यघटादिकं प्रति पूर्ववर्तिता ज्ञायत इति पुत्रस्य कार्ये पितान्यथासिद्धः कारणताग्राहकस्य स्वतन्त्रान्वयव्यतिरेकस्याभावात् । दण्डसंयोगश्रामण्योस्तु नैवं तयोर्युगपदेव पूर्वभावित्वग्रहात् दण्डे भग्नेपि सतो भ्रामणस्य पूर्वभावित्वग्रहान्न दण्डरूपवदन्यथासिद्धिः । न च यागस्यापि स्वर्गं प्रति पूर्ववर्तित्वे ज्ञात एवापूर्वं तत्त्वं ज्ञायत इत्यपूर्वं प्रति यागोप्यन्यथासिद्धोस्त्विति वाच्यम्। अत्रैवंरूपत्वेपि अपूर्वकारणताग्राहिकायाः प्रतीतस्वर्गसाधनतानुपपत्तेः सत्त्वात् । तथा च यद्व्यवहितयोः शब्दादिना कार्यकारणभावे गृहीते तन्निर्वाहाय मध्यमः कल्प्यते तत्र नान्यथासिद्धिगन्धोपि। न हि प्रथमस्य मध्यमं प्रत्यकारणत्वे तद्द्वारा चरमं प्रति कारणत्वं निर्वहतीति तथा चान्यत्र क्लृप्तनियतपूर्ववर्तिन एव कार्यसम्भवे तत्सहभूतत्वं यथा गन्धवति गन्धानुत्पादात् गन्धं प्रति गन्धप्रागभावस्य पूर्ववर्तित्वकल्पना तत एव पाकजस्थलेपि गन्धोद्यसम्भवे रसादिप्रागभावानां त्रयाणामपि गन्धं प्रति कारणत्वं न कल्प्यते गौरवादित्यन्यथासिद्धत्वम्। एवञ्च सर्वत्र कारणताग्राहकाभावो मूलमन्यथासिद्धेरिति द्रष्टव्यम् । एतावदन्यथासिद्धिरहितं सत् यत्पूर्ववर्ति भवति तत् कारणम् । तत्र प्रागभावावच्छिन्नस्तु समयः पूर्वपदार्थः तत्र प्रतियोग्यन्यूनानतिरिक्तकालीनावधिकयावत्परत्वाश्रयसमानकालीनः कादाचित्कोऽभावः प्रागभावः जन्यगुणकर्मणोरपि प्रागभावः सम्भवति स च न प्रतियोग्यवधिकपरत्वाश्रयसमानकालः तत्प्रतियोगिनाममूर्त-

त्वेन परत्वोपाधित्वासम्भवादतः प्रतियोगि च तद्भिन्नञ्च तत्कालीनं द्वयमपीदृशं भवति । तत्र गुणकर्मणोः प्रतियोगिभिन्नमन्यत्र तु प्रतियोग्येव ग्राह्यम् एतादृशं प्रतियोगिन्यूनकालीनमपि तदधिकपरत्वाश्रयस्य च न समानकालीनो भवति घटादिप्रागभावस्तस्य घटाद्युत्पत्त्या प्रागेव नष्टत्वादतोऽन्यूनेति । एवञ्च प्रतियोग्युत्पत्तिक्षणोत्पत्तिक इत्यर्थो विवक्षित एतावत एवार्थस्य प्रागभावनिरूपणे उपयोगः शेषन्तु सम्पातायातमत एव समानकालीनपदार्थनिरूप्ययावत्परत्वाश्रयतुल्यकाल इति प्राञ्चोपि व्याचक्रुः । एवञ्च प्रतियोगिसमानकालोत्पत्तिकावधिकपरत्वाश्रयो यत्र प्रतियोगिध्वंसानन्तरमप्यनुवर्तते तत्र तु ध्वंसस्यापि प्रतियोगिसमानकालावधिकपरत्वाश्रयसमानकालत्वमस्तीत्यतिव्याप्तिरतो यावदिति परत्वाश्रयविशेषणं ध्वंसस्तु नैवं पूर्वनष्टैः प्रतियोगिपरैरसमानकालीनत्वात् । अत्र यावदिति यदि परत्वविशेषणं तदाऽसम्भवः न हि यावन्ति तदधिकानि परत्वानि कारणात्मक आश्रयः सम्भवति । अथाश्रयविशेषणं तदाऽनन्वयः परत्वपदेन व्यवधानादिति यद्यपि तथापि परत्वानन्तरं यावत्पदं पठनीयमिति सम्प्रदायः । यथोक्तावधिकयावांश्च परत्वाश्रयः परत्वस्य तदधिकत्वेन तदाश्रयस्यापि तदधिकत्वोपचारादिति केचित् । न चान्त्यशब्दस्य क्षणिकतया मूर्तस्य चाक्षणिकतया तदन्यूनानतिरिक्तकालीनस्याप्रसिद्ध्या तत्प्रागभावाव्याप्तिरिति वाच्यम् । तस्यापि कालनाश्यत्वेन क्षणिकत्वानभ्युपगमात् । वस्तुतस्तु द्वित्रिक्षणावस्थायिकमपि मूर्तं प्रतियोग्युत्पत्तिक्षणोत्पत्तिकं भवत्येव एतावदेव चेह विवक्षितमतो न

तदव्याप्तिः किन्तु खण्डप्रलयकालीनपरमाणुपरिस्पन्दानां प्रागभावव्याप्तिविरहदोषः । न हि तदभाववद्विवक्षितपरत्वाद्यवधिभूतं मूर्तमस्तीति किन्तु गन्धानाधारसमयानाधारोऽभावः प्रागभावः गन्धत्वं स्वाधिकरणानधिकरणानधिकरणकालवृत्तिः कार्यमात्रवृत्तिधर्मत्वात् एतद्घटवदित्यस्य सत्त्वादिति स्वपदेन क्षारीकृतत्वात् किन्तु शब्दध्वंसः शब्दप्रागभावरहितवृत्तिः ध्वंसत्वात् घटध्वंसवदिति हि तत्र समानम् । ननु पूर्वसमयः प्रागभावविशिष्टो वा प्रागभावोपलक्षितो वा । नाद्यः तद्विशिष्टे तदवृत्त्या प्रागभावस्य पूर्ववर्तित्वाभावादकारणत्वापत्तेः । नापरः पूर्वसमये पूर्वसमयस्यावृत्त्या तस्याकारणत्वापत्तेः ध्वंसे प्रतियोगिनो ऽकारणत्वापत्तेश्च । न हि ध्वंसस्य प्रागभावः सम्भवति । प्रतियोग्येव तस्य प्रागभाव इति चेत् । न । तस्य जन्यभावस्याजन्याभावतादात्म्याभावादित्यभिप्रेत्य सहकारिविरहप्रयुक्तकार्याभाववत्त्वं तत्त्वमित्याहुः । शिलाशकलन्तु न तथा तस्याङ्कुरानुपधाने शिलात्वस्यैव प्रयोजकत्वादेवं च सहकारिविरहव्याप्यकार्यप्रागभाववत्त्वं तत्त्वमिति चेत् । न निमित्तासमवायिकारणाव्याप्तेः न हि तत्र कार्यप्रागभावोऽस्तीति । उच्यते । कारणे बीजादौ कार्यतदभावौ तावद्विधेते तत्र बीजस्याङ्कुरासम्बन्धः कैवल्येनावच्छिद्यते न च बीजत्वेन सहकारिसहितात्तत एवाङ्कुरोदयात् शिलायान्तु शिलात्वेनैव शिलायामङ्कुरासम्बन्धाव्यभिचारात् । एवञ्चान्यासमवधानावच्छिन्नकार्यासम्बन्धिकत्वं कारणत्वम् । न च भक्षितविनष्टबीजाव्याप्तिः तस्यापि सत्त्वदशायामङ्कुरासम्बन्धस्यान्यास-

त्वन्धिनि चावच्छेदनात् । तदेव हि बीजं सत्त्वदशायां यदि सहकारिभिः सम्पत्स्यते अङ्कुरमजनिष्यदेवेति न चासमवाय्यादीनां कार्यसम्बन्धनियतानामव्याप्तिः आजानिकधर्मावच्छिन्नकार्यासम्बन्धस्य विरहः कारणत्वमस्य चासमवाय्यादावपि सत्त्वादिति कारणत्वं तावन्नियतप्राक्सत्त्वविशेषस्तद्ग्रहश्चान्वयव्यतिरेकाभ्यां नियतेनान्वयेन वा। नन्वस्तु या कारणता सापि कथं ग्राह्या तथाहि कारणता ह्यविशेषिता न गृह्यते किन्तु घटादिकार्यविशेषिता विशेषान्वयव्यतिरेकाभ्यां तस्या एव ज्ञानसम्भवात् । सा च न पूर्वकाले ग्राह्यविशेषणीभूतकार्यविरहात् कार्यसत्त्वकाले च तत्प्रागभावघटितसामग्रीविरहान्न कार्यजननविशेषितं कारणत्वमस्तीति न कदापि घटकारणत्वमस्तीति न कदापि घटकारणत्वमध्यक्षं स्यात्। अथ संस्कारोपनीतकारणत्वमादाय कार्यकाले प्रत्यक्षेण कारणविशिष्टकार्यग्रह इति चेत् । कार्यविशेषितस्य कारणस्य पूर्वक्षणे कार्यासत्त्वेनासत्तया ग्रहणाभावेन संस्काराभावात् । अनुमानेन तद्ग्रहे तत्राप्यनुमानान्तरेण तद्ग्रहेऽनवस्थापत्तेः । न चैवं कारणत्वाग्रहे तथापि प्रवृत्तिनिवृत्ती न स्तामिति वाच्यम् । ममानिर्वचनवादिनो दोषास्पर्शात्। कार्यस्य कादाचित्कत्वान्यथानुपपत्त्या दण्डादेः कारणत्वग्रह इति चेन्न । कदाचित्कार्यत्वस्य कार्यधर्मत्वेन कारणत्वस्य च कारणधर्मत्वेन नियतवैयधिकरण्येनाक्षेपायोगात् । न चार्थान्तरापत्तेर्वैयधिकरण्येनापि गमकत्वम् । अत एव देवदत्ताभावो गृहवृत्तिर्देवदत्ते बहिःसत्त्वं कल्पयति । अत एव चानुमानादसौ भिद्यते अपक्षवृत्तित्वात् । न च गृहवृत्त्यभावप्रतियोगित्वमाक्षेपकं देव-

दत्तासन्निकर्षे तद्विशेष्यकप्रत्यक्षतृतीयलिङ्गपरामर्शासम्भवात्। तथाप्युपपाद्योपपादकयोरसम्बन्धेऽतिप्रसङ्गात्। सम्बन्धे च सम्बन्धस्यापि सम्बन्धान्तरे चानवस्थानान्नोपपाद्योपपादकभाव इति। किञ्च कार्यवत्कारणस्यापि कादाचित्कत्वेन कारणत्वेऽनवस्था अकारणत्वे च पूर्वावधिविधुरत्वे तन्मात्रावधेः कार्यस्यापि पूर्वावधिविधुरत्वं स्यादिति । अपि चास्तु यत्किञ्चित्कारणत्वं तदपि प्रत्यक्षं यदि तदा स्वविषयप्रत्यक्षे तस्य कारणत्वं वाच्यं तथा चात्माश्रयः कारणत्वे कारणत्ववृत्तिस्वीकारात् । न च विषयाविशेषितस्य सन्निकर्षमात्रस्य साक्षात्कारणत्वमतिप्रसङ्गात् । इन्द्रियस्याप्यर्थवदेव कारणतापत्तेश्च। अपि च कारणत्वाकारणत्वसन्देहोच्छेदकं किञ्चिदवश्यं वाच्यम् । अन्यथा तदुच्छेदो न स्यात् । तथा च तदेव कारणत्वस्थानेऽभिषिच्यतां लाघवादावश्यकत्वाच्च । किञ्च कारणत्वं दण्डादेर्यदि स्वभावधर्मस्तदा यावत्सत्त्वं करोतीति धीः स्यात् । आगन्तुकत्वे च कार्योपधानात्प्राक् तद्धीर्न स्यात् । किञ्च कारणत्वं घटादिनिरूपितप्राक्सत्त्वमिति कारणव्यक्तिभेदात् कार्यव्यक्तिभेदाद्भिन्नमित्यनुगतधीव्यवहारौ न स्याताम्। किञ्च समवाय्यसमवायिनिमित्तानि कारणानि वृक्षशिंशपयोः सामग्रीद्वयं तदा कार्यद्वयं स्यात् । यद्येकैव तदा वृक्षाः सर्वे शिंशपात्मका एव स्युरिति खण्डनम् । अत्रोच्यते । घटकारणत्वं घटनियतप्राक्सत्त्वं तत्र च संस्कारोपस्थितो घटो विशेषणीभवति । एवं घटस्य दण्डकार्यत्वे संस्कारोपस्थितो दण्डः कारणत्वन्तु सामान्यं नियतप्राक्सत्त्वमात्रमेव । नन्वन्वयव्यतिरेकाभ्यां कथं कारण-

त्वग्रहः। ननु लिङ्गीभूय तौ तद् ग्राहयतः। न चान्वयव्यतिरेकप्रत्यक्षेण तद्ग्रहो भिन्नविषयत्वात्। नापि तज्जन्मना संस्कारेण विषयभेदात् तद्यथा संस्कारो ह्यन्वयव्यतिरेकालम्बन इन्द्रियन्तु प्राक्सत्त्वसम्बद्धमतो नानयोः सहकारो विषयभेदात्। दण्डस्य घटकारणत्वग्रहे नैवं तत्र द्वयोरपि संस्कारेन्द्रिययोर्विशिष्टालम्बनत्वादिति। मैवम्। अन्वयव्यतिरेकग्राहकं हि प्रत्यक्षं तद्धर्मिभूते कार्यकारणे अपि विषयीकरोति कारणताग्राहकमिन्द्रियमपि तत्सम्बद्धमेवेति भवत्येवानयोः सहकारिता समानविषयप्रत्ययत्वादिति। न च पूर्वभावित्वमपि दुर्वचं पूर्वकालसम्बन्धित्वस्यैव तत्त्वात्। न च पूर्वकाले सम्बन्धाभावात्तत्कालस्याकारणतापत्तिः। य एव दण्डे पूर्वकालसम्बन्धः स एव पूर्वकालेपि सम्बन्धस्योभयनिष्ठत्वात्। एतेन प्रागभावस्यापि हेतुत्वं स्थापितं कार्यप्रागभावोपलक्षितसमयसम्बन्धस्य कार्यप्रागभावेपि सत्त्वात्। न चैवं ध्वंसं प्रति कारणता न स्यात् तस्य प्रागभावाभावादिति वाच्यम्। प्रतियोगितत्प्रागभावान्यतरावच्छिन्नसमयस्यैवेह पूर्वसमयपदार्थत्वात्। न चैवं पूर्वपदस्य नानार्थतापत्तिः अगत्या तस्यापीष्टत्वात्। ननु कार्योपस्थिततत्सामग्र्यस्ति न वा आद्य उत्पन्नमपि तदुत्तरक्षणे पुनरुत्पद्येत्। अन्त्ये उत्पत्तिक्षणेपि नोत्पद्येत् तत्काले सामग्रीविरहात्। पूर्वक्षणस्थैव सामग्री अव्यवहितोत्तरक्षणस्थं कार्यमर्जयति स्वभावादिति चेत्। तर्हि व्यवहितक्षणस्थमप्यर्जयेदविशेषादिति। मैवम्। प्राप्त्यप्राप्तिसमापत्तेः तद्यथा त्वदुक्तमपि दूषणं दुष्टबुद्धिं प्राप्य जनयेदप्राप्य वेत्यस्य मयापि सुवचत्वात्। ननु कारणसत्त्वे

कार्यसत्त्वं कारणासत्त्वे कार्यासत्त्वमिति नान्वयव्यतिरेकौ किन्तु प्राक्कार्याबुद्धौ तत्कारणबुद्धौ कार्याबुद्धौ अबुद्धिद्वयं तत्प्रत्यक्षमित्यबुद्धित्रयमनुपलम्भ इति । तदुक्तं कीर्तिना ।

धूमार्थवह्निविज्ञानं धूमज्ञानमधीस्तयोः ।

प्रत्यक्षानुपलम्भाभ्यामेभिः पञ्चभिरन्वयः ॥ इति ।

तदसत् । इदन्तु कारणताग्राहकं न तु कारणत्वमित्यस्योक्तत्वात् । तत्रापि नियतव्यतिरेकेण कारणताग्रहो नियतान्वयव्यतिरेकाभ्यां न त्वदुक्तपञ्चकेनाकारणसाधारण्यादिति । ननु न्यायमते नियतप्राक्सत्त्वं तावत् कारणत्वं तेन तदैव करोतीति प्रयोगः स्यादिति चेत् । न । कार्योत्पत्त्यनुकूलव्यापारवत्त्वस्य करोतिना प्रतिपादनात् प्रकृते तादृशव्यापाराभावात् । यत्तु दण्डघटयोर्विशेषयोः कारणत्वं दण्डघटत्वाभ्यां वा एतद्धटत्वैतद्दण्डत्वाभ्यां वा नाद्यः न हि विशेषयोः सम्बन्धः सामान्याभ्यामवच्छिद्यते ऽतिप्रसक्तत्वात् । नापरः न ह्यन्ययोरन्वयव्यतिरेकौ किन्तु दण्डघटयोरेवेति । मैवम् । सा हि सामान्यरूपेणापि विशेषाणामेव हि सम्बन्धो गृह्यते न तु तदस्पृष्टस्य सामान्यमात्रस्य तस्य शशविषाणायमानत्वात् । तदुक्तम् ।

न निर्विशेषं सामान्यं भवेच्छशविषाणवदिति ।

कथं तर्हि विशेषसिद्धिः सामग्रीविशेषात् सामग्रीविशेषेण घटविशेषः सिध्यति । कारणानान्तु सामान्यार्जने शक्तिः सामग्रीविशेषात्तु विशेषः सिध्यति । यथा शब्दानां पदार्थसामान्ये शक्तावपि वाक्यविशेषादन्वयविशेषधीः व्याप्यस्य व्यापकसामान्यबुद्धौ सामर्थ्येपि पक्षधर्मतासहकारेण पक्षवृत्तिसाध्यसिद्ध्यादि । एवं सिद्धे कारणत्वे तद्विशेषश्चिन्त्यते । ते च त्रेधा समवाय्यसम-

वायिनिमित्तभेदात् । यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणं यथा रूपादौ घटादि । यस्मिन् सति कार्यं नास्तीति तत्समवायिसाम्यम् । यस्मिन् कारणे विद्यते तद्गुणकर्मान्यतररूपमसमवायिकारणं पर्युदासे नञ् यथा पटे तन्तुद्वयसंयोगः घटरूपे कपालरूपमित्यादि । यत्तु न कार्याधिकरणं न वा कार्यस्थितिनियामकं किन्तु कार्योत्पत्तिनियामकमात्रं तन्निमित्तकारणमिति । न च कालत्रयानिरुक्तिः । कालस्य स्वभावत ऐक्येपि उपाधिभेदेन तावद्भेदव्यवहारात् । तदुपाधयश्च घटादय एव तथा च तत्स्वरूपेणावच्छिन्नः कालः तस्य वर्तमानः कालः तत्प्रागभावेनावच्छिन्नः तस्य पूर्वकालः तद्ध्वंसेनावच्छिन्नस्तस्योत्तरकालः । तदुक्तमात्मतत्त्वविवेके । वर्तमानैकस्वभावत्वाद्भावानामिति । नन्वेवं ज्ञानावच्छिन्नः कालो ज्ञानस्य वर्तमानः कालस्तत्र च जानामीति लट् साधुः । तथा च घटज्ञाने स्वोत्पत्तितृतीयक्षणे ध्वस्ते चतुर्थक्षणे घटमहं जानामीति न स्यात् । स्यात् चतुःक्षणरूपस्य स्थूलकालोपाधेर्घटज्ञानवत् स्वरूपोपहितत्वात् । यः कालो यस्य प्रागभावेनावच्छिन्नः स तस्य सतः पूर्वकालः । यश्च यस्य प्रध्वंसेनावच्छिन्नः स तस्य भविष्यत्कालः । एवञ्च भूतभविष्यद्वर्तमानत्वानि धर्मनिरूपकभेदात्प्रतिस्वम्भिन्नानि । न च प्रागभावप्रध्वंसयोरनिरुक्तिः गन्धानाधारसमयानाधाराभावस्य प्रागभावत्वात् । नित्यान्यत्वे सति प्रागभावातिरिक्ताभावस्य ध्वंसत्वात् । को हि प्रागभावस्य नाश इति । तदुक्तं तत्रोत्तरं प्रतियोग्येव नास्तिताव्यवहारस्य प्रतियोगिनैवोपपत्तेरतिरिक्ते प्रमाणाभावात् ॥

संशयनिरुक्तिखण्डनमप्यसत् । विरोधे भासमाने

विरोधिनानाप्रकारकैकधर्मिज्ञानत्वस्य तन्निरुक्तित्वात् । एकस्मिन् धर्मिणि तज्ज्ञानालिङ्ग्यमानविरोधाभ्यां प्रकाराभ्यां यदेकं ज्ञानं संशय इति तदर्थः । संशयग्राहकन्तु ज्ञानं विरोधिनानाप्रकारकत्वप्रकारकं न तु विरोधिनानाप्रकारकं येन तदपि संशयः स्यादिति । ननु कोयं विरोधः सहानवस्थानमिति चेत् । न । संयोगतदत्यन्ताभावयोरेकत्रैव तरौ सहैव सत्त्वात् । अवच्छेदभेदाश्रयाणां तत्रापि सहभाव इति चेत् । मूढोसि । तथाहि परमाणौ हि परमाण्वन्तरस्य संयोगञ्च तदभावञ्च मन्यसे । न च तत्रावच्छेदः सम्भवति तरोः शाखावत् परमाणोः प्रतीकाभावात् । तत्राप्युदयाचलादालोकमण्डलः परमाणौ प्राच्यां दिशि लग्नः प्राञ्चं परमाणुसंयोगमवच्छिनत्ति अस्ताचलादायातस्त्वालोकस्तस्मिन्नेव परमाणौ प्रतीच्यां लग्नः प्रत्यञ्चन्तत्संयोगाभावमवच्छिनत्तीति चेत् । भ्रान्तोसि । न हि परमाणोः परमाण्वन्तरसंयोगेनानवच्छिन्नः कोपि भागोस्ति तस्य निर्भागत्वात् अन्यथा सभागो भवेत् । न च सापि नास्ति तस्यास्त्वयाभ्युपगमात् । अत एव यूपवच्च पङ्क्तिवच्चेत्यात्थेति । तस्मात्तदत्यन्ताभावयोर्देशगर्भं प्रतियोगिनैव समं प्रागभावध्वंसयोः कालगर्भं घटतदन्योन्याभावयोस्तु विरोध एव नास्ति एकस्मिन्नेव कपाले एकदैव स्थितेस्तादात्म्येन तु सममन्योन्याभावस्य विरोधो नियतवैदेश्यात् ॥

अथेदानीं तर्कखण्डनकृदाह तर्को हि प्रसक्तमित्युक्तं सम्भावनायामव्याप्तेः इष्टापादने विपर्ययापर्यवसिते चातिव्याप्तेः तयोरतिप्रसङ्गत्वात् । वस्तुतस्तु यत्र पराभ्युपेतव्याप्तिरसेन परानिष्टाय तर्क्यते तत्र विपर्ययापर्यवसि-

तोऽपि परानिषृाय प्रभवत्येव । तथाहि ज्ञानात्मा भवेदित्य-त्रालीके विरोधो दृश्यते । यस्तु तर्कः स्वपक्षसिद्धये प्रवर्तते तस्य परविपर्यये अनुमाने स्वयं दण्डभूतत्वेनाङ्गीभवत विपर्ययपर्यवसानापेक्षा । अत एव व्याप्यारोपेण व्यापकप्रसञ्जनं तर्क इत्यपि निरस्तम् इष्टापादने मिथो विरुद्धेतिव्याप्तेश्च । किञ्च कार्यत्वाददृष्टजन्यमङ्कुरादि स्यात् हन्त तत एव कर्तृजन्यमपि स्यादिति सिद्धेनैव व्याप्येन यः प्रसङ्गस्तस्य व्याप्तिः तत्राऽदृष्टजन्यत्वस्योभयानुमतत्वेन व्याप्यानारोपादिति खण्डनम् । तन्न न हि सम्भावना तर्क इति तार्किकः प्राह उत्कटकोटिकः संशयो ह्यसौ । तथाहि दूरादशोकानोकहमवेत्याशोक एवायं प्रायः शतांशेन तु बहुलः स्यादिति । सोऽयं संशय एव उच्चावचभावेनापि कोटिद्वयालम्बनात् । तर्कस्तु सर्वस्मादेव संशयाद्भिन्न इति ब्रूमः । संशयात् प्रच्युतो निर्णयं चाप्राप्त इत्याचार्यवचनात् । इष्टापादने विपर्ययापर्यवसिते चाव्याप्तिरित्यप्यसत् । इष्टापादने प्रसङ्गमात्रस्य सत्त्वेनाहार्यारोपरूपव्यापकप्रसञ्जनमस्ति । तथाहि क्षितिर्यदि कर्तृजन्या स्यात् प्रयोजनिजन्या स्यादिति तावदिष्टापादनं भगवतोऽपि प्रयोजनित्वात् । तथैवाभ्युपगमान्नैयायिकैः ।

जगच्च सृजतस्तस्य किन्नामेष्टं न सिध्यति ।
तदेवासृजतस्तस्य किं नामेष्टं न हीयते ॥ इति ।

तथा च नात्र प्रयोजनिजन्यत्वस्य व्यापकस्याहार्यारोपरूपं प्रसञ्जनमस्तीति । एवं विपर्ययापर्यवसितेऽपि नाव्याप्तिः । तथाहि यदीश्वरः कर्ता स्यान्नाशरीरी स्यात् । अयं हि तर्को विपर्ययापर्यवसितः । ईश्वरस्य सिद्धौ कर्तृत्वाभावानुमाने बाधात् । तदसिद्धौ चाश्रया-

सिद्धेरनुमानानवताराद्विपर्ययापर्यवसानमिति । अत्र च नातिव्याप्तिः शरीरित्वस्य मन्मते कर्तृत्वाव्यापकत्वेन व्यापकप्रसञ्जनाभावात् । यत्तु पराभ्युपेतखण्डनाय परमात्राभ्युपेतव्याप्तिबलेन यत्र तर्क्यते तत्र विपर्ययापर्यवसितोपि तर्कः सत्तर्क एव । यथा घटादि स्फुरेत् ज्ञानं भवेदिति ज्ञानवादिकृत आपादने सौगतेन विरोधो दृश्यते अलीकं स्फुरति न च ज्ञानं तदिति तेषु एवं हि न विरोधापादनं तर्कः किन्तु तर्के मूलशैथिल्यं सौगतेनोच्यत इति त्वदुक्तमत्यन्तायुक्तम् । न हि तर्कमात्रे विरोधापादनं किन्तु तर्कदूषणमिह व्याप्यत्वासिद्धिरिति । यत्तु मिथो विरुद्धेऽतिव्याप्तिः तत्रापि हि व्याप्यारोपेण व्यापकप्रसञ्जनमस्तीति यथा शब्दो यद्यनित्यो न स्यात् कृतको न स्यादित्येकः यदि नित्यो न स्यात् श्रावणो न स्यादित्यपरः । तत्र कृतकश्चायं तस्मादनित्यः श्रावणश्चायमिति परस्परप्रतिबन्धेनानुमित्यनुत्पत्तेः करणयोः फलानर्जकत्वात् । उपकरणभूतावपि तर्काविमौ मिथो विरोधादाभासौ अत्रातिव्याप्तिरिति तन्न । न हि मिथो विरोधे उभयपक्षसत्त्वे व्याप्तिरस्ति । अन्यथा वस्तुनो वैरूप्यं स्यात् । यच्च यदि कार्यत्वादहष्टृजन्यमङ्कुरादि स्यात्तदा तत एव कर्तृजन्यं स्यादिति तर्के सिद्धेनैव व्याप्येन प्रसङ्गो न तु व्याप्यारोपेणेत्येतदव्याप्तिर्दोष इति । तन्न । अयं हीष्टापादननामा तर्काभास इति । मन्मते तु शिथिलमूल इति अनुगुणस्त्वेतद्भिन्नः । तथाहि हिमं यदि दाहकतेजोवन्न स्यात्तृणादिविकारकारि न स्यात् । भवति च तृणादिविकारकारि तस्माद्दाहकतेजोवदिति सिद्धव्याप्तिकत्वान्नाभासः । तदुक्तं

टीकाकृता । न हि त्रैलोक्यपरिपाकहेतोः सावित्रस्य रश्मेस्तुहिनादपगमः क्षमत इति । यत्त्वारोपितव्याप्तिकेनारोपितव्यापकताकस्य यदनुमानं तत्रातिव्याप्तिरत्र दोषः तत्रापि हि व्याप्यारोपेण व्यापकप्रसञ्जनमिति । अत्रोच्यते । व्याप्याभावप्रतियोगिकाधारताप्रतियोगिव्याप्यज्ञानात् व्यापकाभाववत्ताप्रतियोगिकाधारताप्रतियोगिव्यापकज्ञानं तर्कः । अत्र व्याप्यज्ञानाद्व्यापकज्ञानमित्यनुमितावतिव्याप्तमतः पूर्वविशेषणं तस्यार्थः व्याप्याभावप्रतियोगिका या आधारता पक्षीकृतस्य ह्रदादेस्तत्प्रतियोगि यद्व्याप्तं निर्वह्नित्वादि तस्य ज्ञानात्तेनोल्लिखिताभावस्य व्याप्यस्य ज्ञानादित्यर्थः । एवमपि धूमवान्निर्धूमो वायमिति संशये धूलीपटले धूमारोपादुत्पन्नायामनुमितावतिव्याप्तिरत उत्तरविशेषणम् । अस्यार्थः । व्यापकाभाववत्ताप्रतियोगिका धूमवत्त्वादिप्रतियोगिका या आधारता तत्प्रतियोगि यद्व्यापकनिर्धूमत्वादि तस्य ज्ञानं तेनावधारितव्यतिरेकस्य ज्ञानमित्यर्थतो न पूर्वोक्तानुमितावतिव्याप्तिरिति । यद्वा अव्यवस्थिताभ्युपगम्यमानकोद्युपाधिकानिष्टसत्त्वप्रतिबन्धानि तर्कः । तदुपाधिकत्वञ्च तस्मिन्सति आवश्यकत्वम् । यथा शब्दो यद्यनित्यो न स्यात् कार्यो न स्यादित्यादौ समभिव्याहृतकोटेरभ्युपगतत्वम् । अभ्युपगतञ्च द्वयमनिष्टस्यापीत्यत उक्तमनिष्टेति । अनिष्टत्वञ्च स्वीयकार्यताविरोधिधर्मवत्त्वं प्रमाणविरोधात् स्वाभ्युपगमविरोधाच्च व्याप्यारोपकोटेर्हीनबलवत्त्वार्थम् । अन्यथा व्याप्यारोपव्यापकविरहबुद्ध्योः सत्प्रतिपक्षः परं स्यान्न तु व्याप्यारोपस्य पराजय इति । स चायं तर्कः पञ्चविधः । आत्माश्रयान्योन्याश्रयचक्रका-

नवस्थातदन्यबाधितार्थप्रसङ्गभेदात्। तत्र स्वस्य स्वापेक्षामारोप्यानिष्टप्रसङ्ग आत्माश्रयः। स चायमुत्पत्तिस्थितिज्ञप्तिरूपद्वारभेदात्त्रेधा। तथाहि घटो यदि घटजन्यः स्यात् घटभिन्नः स्यात्। न चैतद्विपर्ययानुमाने घटत्वस्य हेतोरसाधारणतया विपर्ययापर्यवसितत्वमस्येति वाच्यम्। विशेषदर्शने ह्यसाधारणस्यादोषता संशयस्य सत्प्रतिपक्षस्य वा दुष्टबीजस्यानुत्थापनादिति। स्थितौ यद्ययं घट एतद्घटवृत्तिः स्यात्तदा तथा प्रतीयेत अत एव प्रमेयत्वं स्ववृत्तित्वेन प्रमाणगोचर इति तत्रात्माश्रयो न दोषः। न हि प्रमेयत्वं न प्रमेयम्। ज्ञप्तौ तु घटज्ञप्तिर्यदि घटज्ञप्तिजन्या स्यादेतज्ज्ञप्तिभिन्ना स्यात्। न चेष्टापत्तिः स्वज्ञप्तेः स्वज्ञप्तिजन्यत्वनियमे त्वनवस्थानात्। स्वापेक्षापेक्षित्वनिबन्धनः स्वस्यानिष्टप्रसङ्गोऽन्योन्याश्रयः। अयमुत्पत्त्यादौ पूर्ववदूह्यः। न चान्योन्याश्रयस्यात्माश्रयनियतत्वेनावश्यकत्वाल्लाघवाच्चात्माश्रय एव दोष इति वाच्यम्। साक्षात्स्वापेक्षाया अभावात् परम्परया च तत्सम्भवे आत्माश्रयनिर्वाहार्थं प्रथमोपस्थितस्य स्वतो दूषकत्वकल्पनात्। स्वापेक्षापेक्षापेक्षित्वनिबन्धनोऽनिष्टप्रसङ्गश्चक्रकमिदमुत्पत्त्यादौ पूर्ववत्। अत्र त्रिकत्वमविवक्षितं चतुःकक्षादेरपि चक्रकत्वात् तथैव हि तान्त्रिकव्यवहारात्। स चायं कक्षाभेद, आपत्तिप्रयोजकीभूतरूपवदापाद्यापादनमनवस्था। यथा ज्ञानं यदि समानकालीनसमानाधिकरणसाक्षात्कारविषयताव्याप्यजातिमत्स्यात् तदानुपदवेद्यं स्यात् सुखवदेवञ्च तदप्यनुव्यवसीयेतेत्यर्थादनवस्था स्यात्। एषाच्चाभासत्वे प्रामाणिकत्वं बीजं यथा बीजाङ्कुरादावित्यादि। उत्सर्गाविनिगमकल्पना गौरवकल्पना लाघव-

प्रतिबन्धनौचित्यानि तु न तर्काः प्रसङ्गानात्मकत्वात्। तथाहि उत्सर्गस्तु बाधकैकापोद्यो नियमः।

यथा

तस्माद्बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता।
यथान्यथात्वहेतूत्थदोषज्ञानादपोद्यते ॥ इति।

सोयं भूयः साहचर्यरूपो ज्ञानात्मक एव न भवति कुतस्तर्कः स्यात्। अविनिगमस्तु युगपदुपस्थितयोः प्रमाणाभावादन्यतरावधारणाभावः। अत्र च प्रमाणाभावो दोषो न त्वविनिगमः। लाघवगौरवे तु स्वल्पपरिच्छेदकत्वं प्रमाणानां स्वभावौ ज्ञानात्मकावपि न भवतः प्रमाणसहकारितामात्रेण द्वयोस्तर्कव्यपदेशोपि। प्रतिबन्दिस्त्वर्थान्तरम्। विरोधपरत्वे तु तदन्तर्भूतैव। अनौचित्यन्त्वौचित्यस्य प्रामाणिकत्वस्य विरहः प्रमाणाभावान्तर्गतः। न चार्थान्तरमर्थान्तरेण परिहरतः को दोषो वाच्यो यदनौचित्यं न दोषः स्यात् तच्च प्रमाणाभावानन्तर्भावात् पृथगिति वाच्यम्। प्रथमार्थान्तरेणैव कथापर्यवसाने द्वितीयार्थान्तरस्यानवसरग्रस्तत्वात्। स चायं तर्को व्याप्तिग्राहको विषयपरिशोधकश्च। तथाहि व्यभिचारशङ्कानिराससहितं सहचारदर्शनन्तावद् व्याप्तिप्रत्यक्षकारणं तच्छङ्का च विरुद्धकोटावनिष्टमुपनयता तर्केण निवर्त्यते। केवलान्वयिन्यपि साधनसमानाधिकरणात्यन्ताभावप्रतियोगि साध्यं न वेति शङ्कास्त्येव सा च यद्यपि व्यापकतागोचरा तथापि समानसंवित्संवेद्यतया गोचरापि। न च शब्दादिना व्याप्तिग्रहे व्याघातेन शङ्कानुत्पादेन तर्कस्योभयत्राप्यकारणतादोषाय विरोधिशङ्कानिरासमात्रेऽस्य कारणत्वोपग-

मात् । एवञ्च पुरुषप्रयत्नाधीनानुमितावस्य विषयपरिशोधकतापि । तथाहि संशयान्नानाकोट्युपस्थितौ संशयानुकारिण्युपस्थितनानाकोटिका जिज्ञासापि ततो जायते सा चांशतः साध्याभावविषयतया साध्यसिद्धिपरिपन्थिनी तत्र तर्केण कोट्यन्तरेऽनिष्टमुपनयता सापनीयते यथा मधुविषसम्पृक्तान्नबुभुक्षाभक्षणसाध्यानिष्टप्रतिसन्धानेनेत्येवं परिशोधिते विषये तर्केण केवलसाध्यकोटिकजिज्ञासान्तर उत्पादिते समुत्पद्यमानस्तृतीयलिङ्गपरामर्शोऽनुमितये प्रभवतीति । तर्काभासस्तु इष्टापादनमनुगुणः प्रशिथिलमूलो विपर्ययापर्यवसितो मिथो विरुद्धश्चेति पञ्चधा । अत्राद्ये विपर्यये स्वरूपासिद्धिः द्वितीये सिद्धसाधनं तृतीये व्याप्यत्वासिद्धिः चतुर्थे बाधः पञ्चमे सत्प्रतिपक्षितत्वं प्रपञ्चितमिदं प्राक् । ननु तर्कस्य सकलप्रमाणसहकारितेति न्यायमतम् । तच्चायुक्तं विपर्ययापर्यवसाने ह्यस्य च तर्काभासतैव तत्पर्यवसाने तु तदितिकर्तव्यतात्वमेव तर्कस्येति नोभयथाप्यस्य प्रत्यक्षाद्यङ्गतेति । मैवम् । विपर्यये यद्यपि प्रत्यक्षादिस्थले नायं पर्यवस्यति तथापि विपर्ययापर्यवसानयोग्य एतावतैवादौ सत्तर्क इत्येतादृश इत्येवायं प्रत्यक्षादिसहकारो भवति । तथाहि यद्यत्र घटः स्यात्तदा भूतलवद्दर्शनगोचरः स्यादिति । यत्तु यथा जात्युत्तरं स्वव्याघातकं तथा सत्प्रतिपक्षोपीति । अयन्तु यद्विशेषो यज्ज्ञातावुत्तरमेव मन्दं सत्प्रतिपक्षे तु भाषापि । तत्र द्वयोरपि स्वव्याघातकत्वादिति गुरुणोक्तं तद्गुरुणोक्तमतः प्रागेव निरस्तमिति । एतावानर्थः सौत्र एव तथाहि पारमर्षसूत्रम् अविज्ञाततत्त्वेर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः । अत्र तर्क

इति लक्ष्यनिर्देशः शेषं लक्षणाय । अत्र ऊह इति कृते ज्ञान-
मात्रेऽतिव्याप्तिरत उक्तम् अविज्ञाततत्त्व इति । न विज्ञातं
विशेषतो ज्ञातं तत्त्वं वास्तवं रूपं यस्य तस्मिन्नर्थविशेष-
विशेषात् सामान्यज्ञानं धर्मिज्ञानञ्च तर्कहेतुसंशयहेतु-
र्लभ्यते । एवमपि तृतीयादिविग्रहेण बहुव्रीहौ मूढज्ञानमा-
त्रेऽतिव्याप्तिरत उक्तमर्थे इति । तथा च तृतीयविग्रहान-
न्तरं बहुव्रीहिसम्भवः विषयसप्तमी चानेन स्फोरिता ।
निश्चितेप्यर्थे पुनर्निश्चयार्थं य ऊहः स व्युदस्तः । एवमपि
संशयेतिव्याप्तिस्तद्वारणाय कारणोपपत्तित इति । कारणं
व्याप्यं तस्योपपत्तिराहार्यारोपः ततः एवमपीष्टापादनेति-
ऽव्याप्तिरत उक्तं तत्त्वज्ञानार्थमिति । तत्तु न तत्त्वज्ञानार्थं
भवति तद्विपर्ययस्याप्रमितत्वात् । अनेन निर्णयफलकता
दर्शिता । एवञ्च सम्बन्धो विषयः कारणमाहार्यारोपः
आहार्यतात्वस्यैच्छिकतामात्रेण न तु प्रतियोग्यारोप्यादि
वद्बाधितविषयत्वेनेति स्वरूपमनिष्टप्रसञ्जनं फलं निर्णयः ।
तर्कशरीरे यद्यपि पूर्वभागः करणव्युत्पत्त्या उत्तरभागस्तु
भावव्युत्पत्त्या तर्कपदार्थस्तथापि उत्तरभाग एव तर्कः सा-
क्षादनुमित्यनुकूलत्वादिति स एवात्र लक्ष्यः । नन्वात्मा-
श्रयादेर्मूलप्रमाणोपपत्तिश्चेत्तदा प्रामाणिकत्वाददोषत्वं
न चेत्तदा मूलशैथिल्याददोषत्वं तथा चैते सत्तर्का एवेति
खण्डनम् । तदप्यसत् । प्रमेयत्वं यदि प्रमेयवृत्तिः स्यात्तदा
प्रमेयत्वभिन्नं स्यादभिधेयत्ववदत्र तावन्न मूले प्रमाणोपप-
त्तेः प्रमेयवृत्तित्वप्रमेयभिन्नत्वयोर्व्याप्त्यभावात् प्रमेयत्व
एव तद्भङ्गात् । हन्त तर्हि मूलशैथिल्यं तदपि न पक्षता-
दशायामुद्भावनायोगात् । इदमेव वैलक्षण्यं गमयितुं प्रस-
ङ्गात्मनोप्यमी चत्वारोपि गोवृषन्यायेन पृथगुक्ता इति ।

अस्त्वेवं तथापि नायं सत्तर्कः विपर्ययापर्यवसितत्वात्। तथाहि प्रमेयत्वञ्च न प्रमेयभिन्नं प्रमेयत्वं प्रमेयमिति यावत्। ईदृशञ्च विधानं न भवति। न ह्युद्देश्यविधेययोरैक्यं सम्भवतीति। मैवम्। प्रमेयत्वं प्रमेयत्वप्रतियोगिकान्योन्याभावाश्रयो न भवतीत्यस्य विधेयत्वात्। तथा च प्रमेयत्वं न प्रमेयवृत्ति प्रमेयत्वान्यान्यत्वात्। ननु चाभावप्रतियोगी न विशेषणम् अभावविधौ प्रतियोगिनोऽप्यनुप्रवेशापत्तेः। नोपलक्षणम् अभावमात्रविधिस्तर्हि स्यात्तथा चातिप्रसङ्ग इति चेन्न। एवं हि निषेधमात्रखण्डने व्याघातः स्यादिति। व्याघातप्रतिबन्द्योस्तु यत्तर्कत्वमुक्तं तदयुक्तम्। द्वयोरप्रसङ्गत्वात् प्रसङ्गस्यैव च तत्कार्यत्वादिति। अन्योन्याश्रयापादनन्त्विवत्थम् इतो भिन्नतया ज्ञात्वा तस्मादयं भिन्नतया ज्ञातव्यः। ततो भिन्नतया ज्ञाताच्चास्मात्सोऽपि भिन्नतया ज्ञातव्य इत्युभयीयं भेदज्ञानाधीनमित्युभयमपि ज्ञानं न स्यादन्योन्यापेक्षित्वादित्यसंवादयोरन्योन्याश्रयः न त्वन्योन्याश्रय आपाद्यते आपाद्याप्रसिद्धेः। एवं चक्रकेऽप्यूह्यं तत्र परम्परा परमधिकेति विशेषः। अन्योन्याश्रयापादनमेव नेति सत्यं किन्तु प्रकृते नैवं न हि पक्षभिन्नतया ज्ञातात् पक्षो भिन्नतया ज्ञेय उक्तदोषात्। नापि पक्षाभिन्नतया ज्ञातात् विरोधात्। किन्तु प्रतियोग्यनुयोगिनोः स्वरूपेण ज्ञाने एकस्मादपरस्तदन्योन्याभावरूपवत्तया प्रतीयते। सा तु भेदधीः सत्ये प्रमाणे त्वन्यथेति प्रमेयत्वादावात्माश्रयस्तु न दोषः प्रामाणिकत्वात्। एवं कार्यकारणयोरन्योन्याश्रयोऽपि न उपलक्षणाश्रयणात्। एवं दुःखजन्मेत्यादौ चक्रकं बीजाङ्कुरादावनवस्था च न दोषः व्यक्तिभेदाश्रयणेन प्रामाणिकत्वात्। चक्रकन्तु व्यक्तित्रया-

दिस्थमेकभेदादनन्तरभेदम्। अनवस्था तु यदि द्रव्यं द्रव्यसमवेतत्वनियतं स्यात्तदा गुणकर्मान्यतरं स्यात्। अत्र द्रव्यस्य द्रव्यसमवेतत्वनियतत्वे अवयवव्यवस्था न स्यात् अवयवावयविप्रसङ्गो निरवधिरिति सुमेरुसर्षपयोरप्यविशेषापत्त्या निरस्तमेवेति। सा चेयमनवस्था कारणमुखी तु बीजाङ्कुरादौ न दोषाय प्रामाणिकत्वादात्माश्रयादिरूपेयते। आपादनस्थत्वे तु प्रमाणं नास्तीत्यात्माश्रयादयस्तत्र दोषाभावात्। तर्हि प्रमाणाभावस्तत्र तत्रोद्भाव्यतामुपजीव्यत्वात् किमात्माश्रयेणोद्भावनेनेति खण्डनम्। तन्न। आत्माश्रयादिव्यवस्थापनात्पुरत एव निरस्तत्वात्। ननु गगनारविन्दात् कूर्मरोम भिन्नमभिन्नं वेत्यत्र प्रश्ने न किञ्चिदप्युत्तरं घटते। न चानुत्तरमेवाप्रतिभापत्तेरिति तन्न। उत्तरार्हे उत्तराप्रतिपत्तेरप्रतिभात्वात्। नन्विदमुत्तरानर्हमित्यपि वाच्यमेवेति चेत्। न। अवस्तुनि विधिनिषेधयोरप्रवर्त्यत्वात्। ननु बन्ध्यासुतशशविपाणे कूर्मरोमैवेति वाक्यादपि सदुपरक्तमसद्भासते कथमन्यथा असद्व्याप्तिवादिनां मतमपि ज्ञास्यसि। अज्ञात्वा च कथं ततो विमुखः स्या इति। तन्न। बन्ध्यासुत इत्यतो बन्ध्यासुतयोरन्वयः कथं प्रतीयताम् अस्याः सुतान्वये बाधात्। अजननी हि सा बन्ध्यापदेनोपस्थिता तस्माद्बन्ध्यायां सुतान्वयो निषिध्यते सुते च बन्ध्यान्वयः न तु बन्ध्यासुतो निषिध्यते प्रतियोगिसिद्ध्यसिद्धिपराहतेः। यत्तु खाण्डनिकस्य प्रज्ञाशेषे

तत्तुल्योहस्तदीयश्च योजनं विषयान्तरे।
शृङ्खला तस्य शेषे च त्रिधा भ्रमति मत्क्रिया॥

इति खण्डनकृतोपदिष्टमिति खण्डनोद्धारकृतापि समानमिति साधूपदिष्टमिति सर्वं चतुरस्रमिति ॥

यदक्षपादस्य महामुनेर्मतं
विखण्डितं पण्डितमानिनामुना ।
नतेन गौडेन(१) तदञ्जसाधुना
मयोद्धृतं पश्यत वीतमत्सराः ॥
लङ्घ्यते वैनतेयोपि नीरक्षीरविवेचने ।
सुकृती राजहंसोयमेवमेवं प्रगल्भते ॥

इति श्रीमहामहोपाध्यायसन्मिश्रवाचस्पतिविरचितः
खण्डनोद्धारः समाप्तः ॥

(१) अत्र प्रथमद्वितीयादर्शपुस्तकयोरक्षराणि विलुप्तानि तृतीयादर्शपुस्तके 'उतनगौडेन" एतान्यक्षराणि वर्तन्ते । तद्दर्शनादुद्धृतं "नतेन गौडेने"ति ।

